
DUE DATE SLIP

GOVT. COLLEGE, LIBRARY

KOTA (Raj.)

Students can retain library books only for two weeks at the most.

BORROWER'S No.	DUE DTATE	SIGNATURE




श्रीहरिकृष्णनिबन्धमणिमालायाः
पञ्चमो (५) मणिः ।

श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचिता

कारिकावली

साहित्योपाध्याय न्यायव्याकरणाचार्य श्रीसूर्यनारायणशुक्लरचित
मयूखोद्भासित सिद्धान्तमुक्तावली सहिता ।



प्रकाशकः—
श्रीहरिकृष्णनिबन्धभवनम्
बनारस-सिटी ।

(चतुर्थं संस्करणम्)

Herbert College Library

KOTAH.

Class No .. S 445 .....

Book No . V 11396 .....

Accession No ... 11396 .....

K. P P 5000-2-48.

संस्करण]

एक शब्दके कई अर्थ एवं
क्रियाविशेषण, संज्ञा, भाव
गया है। एक्टरे, कुर्सी,
न, कोतवाल, थानेदार,
नकी संस्कृत बनाने में
और भी विशेष ध्यान
१)

ों से युक्त प्रथमा
का संग्रह

गणितकौमुदी प्रथमभाग (चतुर्थ संस्करण)

गवर्नमेंट संस्कृत कालेज बनारस, बिहार, उत्कल की प्रथमा परीक्षा तथा हिन्दूविश्वविद्यालय की प्रवेशिका परीक्षा में निर्धारित गणित का यह "गणित-कौमुदी" चतुर्थ संस्करण बहुत ही उपयोगी हुआ है। इस ग्रन्थ में अभिन्न अर्थात् साधारण और मिश्र संख्याओं का सङ्कलन, व्यकलन, गुणन और भाग उदाहरण सहित, अभिन्नपरिकर्मचतुष्टयम् (जोड़ घटाव, गुणा, भाग उदाहरण, सहित) आदि विषयों के लक्षण तथा अभ्यास के लिये भिन्न २ प्रकार के उदाहरण, मान तथा भिन्न २ परिभाषायें भी रक्खी गयी हैं। अङ्कों का सोदाहरण सङ्केत तथा पारिभाषिक शब्दों का विवरण प्रश्नोत्तर आदि विषय भी दिये गये हैं। ।।।)

किरातार्जुनीयम्।

सान्वय-घण्टापथ-सुधा-व्याख्याद्वयोपेतम्

इसमें सर्व प्रथम पात्र-परिचय-संक्षिप्त कथा तथा प्रत्येक श्लोकों में क्रमशः अवतरण-श्लोक-मल्लिनाथ कृत घण्टापथव्याख्या-सुधा व्याख्या-कोश-समासादि-व्याकरण-वाक्यपरिवर्तन-सरलार्थ-हिन्दीभाषार्थ उपयुक्तटीप्पणियां-शिक्षासंग्रह-प्रश्नपत्रसंग्रह आदि विषय दिये गये हैं। विद्यार्थियों के उपयुक्त इतना सुन्दर संस्करण अन्यत्र नहीं छपा है। १ से ३ सर्ग का मूल्य १।।।)

सूर्यसिद्धान्तः

तत्त्वामृतभाष्योपपत्ति-टिप्पणीभिः सहितः

पूर्व प्रकाशित सभी टीकाओं के गुण दोषों की समालोचना करके प्रस्तुत संस्करण प्रकाशित किया जा रहा है। बड़े बड़े विद्वानोंने उपर्युक्त तत्त्वामृतभाष्य को निरीक्षण करके मुक्त कण्ठ से इसकी प्रशंसा की है। सूर्यसिद्धान्त का ऐसा प्रशंसनीय संस्करण यह प्रथम बार ही प्रकाशित हो रहा है शीघ्र प्राप्त होगा।

प्राप्तिस्थानम्—श्रीहरिकृष्णनिबन्धभवनम्, बनारस सिटी।

S'RĪ HARIKṚSNA NIBANDHAMAṆI MĀLĀ

5.

THE

KĀRIKĀVLAĪ

WITH

SIDDHĀNTA MUKTĀVALĪ

OF

S'RĪ VIS'VANĀTH PANCHĀNAN BHATTĀCHĀRYA

With the "MAYUKHA" Commentary

By

NYĀYA VYĀKAPANĀCHĀRYA

PANDIT S'RĪ SURYANĀRĀYANA S'UKLA

Professor, Govt. Sanskrit College, Benares

(Part I)

श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचिता

कारिकावली

साहित्योपाध्याय न्यायव्याकरणाचार्य

श्रीसूर्यनारायणशुक्लरचित

मयूखोद्भासित सिद्धान्तमुक्तावलीसहिता ।

सन्यासिसंस्कृतमहाविद्यालयाध्यापकव्याकरणसाहित्याचार्य

श्रीरामगोविन्दशुक्लेन टिप्पण्यादिना सम्पादिता ।

BENARES

S'ri Hari Krishna Nibandh Bhawan

Fourth Edition] [1946

श्रीगोकुलेश्वरप्रीत्यै तदीयजननोत्सवे ।
श्रीहरिकृष्णदासेन सदानन्दाभिलाषिणा ॥
विक्रमीय-युगवसुनवेन्दुमितशरदि सुतारे
स्थापितमिह शुभसहसि शुक्ल इनतिथिगुरुवारे ।
श्रीहरिकृष्णनिबन्धभवनमिति मणिमालायाः
ग्रन्थनाय बुधजनविनोदमतिमङ्गलदायाः ॥

Registered According to Act XXV of 1867,

PRINTED AT THE

VIDYA VILAS PRESS,

BENARES CITY.

प्राप्तिस्थानम्—

श्रीहरिकृष्णनिबन्धभवनम्,

बनारस सिटी ।

वि० सं० २००३

All Rights Reserved by the Publishers.

मूल्य प्रथम भाग १) द्वितीय भाग १) संपूर्ण २)

श्रीहरिः शरणम्।

व्याख्यातुर्निवेदनम्।

विदितचरमिदं समेषां विदुषां यत्संस्कृतसाहित्यपरिशीलिनां शास्त्रतत्त्वालोकाय कीदृशीमावश्यकतामावहति तर्कशास्त्रम्। यतोऽद्यत्वे सर्वाण्यपि दर्शनानि किंवा व्याकरणालङ्कारादिशास्त्राण्यपि नव्यतार्किकरीतिमनुसृत्यैव प्राधानविद्याकेन्द्रेषु काश्यादिषु पाठ्यन्ते अतः 'समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना' इत्यस्योपमेयकोटौ तर्कशास्त्रप्रक्षेपो नातिशयोक्तिमालम्बते।

अतस्तर्कशास्त्रस्य सर्वोपादेयतामाकलय्य तर्कशास्त्रमधिजिगांसूनां कृते महामहोपाध्यायविश्वनाथपञ्चाननभट्टाचार्यमहोदयैर्न्यायसिद्धान्तमुक्तावली-नामा रुचिरो ग्रन्थो निरमीयत।

अयं च महामहोपाध्यायविश्वनाथपञ्चाननभट्टाचार्यः रत्नाकरविद्यावाचस्पतेः पौत्रः विद्यानिवासभट्टाचार्यस्य पुत्रः रुद्रन्यायवाचस्पतेः नारायणभट्टाचार्यस्य च भ्राता १५५६ शालिवाहनशके वङ्गदेशे प्रख्याततार्किको बभूव।

एतस्यैव ज्येष्ठपितृव्यो वासुदेवसार्वभौम आसीदस्य शिष्यास्तत्त्वचिन्तामणि दीधितिकारो रघुनाथतार्किकशिरोमणिः, स्मृतितत्त्वस्य कर्ता महामहोपाध्यायरघुनन्दनभट्टाचार्यः श्रीगौराङ्गमहाप्रभुः, तान्त्रिक कृष्णानन्दश्च, बभूवुः।

श्रीविश्वनाथपञ्चाननभट्टाचार्यकृता ग्रन्थास्त्विमे—

१ भाषापरिच्छेदः (कारिकावली)
२ न्यायसिद्धान्तमुक्तावली (भाषापरिच्छेदटीका)
३ मांसतत्त्वविवेकः
४ न्यायसूत्रवृत्तिः (वृन्दावनेऽनेन लिखिता)
५ सर्वार्थतत्त्वालोकः
६ न्यायतन्त्रबोधिनी
७ पिङ्गलप्रकाशश्च

एषु आदिमाश्चत्वारो ग्रन्था मुद्रिता इदानीमुपलभ्यन्ते इति।

इदं सर्वं वाराणसेयसरस्वतीभवनप्रकाशितमांसतत्त्वविवेकस्य भूमिकायां सुगृहीतनामधेयाः वाराणसेयराजकीयसंस्कृतमहाविद्यालयाध्यक्षाः प्राच्यप्रतीच्योभयदर्शननिष्णाताः महामहोपाध्याय कविराज श्रीगोपीनाथमहोदया न्यरूपयन्निति विरम्यते लेखविस्तरादिति।

सा च न्यायसिद्धान्तमुक्तावली अतिसरलया सरण्या निर्मिता कापि अतिसङ्क्षिप्ततया व्याख्यानमपेक्षत एव। यद्यपि [illegible] स्यानं यद्यत्र मुद्रितं सर्वत्रलब्धप्रचारं समुपलभ्यते तथापि

णामेव मोदावहम्। व्याख्यानान्तराणि चातिसङ्क्षिप्तानीति न छात्राणां तादृक्विषयव्युत्पादकानीति मया मुक्तावलीमयूखनाम्नी टीका निर्माय मित्राय श्रीमते बाबूहरिकृष्णदासगुप्ताय प्रादीयत तेन च प्रकाशं प्रकाशिता च यदि छात्राणां कृतकृत्यं मन्वानो भवतामीदृशीमुदारतां शिरसाबिभ्रियाम्।

येभ्यो हिन्दुविश्वविद्यालयसाहित्यशास्त्रप्रधानाध्यापकेभ्यो व्याकरणसाहित्याचार्य—श्रीचन्द्रशेखरशर्माण्डेयेभ्यः, श्रीतर्कवागीशब्रह्मचारिश्रीश्रीदत्तशर्माण्डेयेभ्यः, विशिष्टाद्वैतसम्प्रदायाचार्येभ्यः सर्वतन्त्रापरतन्त्रेभ्यः श्रीमाधवाचार्येभ्यः, पूर्वोत्तरमीमांसाभूषणपण्डितरत्नदेवशिखामणि श्रीरामानुजाचार्यमहोदयेभ्यः, महामहोपाध्याय श्रीबामाचरणभट्टाचार्यमहोदयेभ्यश्च, अधीत्य कृतकृत्यं मन्ये तान् सर्वानपि गुरुवरान् साञ्जलिबन्धं सप्रणिपातं तेषामुपकारजातं शिरसा बिभर्मि।

यत्रायोध्यास्थराजगोकुलपाठशालायामधीत्य व्याकरणादिशास्त्राणि, चतुर्विंशतिवर्षमिते वयसि वर्तमानेन मया प्रधानाध्यापकपदेऽवस्थाय सुचिरमध्यापितानि तदध्यक्षाणां वैष्णवकुलभूषणानां सर्वप्रकारेण मयि वत्सलां दृष्टिमादधतां मदभ्युन्नतिकारणानां श्रीमद्रामदासमहोदयानां चरणकमलयोः प्रणिपातं प्रणम्य साजन्म तदुपकारजातं स्मरन् केवलं कृतार्थमात्मानं बहुमन्ये।

श्रीमतां वाराणसेय जो० म० ... सर्वतन्त्रस्वतन्त्राणां श्री० पं० चण्डीप्रसादशुक्लमहोदयानां सुतनिर्विशेषं मयि वत्सलां दृष्टिमादधतामुपकारजातं वचसा वक्तुमशक्तः केवलं कृतार्थयामि।

एतद्ग्रन्थप्रकाशकं श्रीमन्तं श्रेष्ठिप्रवरं श्रीहरिकृष्णदासगुप्तमहोदयं शुभाशीर्भियुञ्जन् श्रीविश्वनाथचरणकमलयोः पुष्परूपेण ग्रन्थमिमं समर्पयामीति।

विदुषामनुचरस्य

सूर्यनारायणशर्मशुक्लस्य

॥ श्रीगणेशाय नमः ॥

मयूखसहितमुक्तावलीसमेता

कारिकावली ।



नूतनजलधररुचये गोपवधूटीदुकूलचौराय ।
तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय ॥ १ ॥

न्यायसिद्धान्तमुक्तावली ।

चूडामणीकृतविधुर्वलयीकृतवासुकिः ।
भवो भवतु भव्याय लीलाताण्डवपण्डितः ॥ १ ॥

मुक्तावलीमयूखः ।

माहेश्वरं धनुरदस्य विकृष्य दूरं सञ्चूर्णयन् प्रमुदितो मुनिनाऽभिदृष्टः ॥
शालीनया जनककन्यकया स तिर्यग्दृष्टया विलोकितवपू रघुनायकोऽव्यात् ॥ १ ॥
श्रीविश्वनाथ ! विषमं चरितं स्वदीयं दृष्ट्वा परां न वृणुया इति शङ्कितोऽस्मि ॥
इत्थं निशम्य वचनं गिरिशो भवान्या अङ्गीभवन्प्रमुदितो भवतान्मुदे नः ॥ २ ॥
श्रीदत्तवामाचरणन्यायाचार्यपदाम्बुजम् ।
नत्वा मयूखं तनुते सूर्यनारायणः सुधीः ॥ ३ ॥

चूडामणीकृतेति । न चूडामणिरचूडामणिः, अचूडामणिश्चूडामणिः सम्पद्यमानस्तथा कृत इति चूडामणीकृतो विधुर्येन स चूडामणीकृतविधुः अवलयो वलयः सम्पद्यमानस्तथा कृत इति वलयीकृतो वासुकिर्येन स वलयीकृतवासुकिः, लीलया तां डवं लीलाताण्डवं तत्र पण्डितः लीलाताण्डवपण्डितः, भवति जगदस्मादिति भवः शङ्करो भव्याय कल्याणाय भवत्वित्यर्थः ।

ननु क्रियाऽन्वयेन शान्ताकाङ्क्षस्य विशेष्यवाचकपदस्य विशेषणान्तरेणान्वयार्थं पुनरनुसन्धानं समाप्तपुनरात्तत्वं नाम काव्यदोषः । यथा—

नाशयन्तो घनध्वान्तं तापयन्तो वियोगिनः
पतन्ति शशिनः पादा भाषयन्तः क्षमातलम् ॥

इत्यत्र पतनक्रियाऽन्वयेन शान्ताकाङ्क्षस्य पादा इत्यस्य भाषयन्त इति पदप्रतिपाद्यविशेषणेनान्वयार्थं पुनः कीदृशाः पादा इत्यनुसन्धानेन समाप्तपुनरात्तत्वं दोषस्तथा प्रकृतेऽपि भवो भव्याय भवत्वित्यन्वयेन शान्ताकाङ्क्षस्य भवपदस्य लीलाताण्डवपण्डित इति पदप्रतिपाद्यविशेषणेनान्वयार्थं पुनः कीदृशो भव इत्यनुसन्धानेन समाप्तपुनरात्तत्वं स्यादिति चेत् ?

न, विशेषणत्वं हि विद्यमानत्वे सतीतरव्यावर्तकत्वम् । तच्च प्रकृते भवस्यैव, तस्यै-

निजनिर्मितकारिकावलीमतिसङ्क्षिप्तचिरन्तनोक्तिभिः ।
विशदीकरवाणि कौतुकान्ननु राजीवदृयावशंवदः ॥ २ ॥

मुक्तावलीमयूखः ।

वेतरव्यावर्तकत्वेन विवक्षणादिति लीलाताण्डवपण्डित इत्यस्य विशेष्यतास्वीकारेण समानपुनरुक्तत्वाभावात् ।

नन्वेवं सति नीलोत्पलमित्यत्रोत्पलस्यापीतरव्यावर्तकत्वेन विवक्षायां विशेषणतया 'विशेषणं विशेष्येण बहुलम्' इति समाससञ्ज्ञाविधायकशास्त्रघटकप्रथमाऽन्तपदबोध्यतया 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्युपसर्जनसञ्ज्ञायाम् 'उपसर्जनं पूर्वम्' इति पूर्वनिपाते उत्पलनीलमित्यपि स्यादतः 'जातितद्भिन्नप्रवृत्तिनिमित्तकानां शब्दानां मध्ये जातिप्रवृत्तिनिमित्तकमेव विशेष्यवाचकम्' इति स्वीकर्तव्यम् । अत एव 'कडाराः कर्मधारये' इति सूत्रं चरितार्थम् । अन्यथा विशेष्यविशेषणभावस्य विवक्षाऽधीनतया जैमिनेर्विशेषणत्वेन विवक्षायां जैमिनिकडार इति, कडारस्य विशेषणत्वेन विवक्षायां कडारजैमिनिरिति रूपद्वयसिद्धौ तद्व्यर्थं स्यात् । 'विशेष्यविशेषणभावे कामचारः' इति प्रवादस्तु खञ्जकुब्जः कुब्जखञ्जः इत्यादावेव । अत्र हि कस्यापि जातिप्रवृत्तिनिमित्तकत्वाभावेन नोक्तनियमप्रवृत्तिरिति तत्त्वम् । एवञ्च प्रकृते भवशब्दस्य भवत्वजातिप्रवृत्तिनिमित्तकतया विशेष्यवाचकत्वमेव लीलाताण्डवपण्डित इत्यस्य पाण्डित्य (बुद्धि) रूपगुणप्रवृत्तिनिमित्तकतया विशेषणवाचकत्वमेवेति समानपुनरुक्तत्वं दुष्परिहरम्—

न चैकव्यक्तिवृत्तितया भवत्वं न जातिरिति वाच्यम्,

कल्पभेदेन शिवशरीरस्य भिन्नतया भवत्वस्य जातित्वे बाधकाभावात् ।

न च भवत्यस्माज्जगदिति व्युत्पत्त्या भवशब्दस्य क्रियाप्रवृत्तिनिमित्तकत्वेन जातिप्रवृत्तिनिमित्तकत्वाभाव इति वाच्यम्,

रूढेर्योगाद् बलीयस्त्वेन भवशब्दस्य जातिप्रवृत्तिनिमित्तकत्वौचित्यादिति चेद् ?

अत्रोच्यते—आकाङ्क्षा द्विविधा—उत्थिताकाङ्क्षा उत्थाप्याकाङ्क्षा च । तत्रान्त्यायां समानपुनरुक्तत्वं दोषो नाद्यायां, तत्राकाङ्क्षाया उत्थिततया विशेष्यवाचकपदस्य क्रियाऽन्वयेन शान्ताकाङ्क्षत्वाभावात्समानपुनरुक्तत्वाप्रसक्तेः । प्रकृते हि किमर्थं विधोश्चूडामणीकरणं किमर्थं वामुकेर्बलीयकरणमिति प्रयोजनाकाङ्क्षाया उत्थिततया तन्निवृत्तये लीलाताण्डवपण्डित इत्यस्योपादानेन समानपुनरुक्तत्वाभावात् ।

समानपुनरुक्तत्वपरिष्कारस्तु—वाक्यविशिष्टत्वं समानपुनरुक्तत्वम् । वैशिष्ट्यं च स्वतादात्म्य-स्वविशिष्टविशेषणवाचकपदघटितत्वोभयसम्बन्धेन । अत्र वैशिष्ट्यं स्वघटकविशेष्यवाचकपदावधिकपूर्वत्वाभाववत्त्व स्वघटकपदजनिताकाङ्क्षाशामकार्थाबोधकत्वोभयसम्बन्धेन, समन्वयः स्वयमूहनीय इत्यलम् ॥ १ ॥

निजेति । अतिसङ्क्षिप्ताश्च ताश्चिरन्तनाश्चामुक्तयस्ताभिः कौतुकाद्विशदीकरवाणीति कथनेन प्रकृतग्रन्थनिर्माणे स्वस्य प्रयासाभावः सूचितः ।

राजीवदृयावशंवद इति । राजीवे तन्नामके शिष्ये दया तया वशंवदतीति राजीवदृयावशंवदः, अथवा राजीवस्य राजावलोचनस्य भगवतो दया तया वशंवदतीति राजी-

सद्द्रव्या गुणगुम्फिता सुकृतिनां सत्कर्मणां ज्ञापिका
सत्सामान्यविशेषनित्यमिलितामावप्रकर्षोज्ज्वला।
विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली
विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम् ॥ ३ ॥

मुक्तावलीमयूखः।

वदयावद्यंवदः, 'विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोपो वाच्यः' इति वचनेन लोचनशब्दस्य लोप इति बोध्यम् ॥ २ ॥

सद्द्रव्येति। द्रव्यैः सहिता सद्द्रव्या द्रव्यसाध्या बहुमूल्येति यावद्, गुणेन सूत्रेण गुम्फिता गुणगुम्फिता सुकृतिनां सत्कर्मणां भगवद्भजनादीनां ज्ञापिका बोधिका सामान्यं च विशेषश्च सामान्यविशेषौ स्तौ च तौ सामान्यविशेषौ सत्सामान्यविशेषौ ताभ्यां नित्यं मिलिता सम्बद्धेति सत्सामान्यविशेषनित्यमिलिता समीचीनसामान्यधर्मेण मुक्तावलीत्वेन समीचीनविशेषधर्मेण महत्त्वनिर्मलत्वादिना च सम्बद्धेति यावत्, तार्किकैस्तमसस्तेजोऽभावरूपत्वाङ्गीकाराद् अभाव इत्यस्य तेजोऽभाव इत्यर्थः तमसीति यावत्, अन्धकारे सति प्रकर्षेणोज्ज्वला इत्यभावप्रकर्षोज्ज्वला सती समीचीना युक्तियोजना मुक्तानां सन्निवेशो यस्यां सा सद्युक्तिः एषा सिद्धान्ता इव मुक्ताः सिद्धान्तमुक्तास्तासामवली सिद्धान्तमुक्तावली विश्वनाथकृतिना विष्णोर्वक्षसि विन्यस्ता सती चिरं मनसो मुदं वितनुताम् इति मुक्तावलीपक्षे समासादिः।

ग्रन्थपक्षे तु द्रव्यैः प्रतिपादकत्वसम्बन्धेन सहितेति सद्द्रव्या गुणैर्गुणनिरूपणैर्गुम्फिता सन्ति च तानि कर्माणि सत्कर्माण्युत्क्षेपणादीनि तेषां ज्ञापिका न तु भ्रमणादीनां ज्ञापिकेति भावः, सत्त्वं चात्रान्यत्रानन्तर्भावरूपम्, सामान्यं च विशेषश्च नित्यमिलितं (समवायः) च सामान्यविशेषनित्यमिलितानि सन्ति विद्यमानानि प्रतिपादकत्वसम्बन्धेन सामान्यविशेषनित्यमिलितानि यस्यां सा सत्सामान्यविशेषनित्यमिलिता अभावस्य प्रकर्षस्तेनोज्ज्वला अभावप्रकर्षोज्ज्वला प्रभाकरखण्डिताभावपदार्थस्यापनेन प्रख्यातमाहात्म्येति यावत्, सत्यः समीचीना युक्तयो यस्यां सा सद्युक्तिः एषा सिद्धान्ता मुक्ता इवेति सिद्धान्तमुक्ता 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति समासः। तासामवली सिद्धान्तमुक्तावली विश्वनाथकृतिना विष्णोर्वक्षसि विन्यस्ता सती सुकृतिनां चिरं मनसो मुदं वितनुताम् इत्यर्थः।

नन्वेकशब्दप्रतिपाद्यत्वमपि साधारणो धर्म इत्यालङ्कारिकैरभ्युपेयत इति प्रकृते सद्द्रव्येत्यादिना साधारणधर्मस्य प्रयोगसत्त्वान्नोपमितमित्यादिना समासो वक्तुं युक्तोऽपि तु सिद्धान्ता एव मुक्ता इत्येवेति रूपकमेव नोपमेति चेद्?

न, सद्द्रव्यत्वस्य सिद्धान्तमुक्तावलीवृत्तित्वेऽपि सिद्धान्तवृत्तित्वस्य मुक्तावृत्तित्वस्य चाभावेन सिद्धान्तमुक्तयोः साधारणधर्मस्य प्रकृतेऽप्रयोगाद् उपमितमिति समासे बाधकाभावात्।

ननु प्रकरणेन ग्रन्थपक्ष एतत्तात्पर्यनिर्णयात् तात्पर्यज्ञानस्य च शाब्दबोधे हेतुत्वात् सकृदुच्चरितन्यायाच्च कथमर्थान्तरस्य प्रतीतिरिति चेद्?

उच्यते-शक्यार्थान्तरबोधनासम्भवेऽपि व्यञ्जनयार्थान्तरबोधसम्भव इति। तच्च प्रकृतेऽनुपपद्यमानं ग्रन्थमुक्तावल्योरुपमानोपमेयभावे पर्यवस्यति। तेन चोपमाऽलङ्कारो व्यङ्ग्य इति

विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति—

नूतनेत्यादि। ननु मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणं विनाऽपि मङ्गलं नास्तिकादीनां ग्रन्थे निर्विघ्नपरिसमाप्तिदर्शनादिति चेद् ?

न, अविगीतशिष्टाचारविषयत्वेन मङ्गलस्य सफलत्वे सिद्धे तत्र च फलजिज्ञासायां सम्भवति दृष्टफलकत्वेऽदृष्टफलकल्पनाया अन्याय्यत्वाद् उपस्थितत्वाच्च समाप्तिरेव फलं कल्प्यते।

मुक्तावलीमयूखः।

न च तार्किकैर्व्यञ्जनाया अनङ्गीकारात्कथमेतदिति वाच्यम्।

व्यक्तिविवेककृता व्यञ्जनाया अनुमानेऽन्तर्भावस्य प्रतिपादितत्वादनुमानस्य च तार्किकैरङ्गीकरणेन श्रुतिविरहादित्यलं पल्लवितेन ॥ ३ ॥

विघ्नविघाताय इति। विशिष्टो घातो विघातः। वैशिष्ट्यं चोत्पत्तिमत्त्वमेवात्र बोध्यम्। तथा च विघात इत्यस्योत्पत्तिमदभाव इत्यर्थः।

ननु घातपदमेवोत्पत्तिविशिष्टाभावरूपध्वंसबोधकम् इत्युत्पत्तिमदर्थकस्य विपदस्य नैष्फल्यमिति चेद् ?

न, स्वीचकैर्मारुतपूर्णरन्ध्रैरितिमहाकविकालिदासोपपदे 'कीचका वेणवस्ते स्युर्ये स्वनन्त्यनिलोद्धताः' इति कोशबलेन मारुतपूर्णरन्ध्रत्वविशिष्टवेणुवाचककीचकपदेन मारुतपूर्णरन्ध्ररूपार्थस्य लाभेन मारुतपूर्णरन्ध्रैरित्यस्य वैयर्थ्यभिया 'विशिष्टवाचकानां पदानां सति पृथग्विशेषणवाचकपदसमवधाने विशेष्यमात्रपरत्वम्' इत्यवश्यमभ्युपेयम्। ततश्च कीचकपदस्य वेणुमात्रपरतया मारुतपूर्णरन्ध्रैरित्यस्य न वैयर्थ्यम्। एवं प्रकृते घातपदस्याभावमात्रपरत्वाङ्गीकारेणोत्पत्तिमदर्थकविपदस्य न वैयर्थ्यमित्यदोषाद् उपसर्गाणां द्योतकत्वस्यैव नैयायिकाभिमततया शङ्काया एवाभावाच्च।

नूतनेत्यादीति। नूतनो यो जलधरो मेघो नूतनजलधरः, नूतनजलधरस्य रुचिरिव रुचिर्यस्य स नूतनजलधररुचिरतस्मै, यथा मेघो वृष्ट्या जनतां मोदयति तथा कृष्णोऽपि मत्कामनोरथपूर्त्या मत्कान् मोदयतीत्यभिप्रायः। गोपानां वधूटयस्तासां दुकूलानि तेषां चौरस्तस्मै, गा इन्द्रियाणि पान्तीति गोपा जीवास्तेषां वधूटयोऽविद्यास्ता एव दुकूलानि स्वरूपाच्छादकत्वात् तेषां चौरस्तस्मा इति वा, कृष्णो यथा गोपीदुकूलचौर्यं कृतवान् तथा मदीयाज्ञानचौर्यमपि करोतित्यभिप्रायः। संसार एव महीरुहो वृक्षस्तस्य बीजाय यः संसारस्यैवोत्पादकस्तस्य मदीयमनोरथसम्पादने किमायासः इत्यभिप्रायः। दुःखं कृन्ततीति कृष्णस्तस्मै दुःखापहर्त्रे, नम इति। अत्र 'उक्तिर्विशेषणैः साभिप्रायैः परिकरो मतः' इति लक्षणलक्षितः परिकरालङ्कारो बोध्यः। अत्रापि समाप्तपुनरात्तवरङ्गासमाधाने पूर्ववद्वोध्ये इति।

न मङ्गलं निष्फलं फलविशेषशून्यत्वाज्जलताडनवदित्यनुमानेन मङ्गलस्य निष्फलत्वात्तदाचरणमयुक्तम् ?

न च—फलविशेषशून्यत्वादित्यस्य यत्किञ्चित्फलविशेषशून्यत्वादित्यर्थो यावत्फलविशेषशून्यत्वादित्यर्थो वा ? नाद्यः, पुत्रेष्टियागादावपि यत्किञ्चित्स्वर्गादिरूपफलविशेष-

इत्थं च यत्र मङ्गलं न दृश्यते तत्रापि जन्मान्तरीयं तत्कल्प्यते । यत्र च सत्यपि मङ्गले समाप्तिर्न दृश्यते तत्र बलवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्यम्।

मुक्तावलीमयूखः।

शून्यत्वसत्त्वेन निष्फलत्वरूपसाध्यस्य च तत्रासत्त्वेन साध्याभाववद्वृत्तितया हेतोर्व्यभिचारित्वापत्तेः। न द्वितीयः, प्राचीनतार्किकैः समाप्तिफलकत्वस्य नव्यतार्किकैर्विघ्नध्वंसफलकत्वस्य च मङ्गले स्वीकारेण यावत्फलविशेषशून्यत्वरूपहेतोः पक्षे मङ्गलेऽसत्त्वेन पक्षतावच्छेदकावच्छेदेन हेतोरसिद्धिः स्वरूपासिद्धिरिति लक्षणलक्षितस्वरूपासिद्धत्वापत्तेरिति मङ्गले उक्तहेतुना निष्फलत्वानुमानासम्भव—इति वाच्यम् , व्यतिरेकव्यभिचारज्ञानस्य कारणताग्रहविरोधितया नास्तिकादीनां प्रत्यूहे मङ्गलरूपकारणाभावेऽपि समाप्तिरूपस्य विघ्नध्वंसरूपस्य वा फलस्य दर्शनेन कारणाभावे कार्योत्पादरूपव्यतिरेकव्यभिचारसद्भावेन समाप्तेर्विघ्नध्वंसस्य वा मङ्गलफलत्वानुपपत्त्या फलान्तरस्य तार्किकैरप्यनङ्गीकृततया यावत्फलविशेषशून्यत्वरूपहेतोः स्वरूपासिद्धत्वाभावेन मङ्गले निष्फलत्वसिद्धेरिति चेद्?

न, मङ्गलं सफलं विषयत्वात् कृष्यादिवदध्ययनवद्वेत्यनुमानेन मङ्गले सफलत्वसिद्धया तदाचरणस्यावश्यकत्वात् ।

न च विषयत्वरूपहेतोः केवलान्वयितया ज्ञानविषयसुखेऽपि सत्त्वेन तस्य च फलरूपतया सफलत्वाभावेन व्यभिचारित्वमिति वाच्यम् ।

विषयत्वादित्यत्राचारविषयत्वादिति कथनेनाचारविषयत्वस्य सुखेऽसत्त्वेन व्यभिचारित्वाभावात् । आचारत्वात्र कृतिः, विषयत्वश्रुतेः । रागेच्छाद्वेषकृतय एव सविषयकाः । तत्र व्यापारसामान्यार्थकस्याङ्पूर्वचरतेर्व्यापारविशेषकृतिपरत्वमेवोचितं न तु व्यापारभिन्नज्ञानादिपरत्वम् इति बोध्यम् ।

न च कृतिविषयत्वस्य हेतुत्वविवक्षणेऽपि सुखोद्देशेन धर्मं करोतीतिप्रतीत्योद्देश्यतया कृतिविषयत्वस्य सुखेऽपि सत्त्वेन व्यभिचारित्वतादवस्थ्यं हेतोरिति वाच्यम् ।

विधेयतया कृतिविषयत्वस्य हेतुत्वेनादोषात् ।

न चैवमपि सफलत्वरूपसाध्याभाववति चैत्यवन्दने नास्तिककृतिविषयत्वस्य सत्त्वेन व्यभिचारतादवस्थ्यमिति वाच्यम् ।

शिष्टकृतिविषयत्वस्य हेतुत्वविवक्षणेनादोषात् । शिष्टत्वं च वेदप्रामाण्याभ्युपगन्तृत्वम् । तच्च नास्तिके नास्तीति तदीयकृतिविषयत्वस्य चैत्यवन्दने सत्त्वेऽपि शिष्टकृतिविषयत्वस्याभावेन व्यभिचाराभावात् ।

न च व्युत्क्रमेण कृते यागे सफलत्वस्याभावात् शिष्टकृतिविषयत्वस्य च सत्त्वाद् व्यभिचारतादवस्थ्यमिति वाच्यम् ।

फलसाधनतांशे भ्रमरहितत्वरूपशिष्टत्वस्य हेतुकुक्षौ प्रवेशेन व्यभिचाराभावात् ।

(१) न च सफलत्वं प्रवृत्त्युपयुक्तबलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वम् । तच्च

(१) प्रवृत्तिं प्रति कृतिसाध्यत्वप्रकारकं ज्ञानम् इष्टसाधनत्वप्रकारकं ज्ञानं बलवदनिष्टाननुबन्धित्वप्रकारकं ज्ञानं च कारणम् । तेन सुमेरुभङ्गादरणे जलताडने मधुविषसम्पृक्तान्नभोजने च न प्रवृत्तिरिति बोध्यम् ।

प्रचुरस्यास्यैव बलवत्तरविघ्ननिराकरणकारणत्वम् । विघ्नध्वंसस्तु मङ्गलस्य द्वारमित्याहुः प्राञ्चः ॥

मुक्तावलीमयूखः ।

श्येनयागे नास्ति तस्य बलवदनिष्टजनकसाधनत्वात् शिष्टकृतिविषयत्वं चास्तीति पुनरपि व्यभिचार इति वाच्यम् ।

अविगीतशिष्टाचारविषयत्वस्य हेतुत्वविवक्षणेनादोषात् । अविगीतत्वं च बलवदनिष्टानुबन्धित्वम् । तच्च श्येनयागीयकृतौ नास्तीत्याशयात् (१) । एवञ्च मङ्गलं सफलम् अविगीतशिष्टाचारविषयत्वादित्यनुमानेन मङ्गले सफलत्वसिद्धिः ।

ततश्च फलविशेषजिज्ञासायां दृष्टफलकत्वसम्भवेऽदृष्टफलकल्पनाया अनौचित्येन मङ्गलं समाप्तिफलकं समाप्यन्याफलकत्वे सति सफलत्वादित्यनुमानेन समाप्तिफलकत्वसिद्धिः ।

न च विश्वजिता यजेतेत्यत्र फलविशेषस्याश्रवणेन किमस्य यागस्य फलम् इति जिज्ञासायां सर्वाभिलाषास्पदत्वाद् स्वर्ग एव विश्वजिद्यागफलमित्यर्थकेन 'स स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वात्' इति सूत्रेण स्वर्ग एव फलमिति मीमांसायां सिद्धान्तितं, तद्वदिहापि स्वर्ग एव फलमस्तु । ततश्च ग्रन्थनिर्माणवेलायां मङ्गलाचरणमयुक्तमेवेति वाच्यम् ।

विश्वजिता यजेतेत्यत्र कस्यापि फलस्योपस्थितेरभावेन तत्र स्वर्गफलकत्वाङ्गीकारेऽपि प्रकृते हे ईश्वर ! अयं ग्रन्थः समाप्यतामिति ग्रन्थकर्तुः प्रार्थनयोपस्थितसमाप्तिफलकत्वत्यागे बीजाभावात् ।

ननु नास्तिकग्रन्थे मङ्गलाभावेऽपि समाप्तेर्दर्शनेन व्यतिरेकव्यभिचारग्रहेण कारणताग्रहप्रतिबन्धेन समाप्तेर्न फलत्वमिति चेद् ?

न, नास्तिको जन्मान्तरीयमङ्गलवान् ग्रन्थसमाप्तेरित्यनुमानेन तत्राऽपि मङ्गलसत्त्वे समाप्तेर्दर्शनेन व्यतिरेकव्यभिचाराभावात् ।

ननु किरणावल्यादौ मङ्गलसत्त्वेऽपि समाप्तिरूपकार्यादर्शनेन कारणसत्त्वे कार्यानुत्पादरूपान्वयव्यभिचारेण मङ्गले समाप्तिकारणत्वसंशयोऽन्वयव्यभिचारज्ञानस्य कारणतासंशयिकत्वादिति चेद् ?

न, प्रचुरविघ्ननाशं प्रति प्रचुरमङ्गलस्य कारणतया तत्र प्रचुरमङ्गलरूपकारणाभावेनान्वयव्यभिचाराभावात् ।

ननु मङ्गले प्राचुर्यं विघ्नसमसंख्याकत्वरूपं विघ्नाधिकसंख्याकत्वरूपं वा ? नाद्यः, विघ्नाधिकसंख्याकमङ्गलस्थले समाप्त्यभावप्रसङ्गात् । न द्वितीयः, विघ्नसमसंख्याकमङ्गलस्थले समाप्त्यभावप्रसङ्गादिति चेद् ?

अत्रोच्यते—बलवत्तरविघ्ननाशं प्रति बलवत्तरमङ्गलस्य कारणतेत्येवं कार्यकारणभावस्वीकारेणादोषात् । मङ्गले बलवत्तरत्वं धर्मविशेषः समाप्यनन्तरमवेद्यः ।

ननु पूर्वं समाप्तेर्मङ्गलफलत्वमित्युक्तं तथाच विघ्नध्वंसो भवतु मा वा, परन्तु

(१) जलताडनेऽतिव्याप्तिवारणायालौकिकेत्यपि हेतुदले निवेश्यमेव । अत एव बहुषु पुस्तकेषु अलौकिकाविगीतेत्यादिरतत्पदघटितः पाठो दृश्यते । वस्तुतस्तु जलताडनं 'न कुर्याद्विष्फलं कर्मे'ति वचनान्निषिद्धमिति न अविगीताशिष्टाचारविषय इति अलौकिकेति निवेशस्य नोपयोगः ।

नव्यास्तु मङ्गलस्य विघ्नध्वंस एव फलं समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापात्।

न च स्वतःसिद्धविघ्नविरहवता कृतस्य मङ्गलस्य निष्फलत्वापत्तिरिति वाच्यम्,

इष्टापत्तेः। विघ्नशङ्कया तदाचरणात् तथैव शिष्टाचारात्।

न च तस्य निष्फलत्वेऽपि न तद्बोधकवेदाप्रामाण्यापत्तिरिति वाच्यम्,

सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात्। अत एव पापक्षयेण कृतस्य प्रायश्चित्तस्य निष्फलत्वेऽपि न तद्बोधकवेदाप्रामाण्यम्।

मङ्गलं च विघ्नध्वंसविशेषे कारणं विघ्नध्वंसविशेषे च विनायकस्तवपाठादि।

मुक्तावलीमयूखः।

समाप्तिः किं न स्यादिति चेद्?

न, विघ्नध्वंसद्वारैव मङ्गले समाप्तिजननस्वीकारेणादोषात्। द्वारत्वं च तज्जन्यत्वेसति तज्जन्यजनकत्वम्। विघ्नध्वंसो हि मङ्गलजन्यः मङ्गलजन्यसमाप्तिजनकश्चेति भवति समन्वयः।

इति प्राचीनमतम्।

ननु यत्र भोगादिना विघ्नध्वंसस्तत्रापि समाप्तिः, यत्र च मङ्गलेन विघ्नध्वंसस्तत्रापि समाप्तिरिति; अवश्यकल्पनियतपूर्ववर्तित्ववता विघ्नध्वंसेनैव मङ्गलस्थलीयसमाप्युपपत्तेः 'नियतावश्यकपूर्वभाविव्यतिरिक्तमन्यथासिद्धम्' इति लक्षणलक्षितान्यथासिद्धित्वेन मङ्गलस्य समाप्तिं प्रति न कारणता।

न च व्यापारेण व्यापारिणो नान्यथासिद्धिः। अत एव सोमेन यजेतेत्यादौ चिरविनष्टस्य यागस्य स्वर्गसाधनत्वोपपत्त्यर्थं कल्पितेनापूर्वेण स्वर्गं प्रति यागस्यान्यथासिद्धत्वाभावात् सोमेनेति करणतृतीयासिद्धिरिति वाच्यम्।

यत्र व्यापारिणः प्रमायबोधितकारणतानिर्वाहाय व्यापारस्य कारणत्वं कल्प्यते तत्रैव व्यापारेण व्यापारिणो नान्यथासिद्धत्वम्। अत एव काशीमरणस्य तत्त्वज्ञानेन मुक्तावन्यथासिद्धत्वात् काशीमरणान्मुक्तिरित्यत्र हेतुपञ्चम्यनुपपत्त्या प्रयोजकत्वपरा पञ्चमीति समर्थितम्। तथा च प्रकृते मङ्गलस्य समाप्तिकरणत्वानभ्युपगमेऽपि प्रतिबन्धकाभावस्य कार्यमात्रे हेतुत्वस्यौत्सर्गिकतया विघ्नध्वंसस्य कारणत्वं सिद्धमेवेति मङ्गलेऽन्यथासिद्धत्वस्य दुष्परिहारत्वादित्यरुचेराह—नव्यास्त्विति।

ननु शिष्टाचारानुमितया विघ्नध्वंसकामो मङ्गलमाचरेदिति स्मृत्या मङ्गलस्य, 'सर्वे विघ्नाः शमं यान्ति गणेशस्तवपाठतः' इति प्रत्यक्षस्मृत्या विनायकस्तवपाठस्य, च कारणत्वावगमेन विनायकस्तवपाठरूपकारणाभावे मङ्गलेन, मङ्गलरूपकारणाभावे विनायकस्तवपाठेन विघ्नध्वंसस्य जननाद् व्यतिरेकव्यभिचारेण विघ्नध्वंसं प्रति मङ्गलस्य विनायकस्तवपाठस्य वा कारणताऽभ्युपगन्तुमनर्हा?

न च विनायकस्तवपाठोऽपि मङ्गलमेवेति वाच्यम्।

पाठस्य कण्ठताल्वाद्यभिघातरूपत्वेन मङ्गलस्य च शब्दरूपत्वेन तयोरैक्यासम्भवादित्यत आह—मङ्गलं चेति।

क्वचिच्च विघ्नात्यन्ताभावः एव समाप्तिसाधनं प्रतिबन्धकसंसर्गाभावस्यैव कार्यजनकत्वात् ।

इत्थं च नास्तिकादीनां ग्रन्थेषु जन्मान्तरीयमङ्गलजन्यदुरितध्वंसः, स्वतः सिद्धविघ्नात्यन्ताभावो वाऽस्तीति न व्यभिचार इत्याहुः ।

मुक्तावलीमयूखः ।

अयं भावः—मङ्गलाव्यवहितोत्तरक्षणजायमानविघ्नध्वंसत्वावच्छिन्नं प्रति मङ्गलस्य विनायकस्तवपाठाव्यवहितोत्तरक्षणजायमानविघ्नध्वंसत्वावच्छिन्नं प्रति विनायकस्तवपाठस्य—कारणतास्वीकारेण व्यतिरेकव्यभिचाराभाव इति ।

ननु यत्र विघ्नो नास्ति तत्र समाप्तिर्भवति परन्तु ध्वंसं प्रति प्रतियोगिनः कारणतया प्रतियोगिनो विघ्नत्वासत्त्वेन तद्ध्वंसस्याप्यभावाद् विघ्नध्वंसरूपकारणाभावेन व्यतिरेकव्यभिचार इत्यत आह—क्वचिच्चेति ।

क्वचिच्च विघ्नध्वंसेन क्वचिच्च विघ्नात्यन्ताभावेन समाप्तिर्भवतीत्यर्थः ।

व्यतिरेकव्यभिचारवारणं तु विघ्नध्वंसाव्यवहितोत्तरक्षणजायमानसमाप्तिं प्रति विघ्नध्वंसस्य विघ्नात्यन्ताभावाव्यवहितोत्तरक्षणजायमानसमाप्तिं प्रति विघ्नात्यन्ताभावस्य कारणतेति रीत्या बोध्यम् ।

ननु विघ्नसंसर्गाभावत्वेन विघ्नध्वंसात्यन्ताभावयोरनुगमं कृत्वा समाप्तिं प्रति विघ्नसंसर्गाभावः कारणमिति कार्यकारणभावस्वीकारेण व्यतिरेकव्यभिचारवारणसम्भवादव्यवहितोत्तरत्वनिवेशेन तद्वारणमनुचितं गौरवादिति चेद् ?

न, यस्मिन्नात्मनि समवायेन विघ्नो वर्तते तत्र संयोगेन विघ्नो नास्तीति प्रतीतिसाक्षिकविघ्नसंसर्गाभावत्वेन समाधिवारणाय समवायसम्बन्धावच्छिन्नविघ्नत्वावच्छिन्नप्रतियोगिताकाभावत्वेन कारणता वाच्या । तथा च ध्वंसीयप्रतियोगितायाः संसर्गेण धर्मेण चानवच्छिन्नतयैकरूपेणानुगमासम्भवात् पृथगेव विघ्नध्वंसात्यन्ताभावयोः कारणता वाच्येत्याशयात् ।

ननु ध्वंसीयप्रतियोगितायां संसर्गावच्छिन्नत्वं किमिति नाङ्गीक्रियत इति चेद् ?

उच्यते, समवायेन घटाधिकरणे संयोगेन घटो नास्ति, संयोगेन घटाधिकरणे समवायेन घटो नास्तीति प्रतीत्योपलक्षण्योपपत्तेरत्यन्ताभावीयप्रतियोगितायां सम्बन्धावच्छिन्नत्वमङ्गीक्रियते, ध्वंसे तादृशबुद्ध्यसंभवेन नाङ्गीक्रियत इति ।

वस्तुतस्तु—विनष्टघटाधिकरणेऽपि समवायसम्बन्धावच्छिन्नविघ्नत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावो वर्तते ध्वंसात्यन्ताभावयोर्विशेषे मानाभावात् । ततश्च समाप्तिं प्रति विघ्नात्यन्ताभावत्वेनैव कारणता न तु विघ्नध्वंसत्वेनापीति नाव्यवहितोत्तरत्वनिवेशस्योपयोग इति ध्येयम् ।

नव्यमते व्यतिरेकव्यभिचारं परिहरति—इत्थं चेति ।

ननु ध्वंसप्रागभावयोः स्वप्रतियोगिसमवायिकारणवृत्तित्वनियमः । तथाच विघ्नध्वंसस्य प्रतियोगी विघ्नः पापं, तस्य समवायिकारणमात्मा, तत्र विघ्नध्वंसः स्वरूपेण वर्तते चरमवर्णध्वंसरूपसमाप्तेः प्रतियोगी चरमवर्णः, तस्य समवायिकारणमाकाशं, तत्र

संसारेति। संसार एव महीरुहो वृक्षस्तस्य बीजाय, निमित्तकारणायेत्यर्थः। एतेन ईश्वरे प्रमाणमपि दर्शितं भवति। तथाहि यथा घटादिकार्यं कर्तृजन्यं तथा क्षित्यङ्कुरादिकमपि।

न च तत्कर्तृत्वमस्मदादीनां सम्भवतीत्यतस्तत्कर्तृत्वेनेश्वरसिद्धिः।

मुक्तावलीमयूखः।

स्वरूपेण समाप्तिर्वर्तत इति समाप्तिविध्वंसयोरेकाधिकरणवृत्तित्वाभावेन कथं कार्यकारणभाव इति चेद्?

उच्यते, विध्वंसः स्वरूपेणात्मनि वर्तते स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्त्वसम्बन्धेन समाप्तिरपि तत्र वर्तत इत्येव कार्यकारणयोरेकाधिकरणवृत्तित्वनिर्वाह इति।

इति गङ्गेशवादे नव्यमतम्।

ननु बीजनाशानन्तरं बीजावयवैरङ्कुरोत्पादाद्बीजावयवा एव वृक्षस्य समवायिकारणम्। तथाच बीजाये युक्त्येश्वरावयवा जगतःकारणमिति प्रतीयते। तच्चायुक्तम्, ईश्वरस्य निरवयवत्वादतो बीजायेत्यस्यार्थमाह-निमित्तकारणायेत्यर्थ इति।

नन्वीश्वरे प्रमाणाभावात्तन्मस्करणमयुक्तम्। तथाहि, प्रत्यक्षं द्विविधं—बाह्यं मानसं च। तत्र बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षं उद्भूतरूपस्य कारणत्वादीश्वरे रूपाभावान्न बाह्यप्रत्यक्षप्रसरः, नवा मानसप्रत्यक्षप्रसरः परात्मनः परेण मनसा प्रत्यक्षवारणायात्ममानसं प्रति परात्मव्यावृत्तविजातीयमनःसंयोगत्वेन कारणताऽभ्युपगमात्। नाप्यनुमानं प्रमाणम्, ईश्वरस्याप्रत्यक्षतया तस्य केनचिल्लिङ्गेन सहचारदर्शनाभावेन व्याप्तिग्रहाभावात्। न चोपमानं मानमीश्वरतुल्यस्य कस्यचिदभावेन सादृश्यज्ञानासत्त्वात्। नापि शब्दः प्रमाणं श्रुतीनामीश्वरोच्चरितत्वेनैव प्रामाण्यस्य वक्तव्यतया तत्रेश्वर एव संदेहेन श्रुतिप्रामाण्यस्यापि संदिग्धत्वादिति चतुर्विधप्रमाणागोचर ईश्वरः कथं नमस्कार्यतामाभिगिति चेद्।

न, कार्यं प्रति कृतेःकारणतास्वीकारेण क्षितिः कृतिजन्या कार्यत्वाद्घटवदिति यनुमानेन क्षितेः कृतिजन्यत्वसिद्धौ क्षितिजनिका कृतिः यत्किंचिदात्मसमवेता कृतित्वादस्मदादिकृतिवदित्यनुमानेन तादृशकृत्याश्रयीभूतः कश्चिदात्मा सिध्यति। स चास्मदादिर्न सम्भवतीतीश्वरसिद्धिरित्यदोषात्।

ननु क्षितिः कृतिजन्या कार्यत्वादित्यनेन पक्षताऽवच्छेदकावच्छेदेन पक्षताऽवच्छेदकसामानाधिकरण्येन वा कृतिजन्यत्वं साध्यते? नाद्यः, पक्षताऽवच्छेदकं क्षितित्वं तदवच्छेदेन कृतिजन्यत्वसाधने परमाणौ बाधात्। न द्वितीयः, पक्षताऽवच्छेदकं क्षितित्वं तत्सामानाधिकरण्येनकृतिजन्यत्वसाधने घटादौ सिद्धसाधनापत्तेरिति चेद्? इत एवाग्रेराहाङ्कुरेति।

तथा चाङ्कुरः कृतिजन्यः कार्यत्वादित्यनुमानेनेष्टसिद्धिः। अत्र चाङ्कुरत्वावच्छेदेन कृतिजन्यत्वसाधने न कापि बाधो नित्यस्याङ्कुरस्याभावात्। अङ्कुरत्वसामानाधिकरण्येन वा कृतिजन्यत्वसाधने न कापि सिद्धसाधनं काप्यङ्कुरे जीवीयकृतिजन्यत्वासिद्धेरितिभावः।

न चाङ्कुरः कृतिजन्यत्वाभाववान् शरीराजन्यत्वादाकाशवदित्यनुमानेन सत्प्रतिपक्ष इति वाच्यम्,

व्यभिचारशङ्कानिवर्तकतर्कशून्यत्वेन स्वदुक्तानुमानासम्भवेन सत्प्रतिपक्षितत्वाभावात्।

न च शरीराजन्यत्वेन कर्यजन्यत्वसाधकेन सत्प्रतिपक्ष इति वाच्यम्।
अप्रयोजकत्वात्। मम तु कर्तृत्वेन कार्यत्वेन कार्यकारणभाव एव अनुकूलस्तर्कः। "द्यावाभूमी जनयन्देव एको विश्वस्य कर्ता भुवनस्य गोप्ता" इत्यादय आगमा अप्यनुसन्धेया ॥ १ ॥

मुक्तावलीमयूखः।

मम तु यदि कार्यत्वं कृतिजन्यत्वव्यभिचारि स्यात्तर्हि कृतिजन्यत्वावच्छेदकं न स्यादित्येवानुकूलस्तर्कः।

ननु प्रकृतानुकूलतर्के किम्मानमिति चेत्? तर्हि कृतित्वेन कार्यत्वेन कार्यकारणभाव एवेति बोध्यम्।

अत्रेदमवधेयम्—कार्यं प्रति कर्ता कारणमिति स्वीकारे कर्तृत्वं कारणताऽवच्छेदकम्! तच्च कृतिमत्त्वं, कृतिमत्त्वं च कृतिरेव, सा च नानेति गौरवम्। अतः कार्यं प्रति कृतिः कारणम्। तथाच कृतित्वं कारणताऽवच्छेदकं, तच्च नानाकृतिष्वेकमिति लाघवम्। मूले कर्तृजन्यमित्यत्र कर्तृत्वेन कार्यत्वेन कार्यकारणभाव इत्यत्र च तृजर्थस्याविवक्षितत्वेन कर्तृपदं कृतिपरमित्यलम्।

ननु कृतित्वेन कार्यत्वेन कार्यं कारणभावे मानाभावेन तदुक्तानुमानेऽप्यनुकूलतर्काभावः

न चान्वयव्यतिरेकावेव मानमिति वाच्यम्,

कुलालकृतिसत्त्वे घटः कुलालकृत्यभावे घटाभाव इति विशिष्यैवान्वयव्यतिरेकग्रहेण विशिष्यैव कुलालत्वेन घटत्वेन कार्यकारणभावग्रहात् सामान्यतः कृतित्वेन कार्यत्वेन कार्यकारणभावग्रहे मानाभावात्।

न च विशेषतः कार्यकारणभावग्रहे 'यद्विशेषयोः कार्यकारणभावस्तत्सामान्ययोरपीति' न्याय एव सामान्यतः कार्यकारणभावे माननिति वाच्यम्,

उक्तन्याये मानाभावेन सामान्यतः कार्यकारणभावासिद्धेः।

न च कार्याभावस्य कारणाभावप्रयोज्यतानियमेन कार्यं प्रति कृतित्वेन कारणताऽनङ्गीकारे कार्याभावः किंप्रयोज्य इति प्रश्ने तत्तत्कृत्यभावकूटप्रयोज्य इत्युत्तरकरणे गौरवभिया सामान्यतः कार्यकारणभावस्यावश्यमङ्गीकर्तव्यम् तथा च कार्याभावः किंप्रयोज्य इति प्रश्ने कृत्यभावप्रयोज्य इत्युत्तरकरणे लाघवमित्येव तन्न्यायबीजमिति वाच्यम्,

कार्याभावः कारणाभावप्रयोज्य इति नियमस्यास्वीकारेण स्वरूपसम्बन्धरूपप्रयोजकत्वं प्रतीत्यनुरोधेन लघ्वनतिप्रसक्तधर्मावच्छेदेन कल्प्यत इति नियमस्य स्वीकारे च कृतित्वेन कार्यत्वेन कार्यकारणभावानङ्गीकारेऽपि कार्याभावः कृत्यभावप्रयोज्य इत्युत्तरस्य वक्तुं शक्यतया यद्विशेषयोरिति न्याये मानाभावादिति चेत्?

अत्रोच्यते—कुलालकृतित्वेन घटत्वेन कार्यकारणभावस्वीकारेऽपि ध्वंसप्रतियोगिनो घटः कुलालकृतिजन्यो घटत्वादित्यनुमानेनेश्वरसिद्धेः।

न चेश्वरस्य कुलालत्वापत्तिः, नमः कुलालेभ्यो नमः कर्मारेभ्य इति श्रुत्या तस्येष्टत्वावगमात्।

एवं चानुमानेनेश्वरसिद्धौ तदुच्चारिता द्यावाभूमी जनयन्निति श्रुतिरपीश्वरसद्भावे प्रमाणमिति दिक्। इतीश्वरवादः ॥ २ ॥

पदार्थान्विभजते—

द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।
समवायस्तथाऽभावः पदार्थाः सप्त कीर्तिताः ॥ २ ॥

अत्र सप्तमस्याभावत्वकथनादेव षण्णां भावत्वं प्राप्तं तेन भावत्वेन पृथगुपन्यासो न कृतः । एते च पदार्था वैशेषिके प्रसिद्धा नैयायिकानामप्यविरुद्धाः । प्रतिपादितं चैवमेव भाष्ये । अत एवोपमानचिन्तामणौ सप्तपदार्थमिश्रतया शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वमाशङ्कितम् ।

ननु कथमेत एव पदार्थाः शक्तिसादृश्यादीनामप्यतिरिक्तपदार्थत्वात् ?

मुक्तावलीमयूखः ।

द्रव्यं गुणस्तथेति । कर्मणः संयोगेऽन्तर्भाव इति केचित् । तद्दूषणाय तथेत्युक्तम् यथा गुणः पदार्थस्तथा कर्मापीति भावः । एवमभावस्याधिकरणात्मकत्वं न तु पदार्थान्तरत्वमिति प्रभाकरमतदूषणाय समवायस्तथाऽभावः इत्यत्रापि तथाशब्द उक्त इति बोध्यम् ।

ननु प्राचां ग्रन्थेषु पदार्थो द्विविधः—भावोऽभावश्चेत्युक्तं तद्वदिहापि कुतो नोच्यतेऽत्र आह—सप्तमस्याभावत्वकथनादिति ।

ननु सप्तमस्याभावत्वकथनेन कथं तदितरेषां भावत्वं प्राप्तम् ? न हि कस्यचिद् ब्राह्मणत्वे प्रतिपादिते तदितरस्याब्राह्मणत्वं प्रतिपादितं भवतीति चेद् ?

उच्यते, स्वसमभिव्याहृतपदार्थताऽवच्छेदकव्याप्यमिथोविरुद्धयावद्धर्मप्रकारकबोधानुकूलव्यापारस्यैव विभागपदार्थतया प्रकृते सप्तमस्याभावत्वे तदन्यस्य द्रव्यादेरप्यभावत्वे पदार्थान् विभजत इति प्रयोगानुपपत्तिरतस्तदन्यस्यार्थाद् भावत्वं प्राप्तमित्याशयः ।

समन्वयस्तु—स्वं विपूर्वकभजधातुः, तत्समभिव्याहृतं पदं पदार्थपदं, तदर्थताऽवच्छेदकं पदार्थत्वं, तद्व्याप्यं मिथो विरुद्धं च द्रव्यत्वादिकं, तत्प्रकारकबोधानुकूलो व्यापारः द्रव्यं गुणः कर्मेत्यादिशब्दप्रयोगरूपः ।

एवं द्रव्याणि विभजत इत्यत्रापि बोध्यम् ।

व्याप्येत्यस्यानुपादाने द्रव्याणि विभजत इति प्रतिज्ञाय गुणः पृथिवी जलं तेज इत्यादिशब्दप्रयोगस्यापि विभागत्वं स्यात् । मिथोविरुद्धेत्यस्यानुपादाने घटः पृथिवीत्यादिशब्दप्रयोगस्यापि तत्त्वं स्यात् । यावदित्यस्यानुपादाने पृथिवी जलं तेज इत्येतन्मात्रशब्दप्रयोगस्यापि विभागत्वं स्यादिति बोध्यम् ।

ननु यदि दाहं प्रति वह्नेरेव कारणता स्यात् तर्हि(१)प्रतिबन्धकचन्द्रकान्तमणिसमवधाने दाहः किं न जायतेऽतः कारणान्तरमपि कल्पनीयम् । तच्च शक्तिरूपम् । सा च शक्तिर्द्विधा—सहजा शक्तिराधेयशक्तिः पदशक्तिश्चेति । आद्या वह्न्यादिनिष्ठा । प्रोक्षणादिजन्या व्रीह्यादिनिष्ठा शक्तिर्द्वितीया । तत्तदर्थनिरूपिता तत्तत्पदनिष्ठा शक्तिस्तृतीया । तथाच दाहं प्रति दाहानुकूलशक्तेर्वह्नेश्च कारणतेति स्वीकारेण प्रतिबन्धकसमवधाने वह्निनिष्ठा दाहानुकूला शक्तिर्नश्यतीति शक्तिरूपसहकारिकारणविरहादेव दाहो न जायते । प्र-

(१) कारणीभूताभावप्रतियोगित्वं प्रतिबन्धकत्वम् ।

तथाहि, मण्यादिसमवहितेन वह्निना दाहो न जन्यते, तच्छून्येन तु जन्यते। तत्र मण्यादिना वह्नौ दाहानुकूला शक्तिर्नाश्यते, उत्तेजकेन मण्याद्यपसारणेन च जन्यत इति कल्प्यते।

एवं सादृश्यमप्यतिरिक्तः पदार्थः, तद्धि न षट्सु भावेष्वन्तर्भवति सामान्येऽपि सत्त्वात्, यथा गोत्वं नित्यं तथाऽश्वत्वमपीति सादृश्यप्रतीतेः, नाप्यभावे सत्त्वेन प्रतीयमानत्वादिति चेद् ?

मुक्तावलीमयूखः।

तिबन्धकापसारणे उत्तेजकसूर्यकान्तमणिसमवधाने वा शक्तिरुत्पद्यत इति दाह उपपद्यते। सा शक्तिर्न द्रव्यगुणकर्मान्यतमरूपा गुणादिवृत्तित्वाद्, नापि सामान्याद्यन्यतमरूपा उत्पत्तिमत्त्वे सति विनाशित्वात्, प्रागभावध्वंसयोर्व्यभिचारवारणाय क्रमेण दलद्वयम्; इति शक्तेः कल्पितपदार्थेष्वनन्तर्भावात्पदार्थः सप्तविध इति कथनमसङ्गतमिति चेद् ?

न प्रतिबन्धकमण्यभावविशिष्टवह्नेरेव दाहं प्रति कारणताऽङ्गीकारेण प्रतिबन्धकसमवधाने प्रतिबन्धकमण्यभावविशिष्टवह्निरूपकारणाभावादेव दाहाभावोपपत्तौ वह्नौ शक्तिकल्पने मानाभावेन शक्तेरतिरिक्तत्वादिशङ्काया दूरापास्तत्वात्।

न च विनिगमनाविरहेण विशेषणविशेष्यभावव्यत्यासेन मण्यभावविशिष्टवह्नेर्वह्निविशिष्टमण्यभावस्य वा कारणताऽऽपत्त्या मण्यभावविशिष्टवह्नित्वस्य वह्निविशिष्टमण्यभावत्वस्य च कारणताऽवच्छेदकत्वकल्पने गौरवं, शक्तित्वस्य वह्नित्वस्य च तत्कल्पने लाघवमिति वाच्यम्।

ममापि दाहं प्रति मण्यभावो वह्निश्च कारणमिति स्वातन्त्र्येण कार्यकारणभावस्वीकारेण गौरवाभावात्।

(१) न चोत्तेजकसत्त्वे प्रतिबन्धकसद्भावे कथं दाह इति वाच्यम्,

उत्तेजकाभावविशिष्टमण्यभावस्य हेतुताऽङ्गीकारेण दोषाभावात्। तथाहि, विशिष्टाभावस्त्रिधा—विशेषणाभावप्रयोज्यः विशेष्याभावप्रयोज्यः उभयाभावप्रयोज्यश्चेति। अयोध्यास्थे ब्राह्मणे काशीस्थत्वरूपविशेषणाभावप्रयोज्यः काशीस्थत्वविशिष्टब्राह्मणत्वाभावः। काशीस्थशूद्रे काशीस्थत्वरूपविशेषणस्य सत्त्वेऽपि ब्राह्मणत्वरूपविशेष्यस्याभावाद् विशेष्याभावप्रयुक्तो विशिष्टाभावः। अयोध्यास्थे शूद्रे काशीस्थत्वरूपविशेषणस्य ब्राह्मणत्वरूपविशेष्यस्य चाभावाद् उभयाभावप्रयुक्तः। एवं प्रकृते उत्तेजकप्रतिबन्धकवह्नीनां समवधाने उत्तेजकाभावरूपविशेषणासत्त्वेन विशेषणाभावप्रयुक्तो विशिष्टाभावः, वह्निमात्रसत्त्वे उत्तेजकाभावरूपविशेषणरूपासत्त्वेऽपि मणिरूपविशेष्यस्याभावेन विशेष्याभावप्रयुक्तो विशिष्टाभावः, उत्तेजकस्य वह्नेश्च सत्त्वे उत्तेजकाभावरूपविशेषणस्य मणिरूपविशेष्यस्याभावादुभयाभावप्रयुक्तो विशिष्टाभाव इति त्रिषु स्थलेषु दाहः। यत्र प्रतिबन्धकवह्नौ तत्रोत्तेजकाभावविशिष्टमणेरेव सद्भावान्न दाहः। किञ्च शक्तेरनन्तावयवध्वंसादिकल्पने गौरवं च स्यादिति दिक्।

---

(१) प्रतिबन्धकसमानकालीनकार्यजनकत्वमुत्तेजकत्वम्।

न, मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रति स्वातन्त्र्येण मण्यभावादेरेव वा हेतुत्वं कल्प्यते। अनेनैव सामग्र्यस्येऽनन्तशक्तितत्प्रागभावध्वंसकल्पनाऽनौचित्यात्।

न चोत्तेजके सति प्रतिबन्धकसद्भावेऽपि कथं दाह इति वाच्यम्,

उत्तेजकाभावविशिष्टमण्यभावस्य हेतुत्वात्।

सादृश्यमपि न पदार्थान्तरं किन्तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। यथा चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्त्वं मुखे चन्द्रसादृश्यमिति ॥८॥

मुक्तावलीमयूखः।

शक्तिवादिनां मीमांसकानां त्विदमाकूतम्—वह्निं प्रति तृणस्यारणेर्मणेश्च कारणतेति तृणाभावे मणिना मण्यभावेऽरणिना तदभावे तृणेन च वह्नेर्जननाद् व्यभिचारेण कस्यापि कारणत्वं न स्यादिति तत्तद्व्यवहितोत्तरत्वमन्तर्भाव्य कार्यकारणभावो वाच्यस्तार्किकैः, अस्माकं तु वह्न्यनुकूलशक्तिमत्त्वेनानुगमसम्भवान्न व्यभिचारो न वा गौरवम्। किं च शून्यस्य अभावस्य कुत्रापि कारणत्वानङ्गीकारेण दाहं प्रति मण्यभावस्य कारणत्वानुपपत्तिः। किं चास्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छायाः पदशक्तित्वे पदस्य गुणत्वेन गुणे गुणानङ्गीकारेण पदनिष्ठत्वानुपपत्तिः। कारणे कञ्चिदतिशयमनापादयतो मणेः प्रतिबन्धकत्वानुपपत्तिश्च। अस्माकं तु शक्तिरूपकारणविघटनेनैव मणेः प्रतिबन्धकत्वमिति।

उत्तेजकाभावविशिष्टेति। वैशिष्ट्यं सामानाधिकरण्यसम्बन्धेन। अयम्भावः अभावीयविशेषणतासम्बन्धेन रूपध्वंसस्वरूपदाहं प्रति उद्देश्यता—दैशिकविशेषणतान्यतरसम्बन्धावच्छिन्नप्रतियोगिताकानां तत्तदुत्तेजकाभावानां सामानाधिकरण्यरूपं यद्वैशिष्ट्यं तदवच्छिन्नस्य मण्यादेर्दैशिकविशेषणतोद्देश्यतान्यतरसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य अभावीयविशेषणतासम्बन्धेन हेतुत्वमिति। मन्त्रस्य वह्न्यधिकरणदेशे उद्देश्यतासम्बन्धेनैव सत्त्वादुद्देश्यतानिवेशः। मण्यादिरूपोत्तेजकस्य संयोगेन वह्न्यधिकरणदेशे सत्त्वेऽपि किञ्चिदवच्छेदेन संयोगेन तदभावसत्त्वाद्दाहानुपपत्तिरतो दैशिकविशेषणतेत्यस्य निवेशः। दैशिकविशेषणतया तु न द्रव्यस्याव्याप्यवृत्तित्वमिति न दाहानुपपत्तिरिति।

ननु देवदत्तसदृशो यज्ञदत्त इति तीत्या सादृश्यमपि पदार्थः। तच्च सादृश्यं षड्भावानन्तर्भूतं सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वात्। सामान्यत्वे व्यभिचारवारणाय सत्यन्तम्। गुणे व्यभिचारवारणाय विशेष्यम्। यथा गोत्वं नित्यं तथाऽश्वत्वमपीति प्रतीत्या सादृश्यस्य सामान्यवृत्तित्वं वक्तव्यम्। प्रमेयत्वे व्यभिचारवारणाय व्यतिरेकित्वे सतीति देयम्। सादृश्यमभावानन्तर्भूतं सत्त्वेन प्रतीयमानत्वादित्यनुमानाभ्यां सादृश्यस्य सप्तपदार्थानन्तर्गततया सप्तैव पदार्था इति कथनमसङ्गतमेवेति चेद्?

न, तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वस्यैव सादृश्यरूपतया घटसदृशः पट इत्यादौ जातौ, यथा गोत्वं नित्यं तथाऽश्वत्वमपीत्यादौ चन्द्रसदृशं मुखमित्यादौ च नित्यत्वाह्लादकत्वादिरूपोपाधौ सादृश्यस्यान्तर्भावेणातिरिक्तत्वशङ्काऽनवकाशात्।

ननूपाधीनां कुत्रान्तर्भाव इति चेद्? न कुत्रापीति केचित्।

द्रव्याणि विभजते—

क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः।

द्रव्याणि,

क्षित्यप्तित्यादि। क्षितिः पृथिवी, आपो जलानि, तेजो वह्निः, मरुद् वायुः, व्योम आकाशः, कालः समयः, दिग् आशा, देही आत्मा, मन एतानि नव द्रव्याणीत्यर्थः।

ननु द्रव्यत्वजातौ किं मानम्? न हि तत्र प्रत्यक्षं प्रमाणं, घृतजतुप्रभृतिषु द्रव्यत्वाग्रहादिति चेद्?

मुक्तावलीमयूखः।

न च तेषां सप्तपदार्थानन्तर्गतत्वे सप्तपदार्थी इति कथनासङ्गतिरितिवाच्यम्, तत्त्वज्ञानोपयोगिनां पदार्थानामेवेह विभाज्यत्वेनाभिमततत्तत्पदार्थीनामकथनेऽपि क्षत्यभावात्।

वर्द्धमानोपाध्यायास्तु 'सामान्यं द्विविधं जातिरुपाधिश्च' इत्युक्त्वा सामान्येऽन्तर्भावमुपाधीनां वदन्ति ॥ २ ॥

क्षयार्थकक्षिधातोः 'स्त्रियां क्तिन्' इति क्तिन्प्रत्ययनिष्पन्नक्षितिशब्दस्य क्षयवाचकत्वात् प्रकृतोपयुक्तमर्थमाह—**क्षितिः पृथिवीति**। क्षीयन्ते जना अस्यामिति बाहुलकादधिकरणे क्तिनिति भावः। 'अप्तृन्' इतिपाणिनिसूत्रेऽप्शब्दे शब्दपरत्वस्य दृष्टतया प्रकृते शब्दपरत्वशङ्काव्युदासायाह—**आपो जलानीति**। 'स प्रभावः प्रतापश्च यत्तेजः कोशदण्डजम्' इतिकोशात्प्रतापस्यापि तेजःशब्दवाच्यतया प्रकृते तेजःपदार्थमाह—**तेजो वह्निरिति**। देवविशेषस्यापि मरुच्छब्दवाच्यतया प्रकृते मरुच्छब्दार्थमाह—**मरुद्वायुरिति**। 'परमे व्योमन्' इति श्रुतौ व्योमशब्दस्य ब्रह्मणि प्रयोगादाह—**व्योम आकाश इति**। कालशब्दस्य यमे प्रसिद्धत्वादाह—**कालः समय इति**। अतिसर्जनार्थकदिशधातुनिष्पन्नदिक्शब्दस्य दानार्थकत्वादाह—**दिग् आशेति**। ईश्वरस्य देहाभावाद् देहिपदेन सङ्ग्रहो न स्यादत आह—**देही आत्मेति**। मनश्शब्देऽन्यार्थपरत्वशङ्काया असावेन तात्पर्यार्थप्रदर्शनं ग्रन्थकृता न कृतमिति ध्येयम्।

ननु कारिकावल्यामितः प्राङ् मुक्तावल्यां वा द्रव्यत्वस्य तज्जातित्वस्य वाऽनुक्तया द्रव्यत्वजातौ किम्मानमिति शङ्कोत्थितिः कथमिति चेद्?

उच्यते, मूले द्रव्याणीत्युक्तं तत्र द्रव्याणीत्यस्य यदि गुणवन्तीत्यर्थस्तदा गुणानां शक्यतावच्छेदकत्वे गौरवम्, 'उत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियं च तिष्ठति' इति नियमेनोत्पन्नघटे द्रव्यशब्दप्रयोगानुपपत्तिश्चातो द्रव्याणीत्यस्य द्रव्यत्वजातिविशिष्टानीत्यर्थो वाच्यः। तदा च द्रव्यत्वस्य शक्यतावच्छेदकतया न गौरवम्, न वोत्पन्नघटे द्रव्यशब्दप्रयोगानुपपत्तिर्द्रव्यत्वजातेस्तत्र सत्त्वात्।

एवं च द्रव्याणीत्यनेन द्रव्यत्वजातेरुपस्थित्या द्रव्यत्वजातौ किं मानमिति शङ्काकरणमुचितमेवेति बोध्यम्।

ननु द्रव्यत्वजातौ किं मानम्?

मुक्तावलीमयूखः ।

न च यथा "अयं घटः अयं घटः" इति समानाकारप्रतीत्या घटत्वजातिः प्रत्यक्षा तथा "इदं द्रव्यम् इदं द्रव्यम्" इति समानाकारप्रतीत्या द्रव्यत्वजातिरपि प्रत्यक्षेति वाच्यम् ?

(१) घृतजतुप्रभृतिषु पण्डितानामिदं द्रव्यमितिप्रतीतिसद्भावेऽपि पामराणामिदं द्रव्यमिति प्रतीत्यभावेनाऽऽपामरप्रसिद्धानुगतप्रतीतेरेव जातिसाधकतया प्रकृते तस्या अभावेन प्रत्यक्षप्रमाणेन द्रव्यत्वजातिसिद्धेरयोगादिति चेद् ?

न, गुणे गुणोत्पत्तिवारणाय समवायेन कार्यं प्रति तादात्म्येन द्रव्य कारणमिति कार्यकारणभावस्यावश्यकतया समवायसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नद्रव्यनिष्ठकारणता लभ्यते । ततश्च यत्र यत्र कारणतात्वं तत्र तत्र किञ्चिद्धर्मावच्छिन्नत्वमिति दण्डादिनिष्ठकारणतादौ सहचारदर्शनेन कारणतात्वं किञ्चिद्धर्मावच्छिन्नत्वव्याप्यमिति व्याप्तिज्ञानं जायते । ततः कारणतात्ववत्येषा द्रव्यनिष्ठा कारणतेति पक्षधर्मताज्ञानम् । ततो व्याप्तिस्मरणम् । ततः किञ्चिद्धर्मावच्छिन्नत्वव्याप्यकारणतात्ववत्येषा कारणतेति परामर्शज्ञानम् । ततः समवायसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपितादात्म्यसम्बन्धावच्छिन्ना द्रव्यनिष्ठा कारणता किञ्चिद्धर्मावच्छिन्नाकाशतात्वाद् दण्डत्वावच्छिन्नदण्डनिष्ठकारणतावदित्यनुमानेन किञ्चिद्धर्मावच्छिन्नत्वसिद्धौ यद्धर्मावच्छिन्ना द्रव्यनिष्ठा कारणता तदेव द्रव्यत्वमिति द्रव्यत्वजातिसिद्धेः ।

न च पदार्थत्वं घटत्वं वा द्रव्यनिष्ठकारणताऽवच्छेदकमस्त्विति वाच्यम् ,

अन्यूनानतिप्रसक्तधर्मस्यैवावच्छेदकत्वमिति नियमेन पदार्थत्वस्य द्रव्यनिष्ठकारणताऽतिरिक्तवृत्तित्वेन घटत्वस्य च द्रव्यनिष्ठकारणतान्यूनवृत्तित्वेनावच्छेदकत्वासम्भवात् ।

नचान्यूनानतिप्रसक्तधर्मस्यैवावच्छेदकत्वाङ्गीकारे दण्डनिष्ठकारणताऽवच्छेदकं दण्डत्वमपि न स्याद्, अनन्यथासिद्धकार्यनियतपूर्ववर्तित्वरूपकारणत्वाभाववत्यरण्यस्थदण्डे दण्डत्वस्य सत्त्वेनातिप्रसक्तत्वादिति वाच्यम्,

अनन्यथासिद्धकार्यनियतपूर्ववर्तिजातीयत्वरूपकारणत्वस्यारण्यस्थदण्डेऽपि सत्त्वेन दण्डत्वस्य कारणतातिरिक्तवृत्तित्वाभावात् । घटनियतपूर्ववर्तिदण्डे फलोपधायकतारूपा; अरण्यस्थदण्डे स्वरूपयोग्यतारूपा कारणतेत्यन्यदेतत् । दण्डत्वस्य कारणतावच्छेदकत्वसिद्ध्यर्थमेव स्वरूपयोग्यतारूपा कारणताऽरण्यस्थदण्डे स्वीक्रियत इति ध्येयम् ।

ननु समवायेन नीलं प्रति स्वाश्रयसमवेतद्रव्यत्वसम्बन्धेन नीलस्य हेतुतास्वीकारेण नीले नीलोत्पत्तिवारणसम्भवे समवायेन कार्यं प्रति तादात्म्येन द्रव्यं कारणमिति कार्यकारणभावे मानाभावः, किञ्च प्रागभावप्रतियोगित्वरूपकार्यत्वस्य ध्वंससाधारण्येन समवायसम्बन्धावच्छिन्नकार्यतातिरिक्तवृत्तितया समवायसम्बन्धावच्छिन्नकार्यताऽवच्छेदकत्वा-

---

(१) ननु घटादाविवेव कुतो नोक्तमिति चेद् ? न, अनुगतप्रतीत्यभावसूचनाय तदुपादानात् । तथाहि, अनुगताकृतिव्यङ्ग्या मनुष्यत्वादिजातिः नहि नवसु द्रव्येषु काचिदेकाकृतिरस्ति घृतादिष्वेकैकद्रव्येष्वपि सर्वदा नैकाकृतिः किमुत नवसु द्रव्येषु इति अनुगताकृत्या द्रव्यत्वं न सेत्स्यतीति भावः ।

न, कार्यसमवायिकारणताऽवच्छेदकतया संयोगस्य विभागस्य वा समवायिकारणताऽवच्छेद[क]तया द्रव्यत्वजातिसिद्धेरिति ।

ननु दशमं द्रव्यं तमः कुतो नोक्तम् ? तद्धि प्रत्यक्षेण गृह्यते। तस्य च रूपवत्त्वात् कर्मवत्त्वाच्च द्रव्यत्वम्। तद्धि गन्धशून्यत्वान्न पृथिवी, नालरूपवत्त्वाच्च

मुक्तावलीमयूखः ।

सम्भवः, सत्त्वे सति प्रागभावप्रतियोगित्वरूपकार्यतावच्छेदकत्वे च गौरवमिति नोक्तानुमानसम्भव इत्यरुचेराह—संयोगस्येति ।

अयं भाव.—'समवायेन संयोगं प्रति तादात्म्येन द्रव्यं कारणम्', इति कार्यकारणभावस्वीकारेण समवायसम्बन्धावच्छिन्नसंयोगत्वावच्छिन्नकार्यतानिरूपिता या तादात्म्यसम्बन्धावच्छिन्ना द्रव्यनिष्ठा कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वादित्यनुमानेन द्रव्यत्वजातिसिद्धिरिति ।

ननु रूपादीनपहाय संयोगपर्यन्तमनुधावनं किमर्थमिति चेद् ?

उच्यते, रूपरसगन्धस्पर्शनिरूपितकारणताया नवद्रव्यसाधारण्याभावात् संख्यापरिमाणपृथक्त्वनिरूपितकारणताया नवद्रव्यसाधारण्येऽपि सङ्ख्यात्वादीना नित्यानित्यवृत्तितया कार्यतातिरिक्तवृत्तित्वेन कार्यताऽवच्छेदकत्वासम्भवाद् रूपादिकारणताऽवच्छेदकतया द्रव्यत्वजातिसिद्ध्यसम्भव इति ।

ननु विभुद्वयसंयोगस्य नित्यतया तदङ्गीकर्तृमते संयोगत्वस्यापि नित्यानित्यवृत्तितया कार्यताऽवच्छेदकत्वासम्भवेनोक्तानुमानासम्भव इत्यरुचेराह—विभागस्येति ।

समवायेन विभागं प्रति तादात्म्येन द्रव्यं कारणमिति स्वीकारेण समवायसम्बन्धावच्छिन्नविभागत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नद्रव्यनिष्ठकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वाद् दण्डत्वावच्छिन्नदण्डनिष्ठकारणतावदित्यनुमानेन द्रव्यत्वजातिसिद्धिरिति भावः ।

ननु नीलं तमश्चलतीतिप्रतीत्या चाक्षुषप्रत्यक्षसिद्धतमसः तमो द्रव्यं रूपवत्त्वात्कर्मवत्त्वाच्चेत्यनुमानेन द्रव्यत्वसिद्धौ तमः पृथिवीत्वाभाववद्गन्धशून्यत्वात्, तमो न जलादि यतमरूपं नीलरूपवत्त्वादित्यनुमानाभ्यां कल्पितनवद्रव्येष्वन्तर्भावाभावादशमं द्रव्यं तमः तो नोक्तम् ?

न च चाक्षुषप्रत्यक्षे आलोकसहकृतचक्षुषः कारणत्वात्तमसः कथं चाक्षुषत्वमिति वाच्यम् ?

वस्तुस्वभावात्तमश्चाक्षुषे आलोकनिरपेक्षस्यैव चक्षुषः कारणत्वाभ्युपगमेनादोषात चेद् ?

—न, तमसस्तेजोऽभावरूपताऽङ्गीकारेणैवोपपत्तौ द्रव्यान्तरकल्पनाया अनुचितत्वात् । कर्मवत्त्वप्रतीतिर्भ्रमरूपा कर्मवत्त्वप्रतीतिरप्यालोकापसरणौपाधिकी भ्रान्तिरेवेति न रूपवत्त्ववत्त्वहेतुभ्यां द्रव्यत्वं साधयितुमलम् ।

ननु 'प्रतीतेर्भ्रान्तित्वं तत्रैव स्वीक्रियते यत्रोत्तरकाले बाधः, प्रकृते च न तथेति कथं तत्त्वमिति चेद् ?

न जलादिकम्। तत्प्रत्यक्षे चालोकनिरपेक्षं चक्षुः कारणमिति चेद् ?

न, आवश्यकतेजोऽभावेनैवोपपत्तौ द्रव्यान्तरकल्पनाया अन्याय्यत्वात्। रूपवत्ताप्रतीतिस्तु भ्रमरूपा, कर्मवत्तापतीतिरप्यालोकापसरणौपाधिकी भ्रान्तिरेव। तमसोऽतिरिक्तद्रव्यत्वेऽनन्तावयवादिकल्पनागौरवं च स्यात्। स्वर्णस्य यथा तेजस्यन्तर्भावस्तथा वक्ष्यते।

गुणान्विभजते—

अथ गुणा रूपं रसो गन्धस्ततः परम् ॥ ३ ॥
स्पर्शः सङ्ख्या परिमितिः पृथक्त्वं च ततः परम्।
संयोगश्च विभागश्च परत्वं चापरत्वकम् ॥ ४ ॥
बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरुत्वकम्।
द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ॥ ५ ॥

अथ गुणा इति। एते गुणाश्चतुर्विंशतिसङ्ख्याकाः कणादेन कण्ठतश्च-शब्देन च दर्शिताः। तत्र गुणत्वजातिसिद्धिरग्रे वक्ष्यते ॥ ३-५ ॥

कर्माणि विभजते—

उत्क्षेपणं ततोऽपक्षेपणमाकुञ्चनं तथा।
प्रसारणं च गमनं कर्माण्येतानि पञ्च च ॥ ६ ॥

उत्क्षेपणमिति। कर्मत्वजातिस्तु प्रत्यक्षसिद्धा। एवमुत्क्षेपणत्वादिकमपि ६॥

मुक्तावलीमयूखः।

न, तमसोऽतिरिक्तद्रव्यत्वाङ्गीकारेऽनन्तावयवादिकल्पने गौरवापत्त्या लाघवार्थं प्रतीते-र्भ्रमत्वस्यैवौचित्यात्।

ननु तम एव द्रव्यं तेज एव तमोऽभाव इति चेद् ?

न, उष्णस्पर्शवत्त्वप्रतीत्यन्यथाऽनुपपत्त्या तेजसोऽभावरूपताया अङ्गीकर्तुमशक्यत्वात्। इदमेव सूचयितुमावश्यकतेजोऽभावेनेत्यावश्यकत्वं तेजोविशेषणमुपात्तमित्यलम्।

ननु 'रूपरसगन्धस्पर्शाः सङ्ख्यापरिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः' इति वैशेषिकसूत्रे सप्तदशैव गुणा उक्ता इह कथं चतुर्विंशतिर्गुणा इत्युक्तमत आह—एते गुणा इति।

ननु गुणत्वजातौ किं मानमिति चेद् ?

उच्यते, द्रव्यकर्मभिन्ने सामान्यवति या कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणता-त्वादित्यनुमानेन गुणत्वजातिसिद्धिरिति।

नन्वणुपरिमाणस्य क्वाप्यकारणतया गुणत्वस्य तत्साधारण्यं न स्यादिति चेद् ?

न, गुणपदशक्यताऽवच्छेदकविधया गुणत्वजातिसिद्धेरिति ॥ ३-४-५ ॥

नन्वत्र भ्रमणादिकमपि पञ्चकर्माधिकतया कुतो नोक्तमत आह—

भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च ।
तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ॥ ७ ॥

भ्रमणमित्यादि ॥ ७ ॥

सामान्यं निरूपयति—

सामान्यं द्विविधं प्रोक्तं परं चापरमेव च ।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥ ८ ॥

सामान्यमिति । तल्लक्षणं तु नित्यत्वे सत्यनेकसमवेतत्वम् । अनेकसमवेतत्वं संयोगादीनाप्यस्त्यत उक्तं नित्यत्वे सतीति । नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्त्यत उक्तमनेकेति । नित्यत्वे सत्यनेकवृत्तित्वमत्यन्ताभावेऽप्यस्त्यतो वृत्तित्वसामान्यं विहाय समवेतत्वमित्युक्तम् ।

मुक्तावलीमयूखः ।

भ्रमणमितीति । ननु भ्रमणादिष्विवोत्क्षेपणादिष्वपि 'ऊर्ध्वं गच्छति' इतिप्रत्ययादुत्क्षेपणादीनामपि गमनेऽन्तर्भावोऽस्त्विति चेद् ?

न, प्रकृते उत्क्षेपणादिभिन्नत्वे सत्युत्तरदेशसंयोगानुकूलक्रियात्वस्यैव गमनपदार्थतया तत्रोत्क्षेपणादीनामन्तर्भावस्य कर्तुमशक्यत्वात् । 'उत्तरदेशसंयोगानुकूलक्रियात्वस्यैव गमनत्वमङ्गीकृत्यान्तर्भावशङ्का तु कर्तुमशक्या, 'स्वतन्त्रेच्छस्य मुनेर्नियोगपर्यनुयोगानर्हत्वादित्यलम् ॥ ६-७ ॥

'व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनम्' इत्यभियुक्तोक्त्या लक्षणस्य सप्रयोजनत्वादाह—तल्लक्षणं त्विति ।

नित्यत्वसमानाधिकरणानेकनिरूपितसमवायसम्बन्धावच्छिन्नवृत्तिताऽश्रयत्वं सामान्यत्वमित्यर्थः । समवायादिति समवेत इति व्युत्पत्त्या समवपूर्वकेणधातोः समवायोऽर्थः, क्तप्रत्ययस्य वृत्तिताऽऽश्रयोऽर्थः, वृत्तितायां समवायस्यावच्छिन्नत्वसम्बन्धेनान्वयः, तत उक्तार्थलाभ इति ध्येयम् ।

ननु विभुद्वयसंयोगाङ्गीकर्तृमते नित्यसंयोगेऽतिव्याप्तिरिति चेद् ?

न, विभुद्वयसंयोगस्यानङ्गीकारात् । अन्यथा तुल्ययुक्त्या नित्यविभागस्यापि सिद्धिप्रसङ्गात् ।

केचित्तु—तत्रातिव्याप्तिवारणाय संयोगभिन्नत्वे सतीति देयमिति वदन्ति ।

अपरे तु—एकत्वे सतीतिविशेषणदानान्न तत्र दोषः । अत एव तर्कसंग्रहे नित्यमेकमनेकानुगतं सामान्यमितिलक्षणे एकमिति विशेषणमुपात्तम् । तच्च संयोगे नास्तीति वदन्ति ।

परे तु—अनेकसमवेतत्वमित्यत्रानेकपदं बहुपरं संयोगस्य द्विसमवेत एव न बहुसमवेत इति न दोष इति प्राहुः ।

एकव्यक्तिमात्रवृत्तिस्तु न जातिः। तथा चोक्तम्—

"व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः।
रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः" ॥

द्रव्यादीति। परत्वमधिकदेशवृत्तित्वम्। अपरत्वमल्पदेशवृत्तित्वम्। सकलजात्यपेक्षयाऽधिकदेशवृत्तित्वात् सत्तायाः परत्वं, तदपेक्षया चान्यासां जातीनामपरत्वम् ॥ ८ ॥

मुक्तावलीमयूखः।

ननु निःसामान्यत्वे सति विशेषान्यत्वे सति समवेतत्वं सामान्यलक्षणं प्राचामभिमतम्। तत्र समवेतघटादावतिव्याप्तिवारणायायं सत्यन्तम्। विशेषेऽतिव्याप्तिवारणाय द्वितीयं सत्यन्तम्। समवायाभावयोरतिव्याप्तिवारणाय विशेष्यम्। ततश्चाकाशत्वमपि जातिरिति प्रतीयते; नित्यत्वे सत्यनेकसमवेतत्वलक्षणं तु न तत्र गतमित्यव्याप्तिर्लक्षणस्येति कस्यचिच्छङ्कामपनुदति—एकव्यक्तिमात्रवृत्तिरित्यादिना।

जातिसाधिकाया अनेकव्यक्तिष्वनुगतधियोऽभावादाकाशत्वं न जातिरिति नाव्याप्तिरिति भावः।

अमुमर्थं प्रमाणयति—व्यक्तेरभेद इत्यादिना। व्यक्तेरित्यत्र निष्ठत्वं षष्ठ्यर्थः, तथाच स्वाश्रयीभूतव्यक्तिनिष्ठो भेदाभावः स्वस्य जातित्वे बाधकः। स्वमाकाशत्वं तदाश्रयीभूता व्यक्तिराकाशरूपा तत्राकाशभेदः 'आकाशं न' इति प्रतीतिसाक्षिको न वर्तते इति भेदाभावसत्त्वादाकाशत्वं न जातिः।

न चाकाशे आकाशभेदस्यासत्त्वेऽपि घटभेदस्य 'आकाशं घटो न' इतिप्रतीतिसाक्षिकस्य सत्त्वेन भेदसामान्याभावस्यासत्त्वादाकाशत्वं जातिः स्यादेवेति वाच्यम्,

, भेदः स्वाश्रयीभूतव्यक्तिप्रतियोगिको ग्राह्यः। तथा च स्वाश्रयीभूतव्यक्तिनिष्ठः स्वाश्रयीभूतव्यक्तिप्रतियोगिकभेदाभावः स्वस्य जातित्वे बाधक इत्यर्थलाभेनाकाशे आकाशभेदाभावस्य सत्त्वेन आकाशत्वे जातित्वाय इत्यदोषात्।

तुल्यत्वं तुल्यव्यक्तिवृत्तित्वं घटत्वकलशत्वादिजातीनां भेदे बाधकम्।

ननु कारिकायां जातिबाधकसंग्रह इत्युक्तं, तुल्यत्वं च जातिभेदबाधकमित्युच्यते, ततश्च कारिकाविरोध इति चेत्? तर्हि तुल्यत्वं स्वभिन्नजातिसमनियतत्वं स्वस्य जातित्वे बाधकम् इत्यर्थकरणान्न विरोधः। स्वं कलशत्वं तद्भिन्नजातिर्घटत्वं तत्समनियतत्वं कलशत्व इति कलशत्वे जातित्वबाधः। 'अयं घटः अयं घटः' इत्यनुगतधियः 'अयं कलशः अयं कलशः' इत्यनुगतधियश्च घटत्वजातिं कलशत्वजातिं वाऽऽदायोपपत्तौ घटत्वकलशत्वयोरुभयोर्जातित्वस्वीकारे मानाभावस्तुल्यावस्य जातित्वबाधकत्वे बीजमिति बोध्यम्।

परस्परात्यन्ताभावसमानाधिकरणधर्मयोरेकत्र समावेशः सङ्करः, भूतत्वमूर्तत्वयोर्जातित्वे बाधकः। मूर्तत्वाभाव आकाशे तत्र च भूतत्वं; भूतत्वाभावो मनसि तत्र च मूर्तत्वमुभयोः पृथिव्यादिचतुष्टये समावेश इति साङ्कर्याद्भूतत्वं मूर्तत्वं वा न जातिरिति ध्येयम्। साङ्कर्यस्य जातिबाधकत्वे मानं तु "जातिविशिष्टजातित्वावच्छेदेन स्वसमानाधिकरणाभावप्रतियोगित्वाभाव" इति नियमस्य ग्रन्थप्रसक्त एवेति बोध्यम्। वैशिष्ट्यं च

परभिन्ना च या जातिः सैवापरतयोच्यते ।
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥ ९ ॥
व्यापकत्वात्परोऽपि स्याद्व्याप्यत्वादपरोऽपि च ।

पृथिवीत्वाद्यपेक्षया व्यापकत्वादधिकदेशवृत्तित्वाद् द्रव्यत्वादेः परत्वं

मुक्तावलीमयूखः ।

स्वसमानाधिकरण्य स्वभावसमानाधिकरण्योभयसम्बन्धेन यदि भूतत्वमूर्तत्वे जाती स्यातां तदा जातिर्भूतत्वजातिस्तदधिकरणपृथिव्यादिवृत्तित्वस्य तदभावाधिकरणमनोवृत्तित्वस्य च मूर्तत्वजातौ सत्त्वेन जातिविशिष्टजातित्वावच्छिन्नं मूर्तत्वं जातमिति मूर्तत्वे स्वं भूतत्वं तदधिकरणाकाशनिष्ठमूर्तत्वाभावप्रतियोगित्वमेव न तु तदभाव इति नियमभङ्गःस्यात् । उक्तोभयसम्बन्धेन 'यज्जातिविशिष्टजातित्वं यत्र तत्र तज्जातिव्यापकत्वमिति' नियम इति यावत् । दृष्टश्चासौ पृथिवीत्वव्यापके द्रव्यत्वादौ, एतादृशनियमभङ्ग एव सांङ्कर्यस्य जातित्वबाधकत्वे मानम् । सांङ्कर्यस्थले एकमात्रस्य जातित्वेऽपि नैतादृशनियमभङ्ग इति क्रियासमवायिकाणतावच्छेदकतया सिद्धा मूर्तत्वं जातिरेवेति मन्तव्यम् ।

वस्तुतस्तु उक्तनियमे मानाभावेन सांङ्कर्यस्य जातिबाधकत्वं नव्या न सहन्त इति बोध्यम् ।

अप्रामाणिकानन्तपदार्थकल्पनाविधान्तेरभावोऽनवस्था । जातिवृत्तेर्जातित्वे बाधिका । घटत्वपटत्वादिजातिषु इयं जातिरियं जातिरित्यनुगतप्रतीत्या यदि काचिज्जातिरभ्युपगम्यते तदा तस्यां काचिदन्या तस्यां काचिदन्येत्येवमनवस्था स्यादिति न जातौ जातिरङ्गीकर्तव्येति भावः ।

ननु निखिलजातिषु एकस्या जातेरङ्गीकारे तस्यां न जात्यन्तरं, व्यक्तैक्यादित्यनवस्थाया जातिबाधकत्वं विफलमिति चेत् ? न, निखिलजातिष्वेका जातिस्तस्यां तदाश्रयीभूतघटत्वादिजातिषु चैकेत्येवममनवस्थेत्याशयात् ।

रूपस्य विशेषलक्षणस्य हानिर्विशेषवृत्तीनां जातित्वे बाधिका । निस्सामान्यत्वे सति सामान्यभिन्नत्वे सति समवेतत्वं हि विशेषत्वम् । यदि विशेषेषु विशेषत्वं जातिः स्यात्तदा विशेषाणां सामान्यरहितत्वाभावेन विशेषलक्षणस्यासम्भवः स्यादतो विशेषत्वं जातिर्नाभ्युपगम्यत इति भावः ।

ननु ग्रन्थकृता निरुक्तं विशेषलक्षणं नोक्तमिति तस्य भङ्गेऽपि न काचिद्क्षतिरिति चेत्! तदा रूपस्य स्वतोव्यावर्तकत्वस्य हानिः रूपहानिरित्यर्थो बोध्यः । तथाच जात्याश्रयस्य जातिपुरस्कारेणैव व्यावर्तकत्वनियमात् विशेषत्वजातेरङ्गीकारे विशेषत्वेनैव रूपेण विशेषाणां व्यावर्तकतया स्वतोव्यावर्तकत्वरूपस्य ग्रन्थकृदुक्तस्य विशेषलक्षणस्य भङ्गापत्तिरिति भावः ।

न चोक्तनियमे मानाभाव इति वाच्यम्, नियमानङ्गीकारे परमाणुगतैकत्वानां तत्तद्व्यक्तित्वेनैव परमाण्वन्तरभेदसाधकत्वसम्भवे विशेषपदार्थस्यैवासिद्धिप्रसङ्गात् ।

प्रतियोगिताऽनुयोगितान्यतरसम्बन्धेन समवायाभावः समवायाभाववृत्तिधर्मयोर्जातित्वेत

सत्ताऽपेक्षया व्याप्यत्वाद् अल्पदेशवृत्तित्वाच्च द्रव्यत्वस्यापरत्वम्। तथाच धर्मद्वयसमावेशादुभयमविरुद्धम्।

मुक्तावलीमयूखः।

बाधकः। यः समवायेन कुत्रचित्तिष्ठति तत्र प्रतियोगितासम्बन्धेन, यत्र तिष्ठति तत्रानुयोगितासम्बन्धेन समवायो वर्तते। समवायोऽभावो वा न कुत्रचित्समवायेन तिष्ठति न वा समवायाभावयोः कथित्समवायेन तिष्ठतीति समवाये अभावे च प्रतियोगिताऽनुयोगितान्यतरसम्बन्धेन समवायाभावो वर्तत इति समवायत्वसमभावत्वं वा न जातिरिति भावः।

ननु यदि समवायत्वस्याभावत्वस्य च जातित्वान्नोक्तारः स्यात्तदा समवायेनैव तौ समवायाभावयोस्तिष्ठत इति अनुयोगितासम्बन्धेन समवायस्य समवायाभावयोस्सत्त्वात्कथं जातिबाध इति चेत्? न, प्रतियोगितानुयोगितान्यतरसम्बन्धेन जात्यतिरिक्तप्रतियोगिकत्वविशिष्टसमवायाभावः समवायाभाववृत्तिधर्मयोर्जातित्वे बाधक इति स्वीकारेणादोषात्। एवं च अनुयोगितासम्बन्धेन रूपे जात्यतिरिक्तप्रतियोगिकसमवायाभावसत्त्वेन व्यभिचारवारणाय प्रतियोगित्वनिवेशः। आत्मनि प्रतियोगितासम्बन्धेन समवायासत्त्वेन व्यभिचारवारणायानुयोगितानिवेश इति बोध्यम्।

न च समवायस्यैकत्वेन तद्वृत्तिसमवायत्वस्य "व्यक्तेरभेदः" इत्यनेन जातित्वबाधात् तस्यासम्बन्ध एतदुदाहरणत्वं न सम्भवतीति वाच्यम्, समवायो नानेति नव्यमते "व्यक्तेरभेदः" इत्यनेन जातित्वबाधासम्भवेन असम्बन्धोदाहरणत्वस्य सौष्ठवात्।

ननु जातौ जात्यतिरिक्तप्रतियोगिकत्वविशिष्टसमवायस्य प्रतियोगितयाऽनुयोगितया चासत्त्वेनासम्बन्ध इत्यनेनैव जातिबाधसम्भवेऽनवस्थाया जातित्वबाधकत्वकथनं विफलमिति चेत्? न, जात्यतिरिक्तेत्यत्र जातिपदस्यासमवेतवृत्तिजातिपरतयाऽदोषात्।

दिनकर्यादिनवस्याऽसम्बन्धरूपहानीनां जातिमत्त्वे बाधकत्वमुक्तं, तन्न युक्तम्, सकृदुच्चरितन्यायेन जातिबाधकपदस्य जातित्वजातिमत्त्वोभयबाधकपरत्वासम्भवात्। जातिबाधकसंग्रह इत्यत्र भावप्रधाननिर्देशतया जातिपदस्य जातित्वपरत्वमिति बोध्यम् ॥ ८ ॥

सत्तापेक्षयेति। ननु सत्ताजातिः कथं सिध्यति। न च द्रव्यं सत्, गुणः सन्, कर्म सदित्यनुगतप्रतीत्यैव सत्ता जातिः सिध्यतीति वाच्यम्, तथा सति सामान्यं सत्, विशेषः, सन्, समवायः सन्नित्यनुगतप्रतीत्या सामान्यादिसाधारणीभूतस्य कस्यचिद्धर्मस्य सिद्धावपि द्रव्यादिवृत्तिमात्रवृत्तेः सत्तायाः सिद्धसम्भवात्; इति चेत्?

अत्रोच्यते—यत्र प्रतियोगितासम्बन्धेन ध्वंसोत्पत्तिस्तत्र तादात्म्यसम्बन्धेन सत् इति कार्यकारणभावबलेन ध्वंसत्वावच्छिन्नकार्यतानिरूपिता सन्निष्ठा या कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वादित्यनुमानेन सत्ताजातिसिद्धिरिति। न च प्रागभावे व्यभिचारः, प्रागभावे सत्ताविरहादिति वाच्यम्, प्रागभाववृत्तिप्रतियोगिताभिन्नप्रतियोगितायाः कार्यतावच्छेदकसम्बन्धत्वान्नोक्तारेणादोषात्।

समवायेन सत्तावच्छिन्नं प्रति तादात्म्येन द्रव्यत्वेन कारणतया अन्यतावच्छेदकतया सत्ताजातिसिद्धिरित्यपि केचित्।

विशेषं निरूपयति—

अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः ॥ १० ॥

अन्त्य इति । अन्तेऽवसाने वर्तत इत्यन्त्यः, यदपेक्षया विशेषो नास्तीत्यर्थः । घटादीनां द्व्यणुकपर्यन्तानां तत्तदवयवभेदात्परस्परं भेदः, परमाणूनां परस्परभेदको विशेष एव, स तु स्वत एव व्यावृत्तः, तेन तत्र विशेषान्तरापेक्षा नास्तीति भावः ॥ ६ ॥ १० ॥

मुक्तावलीमयूखः ।

ननुविशेषसद्भावे का युक्तिरिति चेत् ? उच्यते—अयं घटः अस्माद्घटाद्भिन्नो भिन्नावयवारब्धत्वात्, अयं घटावयवः अस्माद्घटावयवाद् भिन्नो भिन्नावयवारब्धत्वादित्येवं द्व्यणुकपर्यन्तं भिन्नावयवारब्धत्वरूपहेतुना परस्परं भेदसाधनसम्भवेऽपि परमाणूनां निरवयवत्वेन तेषां परस्परं भेदसाधनाय विशेषोऽभ्युपगम्यते । तथाच अयं परमाणुः अस्मात्परमाणोर्भिन्नो विशेषादित्यनुमानेन परमाणूनां परस्परं भेदः सिध्यति । अन्यथा परमाणूनां परस्परं भेदासिद्धौ द्व्यणुकादीनामपि तदसिद्धया घटादीनामपि भेदासिद्धिप्रसङ्गः । तदाह—घटादीनां द्व्यणुकपर्यन्तानामिति ।

ननु विशेषस्य विशेषान्तरात् भेदसाधनाय विशेषान्तरमभ्युपेयमित्यनवस्था स्यादित्यत आह—स तु स्वत एव व्यावृत्त इति ।

स्वतोव्यावृत्तत्वं च स्वभिन्नलिङ्गजन्यस्वविशेष्यकत्वसजातीयेतरभेदानुमित्यविषयत्वम् । स्वपदं पक्षत्वेनाभिमतपरम् । तथाच—घटः घटान्तरभिन्नः, भिन्नावयवारब्धत्वाद् इत्यनुमितौ स्वं घटस्तद्भिन्नं लिङ्गं भिन्नावयवारब्धत्वरूपं तज्जन्या स्वं घटस्तद्विशेष्यकं यत् घटसजातीयं घटान्तरम् तत्प्रतियोगिको यो भेदस्तस्य अनुमितिः घटो घटान्तरभिन्न इत्याकारिका तद्विषयत्वे घटे, अविषयत्वे विशेषे इति भवति समन्वयः । स्वभिन्नेत्यनुपादाने विशेषो विशेषान्तरभिन्नः, विशेषादित्यनुमितिविषयत्वस्य विशेषेऽपि सत्त्वादसम्भवः स्यात्, स्वविशेष्यकेत्यनुपादाने घटो विशेषाद् भिद्यते कपालसमवेतत्वादित्यनुमितिविषयत्वस्य विशेषे सत्त्वेनोक्तदोषतादवस्थ्यम् ।

ननु स्वलिङ्गकस्वविशेष्यकस्वसजातीयेतरभेदानुमितिविषयत्वमेव स्वतोव्यावृत्तत्वं वाच्यं, किं गुरुतरारम्भेणेति चेत् ? न, घटो घटान्तराद्भिन्नस्तादात्म्येन घटादित्यनुमितिविषयत्वस्य घटेऽपि सत्त्वेनाव्याप्त्यापत्तेः । साक्षात्वं च पदार्थविभाजकोपाधित्वेन । अन्यथा विशेषो द्रव्यभिन्नो गुणशून्यत्वादित्यनुमितिविषयत्वस्य विशेषे सत्त्वेनासम्भवः स्यादिति बोध्यम् ।

ननु 'अन्त्यो' नित्यद्रव्यवृत्तिरित्यनेन स्वतोव्यावृत्तत्वे सति नित्यवृत्तित्वं विशेषस्य लक्षणमवगम्यते तत्र नित्यवृत्तित्वदलनिवेशनं व्यर्थमिति चेत् ? न, नित्यवृत्तिरित्यस्य विशेषाणां स्थानकल्पनोपयोगित्वेन लक्षणकुक्षावप्रवेशेनादोषात् ।

नव्यास्तु नित्यद्रव्याणामेव स्वतो व्यावृत्तत्वमभ्युपगम्येष्टसिद्धया विशेषानीकारे मानाभाव इति वदन्ति ।

विशेषत्वं च नित्यत्वे सति नित्यद्रव्यवृत्तित्वे सति नित्यद्रव्यद्रव्यावृत्तित्वे सति कर्मा-

समवायं दर्शयति—

घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः।
तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः ॥ ११ ॥

घटादीनामिति। अवयवावयविनोर्जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवायः। समवायत्वं नित्यसम्बन्धत्वम्। तत्र प्रमाणं तु गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वाद्दण्डी पुरुष इति विशिष्टबुद्धिवद्दु इत्यनुमानम्। एतेन संयोगादिव्याघात्समवायसिद्धिः।

न च स्वरूपसम्बन्धेन सिद्धसाधनम् अर्थान्तरं वा ? अनन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवाल्लघ्वादेकसमवायसिद्धेः।

मुक्तावलीमयूखः।

वृत्तिजातिशून्यत्वम्। मनः क्रियायां, घटत्वे, आत्मत्वे, गगनपरिमाणे, च अतिव्याप्तिवारणाय क्रमेण दलानि, इत्यन्ये ॥ ९ ॥ १० ॥

घटादीनां कपालादाविति। षष्ठ्यर्थः प्रतियोगित्वं, सप्तम्यर्थोऽनुयोगित्वं, तथाच घटप्रतियोगिकः कपालानुयोगिकः यः सम्बन्धः स समवाय इत्यर्थः।

समवायत्वं नित्यसम्बन्धत्वमिति। नित्यत्वे सति सम्बन्धत्वं समवायत्वमित्यर्थः। संयोगेऽतिव्याप्तिवारणाय सत्यन्तम्। परमाण्वादावतिव्याप्तिवारणाय विशेष्यम्। ननु द्रव्यत्वाभावादीनां सम्बन्धः न प्रतियोग्यनुयोग्युभयरूपो, गौरवात्, किन्तु लाघवेन द्रव्यत्वाभावस्वरूप एव, स च नित्य इति द्रव्यत्वाभावरूपस्वरूपसम्बन्धेऽतिव्याप्तिरिति चेत् ? न, सम्बन्धप्रतियोग्यनुयोगिभिन्नत्वे सतीत्यस्यापि निवेशेनादोषात्।

न च नित्यसंयोगाङ्गीकर्तृमते नित्यसंयोगेऽतिव्याप्तिरिति वाच्यम्, नित्यत्वे सतीत्यनेन नित्यमात्रवृत्तिधर्माश्रयत्वे सतीत्यस्य विवक्षणेनादोषादित्यलम्॥

ननु विशेषणतासन्निकर्षेण समवायस्य प्रत्यक्षतया तत्र नानुमानापेक्षेति गुणक्रियादीत्यादिनाऽनुमानोपन्यासो व्यर्थ इति चेत् ? न, कालघटसंयोगप्रत्यक्षवारणाय संयोगप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य कारणतेति वादिनो नैयायिकस्य मते समवायस्य प्रत्यक्षत्वेऽपि सम्बन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य कारणतेति वादिनो वैशेषिकस्य मते समवायस्यैकतया एकदा तदाश्रयीभूतसकलव्यक्तीनां प्रत्यक्षासम्भवेन समवायस्याप्रत्यक्षतया तन्मतानुरोधेनानुमानोपन्यासस्यार्थक्यादिति बोध्यम्।

संयोगादिव्याघादिति। पृथक्सिद्धद्रव्ययोरेव संयोग इतिनियमादिति भावः। **सिद्धसाधनमिति**। वेदान्तिनो हि घटकपालादीनां स्वरूपसम्बन्धमभ्युपगच्छन्ति तेषां सिद्धसाधनम्। नैयायिका घटकपालादीनां समवायमभ्युपगच्छन्ति इति समवायसाधने प्रवृत्तानां तेषां स्वरूपसम्बन्धसिद्धयाऽर्थान्तरमिति भावः।

अनन्तस्वरूपाणामिति। ननु समवायनानात्ववादिनां नव्यानां मते अनन्तसमवायानां तेषां सम्बन्धत्वस्य च कल्पने गौरवादुक्तानुमानेन कल्पितानन्तस्वरूपाणां सम्बन्ध-

न च समवायस्यैकत्वे वायौ रूपवत्तावुद्धिप्रसङ्गः,
तत्ररूपसमवायसत्त्वेऽपि रूपाभावात्।
न चैवमभावस्य वैशिष्ट्यं सम्बन्धान्तरं सिध्येदिति वाच्यम्,
तस्य नित्यत्वे भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसङ्गात्, घटाभावस्य तत्र सत्त्वात्, तस्य च नित्यत्वात्। अन्यथा देशान्तरेऽपि तत्प्रतीतिर्न स्याद् वैशिष्ट्यस्य च तत्र सत्त्वात्। मम तु घटे पाकरक्तताद्दशायां

मुक्तावलीमयूखः।

त्वाङ्गीकरणमेवोचितमिति चेत्? न, समवायसम्बन्धेन पटत्वावच्छिन्नं प्रति तादात्म्येन तन्तुत्वेन हेतुतया कार्यतावच्छेदकसम्बन्धविधया समवायसिद्धेः।

न च समवायस्याने स्वरूपं निवेश्यतामिति न तेनापि समवायसिद्धिरिति वाच्यम्, यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणमिति समवायिकारणत्वव्यवस्थाभङ्गापत्तेः।

न च तत्रापि यत्सम्बद्धं कार्यमुत्पद्यते तत्समवायिकारणमित्येव लक्षणं क्रियतामिति वाच्यम्, कपालसम्बद्धघटध्वंसं प्रति कपालस्य समवायिकारणत्वापत्तेः ततश्च कपालनाशे घटध्वंसस्यापि ध्वंसापत्तेरिति दिक्।

ननु समवायस्यैकत्वे वायौ स्पर्शसमवायस्य सत्त्वेन स्पर्शसमवायरूपसमवाययोरैक्येन 'सम्बन्धसत्ता सम्बन्धिसत्तायां नियामिका भवति' इति नियमाद् रूपवान् वायुरिति प्रतीतिः स्यादिति चेत्? न, रूपप्रतियोगिकत्वविशिष्टसमवायस्यैव रूपसम्बन्धतया रूपप्रतियोगिकत्वविशिष्टसमवायस्य वायावभावेन रूपवान् वायुरिति प्रतीत्यभावात्।

न च 'विशिष्टं शुद्धान्नातिरिच्यते' इति न्यायाद् वायौ समवायस्य सत्त्वेन विशिष्टसमवायोऽप्यस्तीति तद्बोधनादवश्यमिति वाच्यम्, सत्ताया विशिष्टसत्तायाश्चैक्येऽपि सत्तात्वावच्छिन्ननिरूपकतानिरूपिताधिकरणतायाः विशिष्टसत्तात्वावच्छिन्ननिरूपकतानिरूपिताधिकरणतायाश्च भिन्नत्ववत् समवायविशिष्टसमवाययोरैक्येऽपि समवायत्वावच्छिन्ननिरूपकतानिरूपिताधिकरणतायाः रूपप्रतियोगिकत्वविशिष्टसमवायत्वावच्छिन्ननिरूपकतानिरूपिताधिकरणतायाश्च भिन्नत्वाङ्गीकारेण, रूपप्रतियोगिकत्वविशिष्टसमवायत्वावच्छिन्ननिरूपकतानिरूपिताधिकरणतायाः एव रूपसम्बन्धत्वाङ्गीकारेण वायौ तस्या अभावाद् वायुः रूपवानिति प्रतीत्यभावात्।

नव्यास्तु पृथिव्यां गन्धस्य समवायो न जले इति प्रतीत्या समवायो नानेति वदन्ति।

ननु रूपविशिष्टो घट इति प्रतीत्या यया सम्बन्धविधया समवायः सिध्यति, तथा घटाभावविशिष्टं भूतलमिति प्रतीत्याऽभावस्यापि वैशिष्ट्यनामकं सम्बन्धान्तरं सिध्येदिति चेत्? न, वैशिष्ट्यस्यानित्यत्वेऽनन्तवैशिष्ट्यानां तेषां सम्बन्धत्वस्य च कल्पनाऽपेक्षया कल्पनानन्तस्वरूपाणां सम्बन्धत्वकल्पनेन लाघवादुक्तप्रतीत्या वैशिष्ट्यसिद्ध्यसम्भवात्। मम तु रूपविशिष्टो घट इतिप्रतीत्या सिध्यन् समवायोनित्य एकश्चेति। अनन्तस्वरूपेषु सम्बन्धत्वकल्पनापेक्षया अतिरिक्त एकस्मिन्नेव सम्बन्धत्वकल्पनेन लाघवात्समवायः सिध्यति।

ननु मयाऽपि वैशिष्ट्यनित्यत्वमङ्गीक्रियत इति न गौरवमिति चेत्? न, घटाभाव-

श्यामरूपस्य नष्टत्वान्न तद्वत्तावुद्धिः। वैशिष्ट्यस्यानित्यत्वे त्वनन्तवैशिष्ट्यकल्पने तवैव गौरवम्। इत्थं च तत्तत्कालीनं तत्तद्भूतलादिकं तत्तदभावानां सम्बन्धः ॥ ११ ॥

अभावं विभजते—

अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः।
प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥ १२ ॥
एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते।

अभावस्त्विति। अभावत्वं द्रव्यादिषट्कान्योन्याभाववत्त्वम्। संसर्गेति। संसर्गाभावान्योन्याभावभेदादित्यर्थः। अन्योन्याभावस्यैकविधत्वात्तद्विभागाभावात्संसर्गाभावं विभजते-प्रागभाव इति। संसर्गाभावत्वम् अन्योन्या-

---

मुक्तावलीमयूखः।

वति भूतलेघटानयनानन्तरमपि घटाभाववैशिष्ट्ययोरुभयोरपि नित्यतया सम्बन्धसम्बन्धिनोस्सत्त्वेन घटाभाववद् भूतलमिति बुद्धेः प्रमात्वप्रसङ्गात्।

न च तवापि घटे रक्तरूपोत्पादेऽपि श्यामो घटः इति प्रतीतिः कस्मान्न भवति श्यामरूपसमवायस्य नित्यतया तत्र सत्त्वादिति वाच्यम्, श्यामरूपस्य नष्टतया तत्र श्यामो घट इति प्रतीत्यभावात्। न च मयाऽपि वैशिष्ट्यनित्यत्वस्याङ्गीकारेऽपि घटात्यन्ताभावानित्यत्वस्याङ्गीकारेण घटाभाववति भूतले घटानयनानन्तरं घटाभावस्य नष्टत्वान्न घटाभाववत्तावुद्धेः प्रमात्वप्रसङ्ग इति वाच्यम्, घटाभावस्यानित्यत्वे 'अवच्छेदकभेदात्प्रतियोगिता भिद्यते, प्रतियोगिताभेदाच्चाभावो भिद्यते' इति नियमेन एतद्देशीयघटाभावनाशे घटशून्यदेशीयघटाभावस्यापि नष्टत्वात्तत्रापि घटाभाववत्त्वबुद्धेरप्रमात्वापातात्।

न च—स्वरूपसम्बन्धवादिनस्तवापि स्वौ प्रतियोग्यनुयोगिनौ रूपं यस्य तत् स्वरूपमिति व्युत्पत्त्या प्रतियोग्यनुयोगिरूप एव सम्बन्धः फलति, तथाच घटाभाववति भूतले घटानयनानन्तरमपि नित्यतया घटाभावरूपप्रतियोगिनः भूतलरूपानुयोगिनश्च सत्त्वेन तदुभयात्मकत्वरूपसम्बन्धस्यापि सत्त्वात् घटाभाववद्भूतलमिति प्रतीतिः स्यादेव;—इति वाच्यम्, घटाभाववद्भूतलमिति प्रमात्मकज्ञानकालीनतत्तद्भूतलादेरेव तत्तदभावसम्बन्धताङ्गीकारेण तत्कालीनतद्भूतलरूपस्वरूपसम्बन्धाभावेनादोषादित्यलम् ॥ ११ ॥

नन्वभावत्वं द्रव्यादिषट्कान्योन्याभाववत्त्वमिदं लक्षणं द्रव्यादावतिव्याप्तं, घटः घटपटोभयं नेति भेदस्य घटे सत्त्ववद् द्रव्यं द्रव्यादिषट्कं नेति प्रतीतिसाक्षिकषट्त्वावच्छिन्नप्रतियोगिताकभेदस्य द्रव्येऽपि सत्त्वादिति चेत्? न, संख्यारूपषट्त्वस्य पर्याप्तिसम्बन्धेन द्रव्यादिषु प्रत्येकमसत्त्वेनोक्तापत्तिसम्भवेऽपि अपेक्षाबुद्धिरूपषट्त्वस्य प्रकृते विषयतयाऽवच्छेकत्वाङ्गीकारेण द्रव्यादिषु प्रत्येकं तस्य विषयतया सत्त्वेन द्रव्यं द्रव्यादिषट्कं नेति भेदस्य वक्तुमशक्यत्वेनोक्तापत्त्यभावात्। यदि तु 'द्रव्यं न' 'गुणो न' इत्यादिनो द्रव्यत्वाद्यवच्छिन्नप्रतियोगिताकभेदानां षण्णां ग्रहणं लक्षणेऽभिमतं तदा न कोऽपि दोषः, परं त्वननुगमापत्तिरिति बोध्यम्।

भावभिन्नाभावत्वम् । अन्योन्याभावत्वं तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम् । विनाश्यभावत्वं प्रागभावत्वम् । जन्याभावत्वं ध्वंसत्वम् । नित्यसंसर्गाभावत्वम् अत्यन्ताभावत्वम् ।

यत्र तु भूतलादौ घटादिकमपसारितं पुनरानीतं च तत्र घटकालस्य सम्बन्धाघटकतयाऽत्यन्ताभावस्य नित्यत्वेऽपि घटकाले न घटात्यन्ताभावबुद्धिः ।

तथोत्पादविनाशशाली चतुर्थोऽयमभाव इति केचित् ।

अत्र ध्वंसप्रागभावयोरविकरणेनात्यन्ताभाव इति प्राचीनमतम् ।

मुक्तावलीमयूखः ।

नन्वभावत्वं द्रव्यादिषट्कान्योन्याभावत्वम्, अन्योन्याभावत्वं च तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम्, इत्यभावत्वज्ञानेऽन्योन्याभावत्वज्ञानस्य अन्योन्याभावत्वज्ञानेऽभावत्वज्ञानस्य चापेक्षणात् 'स्वज्ञप्त्यधीनज्ञप्तिकत्व'रूपान्योन्याश्रयापत्तिः ।

न च विशेषणतासन्निकर्षजन्यप्रत्यक्षविषयत्वमभावत्वमिति स्वीकारेण नान्योन्याश्रय इति वाच्यम्, नैयायिकमते समवायस्यापि विशेषणतासन्निकर्षजन्यप्रत्यक्षविषयतया तत्राऽतिव्याप्तिवारणाय समवायभिन्नत्वे सतीत्यस्य निरुक्ताभावत्वलक्षणे निवेशनीयतयाऽस्यापि लक्षणस्यान्योन्याभावत्वघटितत्वयोक्तदोषतादवस्थ्यात् । एतेन भावभिन्नत्वमभावत्वमित्यपि परास्तम् । अभावत्वस्य भावभिन्नत्वरूपत्वाङ्गीकारे उद्देश्यतावच्छेदकविधेययोरैक्येन अभावो न भाव इति वाक्यान्नाभावबोधानुपपत्तेश्च ।

न चासमस्तनञ्पदजन्यप्रतीतिविषयत्वमभावत्वमिति स्वीकरणीयम्, 'अनुदरा कन्या' इत्यादौ नञ्पदजन्यप्रतीतिविषयेऽनुपपत्तादावतिव्याप्तिवारणायासमस्तेति, ततश्च नोक्तदोष इति वाच्यम्, 'श्यामघटे रक्तो नास्ति, रक्तघटे श्यामो नास्तीति' धीश्च प्रागभावं ध्वंसं चावगाहत इति वादिनो मते प्रागभावध्वंसयोर्लक्षणसमन्वयेऽपि अक्तप्रतीतित्वस्यात्यन्ताभावमवगाहते, न ध्वंसं न वा प्रागभावमिति वादिनः 'ध्वस्त' इति 'भविष्यति' इतिप्रतीतिविषयत्वमेव तयोरित्यभ्युपगच्छतो मते ध्वंसप्रागभावयोरव्याप्तितादवस्थ्यात्, नास्त्युदरं यस्या इति विग्रहे असमस्तनञ्पदजन्यप्रतीतिविषयत्वस्यात्यन्ते सत्त्वेनातिव्याप्तेश्च;—इति चेत् ? न, अभावत्वस्याखण्डोपाधित्वस्वीकारेणान्योन्याश्रयाभावादित्यलम् ॥

नन्वन्योन्याभावत्वं तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वं, तादात्म्यं च स्वप्रतियोगिवृत्तित्व—स्वानुयोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टान्यत्वं, ततश्च तादात्म्यलक्षणे भेदस्य भेदलक्षणे तादात्म्यस्य च प्रविष्टतयाऽन्योन्याश्रयप्रसङ्ग इति चेत् ? न, भेदत्वस्याखण्डोपाधितास्वीकारेणादोषात् ।

ननु प्रागभावसत्त्वे किं मानमिति चेत् ? उच्यते, उत्पन्नेऽपि घटे, तदियकारणानां कपालसंयोगदण्डादीनां, सद्भावेन पुनरुत्पादभिया तत्स्वीकारात् । ततश्च घटोत्पत्तिं प्रति प्रागभावस्यापि हेतुतया तस्यैव तदानीमभावेन न पुनर्घटोत्पाद इति 'अयं घटः स्वोत्पत्तिक्षणावृत्तिकारणजन्यः स्वोत्पत्तिद्वितीयक्षणानुत्पन्नत्वात्' इत्यनुमानेन प्रागभावसिद्धिः तस्य कार्यसामग्रीनाश्यत्वेन उत्पत्तिक्षणावृत्तित्वादिति केचित् ।

वस्तुतस्तु जन्यद्रव्यं प्रति समवायसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्याभावस्य ध्व-

श्यामघटे रक्तो नास्तीति रक्तघटे श्यामो नास्तीति धीश्च प्रागभावं ध्वंसं चावगाहते न तु तदत्यन्ताभावं तयोर्विरोधात्।

नव्यास्तु तत्र विरोधे मानाभावाद् ध्वंसादिकालावच्छेदेनाप्यत्यन्ताभावो वर्त्तत इति प्राहुः।

नन्वस्तु अभावानामधिकरणात्मकत्वं लाघवादिति चेद् ?

न, अनन्ताधिकरणात्मकत्वकल्पनाऽपेक्षयाऽतिरिक्तकल्पनाया एव लघो, यस्त्वात्। एवं च आधाराधेयभावोऽप्युपपद्यते। एवं च तत्तच्छब्दगन्धरसाद्यभावानां प्रत्यक्षत्वमुपपद्यते। अन्यथा तत्तदधिकरणानां तत्तदिन्द्रियाग्राह्यत्वादप्रत्यक्षत्वं स्यात्। एतेन ज्ञानविशेषकालविशेषाद्यात्मकत्वमभावस्येति प्रत्युक्तमप्रत्यक्षत्वापत्तेः ॥ १२ ॥

मुक्तावलीमयूखः।

णाऽभ्युपगमेनोक्तदोषवारणसम्भवे प्रागभावस्य घटं प्रति हेतुताङ्गीकारे मानाभावइति। 'घटो ध्वस्तः' इति प्रत्यक्षबलेन ध्वंसस्य सिद्धावपि प्रागभावस्य सिद्धौ मानाभावः, 'घटो भविष्यतीत्यत्र भविष्यत्त्वं वर्तमानकालध्वंसाधिकरणकालोत्पत्तिकत्वरूपं न तु वर्तमानप्रागभावप्रतियोगित्वरूपमिति न भविष्यतीतिप्रतीत्याऽपि प्रागभावसिद्धिप्रत्याशेत्यन्यत्र विस्तरः।

तयोर्विरोधादिति। अत्यन्ताभावस्य प्रतियोगिना सह विरोधित्ववत् स्वप्रतियोगिध्वंसप्रागभावाभ्यामपि विरोधित्वमित्यभिमानः।

मानाभावादिति। अत एवान्तरा (१)श्यामे रक्तं रूपं नास्तीति प्रत्ययः।

न चैष रक्तिमध्वंसप्रागभावाद्यवगाही पूर्वापररक्तिमध्वंसप्रागभाववति सम्प्रति रक्तेऽपि तथा प्रत्ययप्रसङ्गात्। मम तु रक्तं रूपं नास्तीति प्रत्ययोऽत्यन्ताभावमवगाहते, न तु ध्वंसं न वा प्रागभावं, तयोः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वविरहात् ॥

नन्वभावस्याधिकरणात्मकत्वमेवास्तु किमतिरिक्तपदार्थत्वकल्पनया ?

न चानन्ताधिकरणेषु अभावत्वकल्पनाऽपेक्षया अतिरिक्तत्वकल्पनायामेव लाघवम्, अन्यथाऽभेदे आधाराधेयभावानुपपत्त्या घटाभाववद्भूतलमिति प्रतीतिर्न स्यादिति वाच्यम्, अतिरिक्तानन्ताभावेष्वभावत्वकल्पनाऽपेक्षया कल्पितानन्ताधिकरणेष्वभावत्वकल्पने एव लाघवात् अभावाधिकरणकाभावस्याधिकरणस्वरूपत्वेऽप्याधाराधेयभावोपपत्तिवद्घटाभाववद्भूतलमित्यस्योपपत्तेश्च।

न चाभावस्याधिकरणात्मकत्वे वायोर्घ्राणेन्द्रियाग्राह्यतया तद्रूपगन्धाभावस्यापि घ्राणेन्द्रियाग्राह्यत्वं त्वगिन्द्रियग्राह्यत्वं च स्यातां, ततश्च "येनेन्द्रियेण या व्यक्तिर्गृह्यते तद्गता जातिस्तदभावश्च तेनैवेन्द्रियेण गृह्यते" इति नियमभङ्गः स्याद्गन्धस्य घ्राणेन्द्रियग्राह्यत्वेऽपि गन्धाभावस्य त्वगिन्द्रियग्राह्यत्वादिति वाच्यम्, पृथिवीनिष्ठयोर्गन्धपृथिवीत्वयोरेकस्य घ्राणग्राह्यत्वमपरस्य चक्षुर्ग्राह्यत्वमिव वायुनिष्ठयोर्गन्धाभावत्ववायुत्वयोरेकस्य घ्राणग्राह्यत्वमपरस्य त्वग्ग्राह्यत्वमिति स्वीकारेण क्षत्यभावात्। न चायमस्ति नियमः "एकधर्मिनिष्ठानां यावतां धर्माणामेकस्य धर्मस्य येनेन्द्रियेण ग्रहणं तेनैव सर्वेषाम्" इति।

---

(१) पूर्वं रक्तस्ततः श्यामः ततो रक्तस्तत श्यामः ततो रक्तो यो घटस्तस्मिन्नित्यर्थः।

इदानीं पदार्थानां साधर्म्यं वैधर्म्यं च वक्तुं प्रक्रमते—

सत्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते ॥ १३ ॥

सत्तानामिति । समानो धर्मो येषां ते सधर्माणः तेषां भावः साधर्म्यं, समानो धर्म इति फलितार्थः । एवं विरुद्धो धर्मो येषां ते विधर्माणः तेषां भावो वैधर्म्यं, विरुद्धो धर्म इति फलितार्थः । ज्ञेयत्वं ज्ञानविषयता सा च सर्वत्रैवास्ति, ईश्वरादिज्ञानविषयतायाः केवलान्वयित्वात् । एवमभिधेयत्व-प्रमेयत्वादिकं बोध्यम् ॥ १३ ॥

द्रव्यादयः पञ्च भावा अनेकं समवायिनः ।
सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः ॥ १४ ॥

द्रव्यादय इति । द्रव्यगुणकर्मसामान्यविशेषाणां साधर्म्यमनेकत्वं सम-वायित्वं च । यद्यप्यनेकत्वमभावेऽप्यस्ति तथाप्यनेकत्वे सति भावत्वं पञ्चानां साधर्म्यम् । तथा चानेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वमिति

मुक्तावलीमयूखः ।

न च धर्मिणोऽप्रत्यक्षत्वे धर्मस्याप्यप्रत्यक्षतयाऽऽकाशनिष्ठगन्धाभावत्वादेः प्रत्यक्षत्वं न स्यादिति वाच्यम्, आकाशस्याप्रत्यक्षत्वेऽपि तद्धर्मस्य शब्दस्य प्रत्यक्षत्ववद्गन्धाभा-वत्वादेरपि प्रत्यक्षत्वसम्भवादिति चेत् ?

न, तथा सति पृथिवी गन्धवत्त्वया घ्राणग्राह्या न चक्षुर्ग्राह्येतिवद् वायुर्गन्धाभाववत्त्वेन घ्राणग्राह्य इति प्रतीतिप्रसङ्गादित्यलम् ॥ १२ ॥

केवलान्वयित्वादिति । वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम् ॥१३॥

षण्णां साधर्म्यं तु भावत्वं स्फुटतया नोक्तम् ।

ननु किमिदं भावत्वमिति चेत् ? उच्यते, समवायैकार्थसमवायान्यतरसम्बन्धेन सत्ता-वत्त्वं भावत्वमिति । सत्ता हि द्रव्यगुणकर्मसु समवायेन तिष्ठति, सामान्यविशेषसमवायेषु एकार्थसमवायेन तिष्ठति । एकार्थसमवायो नाम एकस्मिन्नर्थे उभयोः समवायः । यथा घटे घटत्वं समवायेन तिष्ठति तथा सत्ताऽपीति एकार्थसमवायसम्बन्धेन सत्तावत्त्वं घट-त्वसामान्यस्य, एवं विशेषः परमाणौ समवायेन तत्रैव सत्ताऽपीति एकार्थसमवायसम्ब-न्धेन सत्तावत्त्वं विशेषस्य, एवं कपाले समवायेन समवायस्तत्रैव सत्ताऽपीति एकार्थसम-वायेन सत्तावत्त्वं समवायस्येति भवति समन्वयः ।

न च कपाले स्वरूपेण समवायस्तिष्ठतीति कथमेकार्थसमवायेन सत्तावत्त्वं समवायस्येति वाच्यम्, समवायस्य स्वरूपाख्यः सम्बन्धो लाघवेन समवायरूप एवाङ्गीक्रियते न प्रति-योग्यनुयोग्युभयरूप इति कपाले स्वरूपेण समवायस्तिष्ठतीत्यस्य समवायेन तिष्ठतीत्यर्थ एव पर्यवसानेनादोषात् ।

अनेकभाववृत्तेति । अनेकेत्यनुक्तौ भाववृत्तिसमवायस्वरूपपदार्थविभाजकोपाधि-मादाय समवायेऽतिव्याप्तिः । भावेत्यनुक्तावभावेऽतिव्याप्तिः । पदार्थविभजकेत्यनुक्तौ भा-वत्वमादाय समवायेऽतिव्याप्तिः उपाधीत्यनुक्त्वा जातीत्युपादाने सामान्यादावव्याप्तिः ।

फलितोऽर्थः। तेन प्रत्येकं घटादावाकाशादौ च नाव्याप्तिः। समवायित्वं च समवायसम्बन्धेन सम्बन्धित्वं न तु समवायवत्त्वं सामान्यादावभावात्। तथा च समवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वमिति फलितोऽर्थः। तेन नित्यद्रव्येषु नाव्याप्तिः।

सत्तावन्त इति। द्रव्यगुणकर्मणां सत्तावत्त्वमित्यर्थः।

गुणादिरिति। यद्यपि गुणक्रियाशून्यत्वमाद्यक्षणे घटादावतिव्याप्तं क्रियाशून्यत्वं च गगनादावतिव्याप्तं तथापि गुणवदवृत्तिधर्मवत्त्वं कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वं तदर्थः। नहि घटत्वादिकं द्रव्यत्वं वा गुणपदवृत्ति कर्मवदवृत्ति वा, किं तु गुणत्वादिकं तथा, आकाशत्वादिकं तु

मुक्तावलीमयूखः।

उपाधिमत्ता च समवायस्वरूपान्यतरसम्बन्धेनेति।

नन्वनेकभाववृत्तीत्यत्र अनेकत्वं यदि बहुत्वसङ्ख्या, तदा गुणादौ सङ्ख्याविरहात्तेष्वव्याप्तिः। यदि यत्किञ्चिदेकभिन्नत्वं, तदा समवायेऽतिव्याप्तिः। यदि च एकत्वावच्छिन्नसामान्यभेदः, तत्र चैकत्वं यदि सङ्ख्यारूपं, तदोक्तातिव्याप्तितादवस्थ्यम्। यदि च तन्मात्रविषयकबुद्धिविषयत्वं, तदाऽप्रसिद्धिः तादृशैकत्वस्य केवलान्वयित्वादिति चेत्? उच्यते, स्वप्रतियोगिवृत्तित्व-स्वसमानाधिकरणयोभयसम्बन्धेन भेदविशिष्टत्वे सति भाववृत्तित्वमनेकभाववृत्तित्वमित्यङ्गीकारेणादोष इति।

समवायित्वं चेति। ननु समवायोऽस्त्यस्मिन्निति व्युत्पत्त्या समवायित्वमित्यस्य समवायानुयोगित्वमित्यर्थः, तच्च सामान्यादौ नास्तीत्यव्याप्तिरित्यत आह—

समवायसम्बन्धेन सम्बन्धित्वमिति। समवायित्वमित्यनेन समवायानुयोगित्वं समवायप्रतियोगित्वं चोभयं विवक्षितमिति भावः।

ननु समवायसम्बन्धेनेत्यत्र "प्रकृत्यादिभ्यश्च" इति तृतीयाया अभेदोऽर्थस्ततश्च समवायसम्बन्धाभिन्नसम्बन्धवत्त्वमित्यर्थः। तत्र षष्ठ्यर्थे इनिप्रत्ययेन समवायप्रतियोगित्वमित्यर्थे नित्यद्रव्येष्वव्याप्तिः। सप्तम्यर्थ इनिना समवायानुयोगित्वमित्यर्थे सामान्यादावव्याप्तितादवस्थ्यमत आह—

समवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वमिति। समवायश्च न समवेतस्तस्य स्वरूपेण वृत्तेरित्यलम्।

समवेतसमवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वं द्रव्यादीनां चतुर्णां साधर्म्यम्।

सत्तावत्त्वमिति। सत्तावत्त्वं समवायेन विवक्षितम्। तेन एकार्थसमवायेन सत्तायाः सामान्यादिवृत्तित्वेऽपि न क्षतिरिति बोध्यम्।

आद्यक्षणे घटादावतिव्याप्तमिति। 'उत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियं च तिष्ठती'ति नियमात् आद्यक्षणे घटे निर्गुणत्वमतिव्याप्तमिति भावः।

न चोक्तनियमे मानाभावः, गुणं प्रति द्रव्यस्य कारणतया गुणोत्पत्तेः प्राक् कारणी-

न पदार्थविभाजकोपाधिः ॥ १४ ॥

सामान्यपरिहीनास्तु सर्वे जात्यादयो मता ।
पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम् ॥ १५ ॥

सामान्येति । सामान्यानधिकरणत्वं सामान्यादीनामित्यर्थः ।

पारिमाण्डल्येति । पारिमाण्डल्यमणुपरिमाणं, कारणत्वं तद्भिन्नानां साधर्म्यमित्यर्थः । अणुपरिमाणं तु न कस्यापि कारणम् । तद्धि स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत् । तच्च न सम्भवति, परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमान्महदारब्धस्य महत्तरत्ववदणुजन्य-

---

मुक्तावलीमयूखः ।

भूतद्रव्यसत्तायां आवश्यकत्वस्यैव मानत्वात् । द्रव्यगुणयोः सहोत्पत्तौ तु सव्येतरविषाणयोरिव कार्यकारणभावानुपपत्तिः स्यादिति ध्येयम् ॥ १४ ॥

सामान्यपरिहीनास्त्विति । "कृत्यचः" इति णत्वेन सामान्यपरिहीणा इत्येव पाठो युक्त इति ध्येयम् ।

केचित्तु परीत्यस्य 'अधिपरी अनर्थकौ' इत्यनेन कर्मप्रवचनीयतया उपसर्गत्वाभावेन न णत्वप्राप्तिरिति वदन्ति ।

नन्वेकार्थसमवायेन सामान्यवत्त्वं सामान्यादीनामप्यस्तीति जात्यादयः सामान्यपरिहीणा इति कथनमयुक्तमतो व्याचष्टे—**सामान्यानधिकरणत्वमिति** । तथाच वृत्तितानियामकसम्बन्धेन सामान्यवत्त्वं न जात्यादेरिति भावः ।

पारिमाण्डल्येति । पारिमाण्डल्यम् अणुपरिमाणम् । तच्च परमाणुपरिमाणं द्व्यणुकपरिमाणं च । अणुपरिमाणभिन्नानां कारणत्वं साधर्म्यम् । अणुपरिमाणं तु न कस्यापि कारणमिति । अणुपरिमाणं हि स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत् । स्वमणुपरिमाणं, तदाश्रयीभूतं द्रव्यं परमाणुद्व्यणुकं च, तदारब्धं द्रव्यं द्व्यणुकं, त्रसरेणुश्च, तत्परिमाणं द्व्यणुकपरिमाणं त्रसरेणुपरिमाणं च, तस्यैवारम्भकं भवेत् । ततश्च परिमाणस्य स्वसजातीयोत्कृष्टपरिमाणजनकत्वनियमेन महदारब्धस्य महत्तरत्ववदणुजन्यस्याणुतरत्वप्रसङ्गात् ।

ननु द्व्यणुकपरिमाणस्य किंसमवायिकारणमिति चेत् ? तर्हि परमाणुगता द्वित्वसङ्ख्यैवेत्यवेहि । एवं त्रसरेणुपरिमाणस्य द्व्यणुकगतत्रित्वसङ्ख्यैवासमवायिकारणमिति बोध्यम् ।

नन्वेवं कपालगतद्वित्वसङ्ख्यैव घटादिपरिमाणस्यापि कारणमस्तु इति चेत् ? न, द्वित्वसङ्ख्यायामणुपरिमाणारम्भकत्वस्य द्व्यणुके दृष्टतया प्रकृतेऽपि घटपरिमाणस्याणुत्वापत्त्या घटस्याप्रत्यक्षत्वापत्तेः, द्रव्यप्रत्यक्षे महत्त्वस्य कारणत्वात् ।

कारिकायां पारिमाण्डल्यपदं परममहत्परिमाणस्यातीन्द्रियसामान्यस्य विशेषाणां चोपलक्षणम् । तथाच तेषामपि न कुत्रापि कारणत्वमिति बोध्यम् ।

ननु विषयतया प्रत्यक्षं प्रति तादात्म्येन विषयस्य कारणत्वात् परिमाण्डल्यादेरपि योगिप्रत्यक्षे कारणतया पारिमाण्डल्यभिन्नानामित्ययुक्तमिति चेत् ? न, योगजधर्मेणातीतानागतविषयस्यापि प्रत्यक्षत्वाद् योगिप्रत्यक्षे विषयस्य कारणत्वाविनाभ्युपगमात् । तदाह—**इदमपीति** ।

स्याणुतरत्वप्रसङ्गात्। एवं परममहत्परिमाणमतीन्द्रियसामान्यं विशेषाश्च वोध्याः। इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वम्। ज्ञायमानं सामान्यं न प्रत्यासत्तिः। ज्ञायमानलिङ्गं नानुमितिकरणमित्यभिप्रायेणोक्तम्। मानसप्रत्यक्षे आत्ममहत्त्वस्य कारणत्वान्महत्परिमाणं कालादेर्वोध्यम्।

तस्यापि न कारणत्वमित्याचार्याणामाशय इत्यन्ये। तन्न, ज्ञानातिरिक्तं प्रत्येवाकारणतया माचार्यैरुक्तत्वात् ॥ १५ ॥

ननु कारणत्वं किम्? अत आह—

अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता।
कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम् ॥ १६ ॥

मुक्तावलीमयूखः।

ननु ज्ञायमानसामान्यस्य प्रत्यासत्तितया पारिमाण्डल्यादेः सामान्यलक्षणाजन्यज्ञाने कारणत्वात्पुनरपि पारिमाण्डल्यभिज्ञानामित्ययुक्तमिति चेद्? न, ज्ञायमानसामान्यस्य प्रत्यासत्तित्वे यत्र तद्घटनाशानन्तरं तद्घटवतः स्मरणं जातं तत्र सामान्यलक्षणप्रत्यासत्त्या सर्वेषां तद्घटवतां भानापत्तिरतः सामान्यज्ञानस्य सामान्यलक्षणप्रत्यासत्तितयाऽदोषात्। तदाह—ज्ञानमानमिति।

ननु अनुमितिं प्रति ज्ञायमानलिङ्गस्य कारणतया परमाणौ परमाण्वन्तरभेदसाधने विशेषस्य हेतुतया विशेषो न कस्यापि कारणमित्ययुक्तमिति चेत्? न, इयं शाला अतीतवह्निमती, अतीतधूमादित्यनुमितेर्दर्शनेनानुमिति प्रति ज्ञायमानलिङ्गस्य कारणताया अभ्युपगन्तुमनर्हतया लिङ्गज्ञानस्यैव कारणत्वाभ्युपगमात्।

नचैवं धूमादिति पञ्चम्यनुपपत्तिर्धूमस्याहेतुत्वादिति वाच्यम्, धूमपदस्य धूमज्ञानलक्षणया तदुपपत्तेः। तदाह—ज्ञायमानं लिङ्गमिति।

नन्वात्ममानसप्रत्यक्षे आत्ममहत्त्वस्य कारणत्वात्परमहत्परिमाणं न कस्यापि कारणमित्ययुक्तमिति चेद्? न, आत्मपरममहत्त्वातिरिक्तपरममहत्परिमाणं न कस्यापि कारणमिति स्वीकारेणादोषात्।

केचित्तु "कारणत्वं चान्यत्र पारिमाण्डल्यादिभ्यः" इति प्रशस्तपादभाष्यमुपादाय आदिपदेन परमहत्त्वं गृह्यत इति किरणावल्यामुदयनाचार्योक्त्या आत्मपरममहत्परिमाणमपि न कस्यापि कारणमित्यवगम्यते इत्याहुस्तच्च, "कारणत्वं च ज्ञातृधर्मेतरभावकार्योपेक्षया" इति तदुत्तरग्रन्थेन ज्ञानातिरिक्तं प्रत्येवाकारणत्वस्य परममहत्परिमाणे उदयनाचार्याभिमतया आत्मपरममहत्परिमाणस्य ज्ञानेऽपि न कारणत्वमित्याचार्याभिप्रायस्य वक्तुमशक्यत्वात्। तदाह—तस्यापीत्यादिना ॥ १५ ॥

अन्यथासिद्धिशून्यस्येति। अन्यथासिद्धिशून्यत्वे सति कार्याव्यवहितप्राक्क्षणावच्छेदेन नियमेन विद्यमानत्वं कारणत्वम्। दण्डत्वादौ कार्याव्यवहितप्राक्क्षणावच्छेदेन विद्यमानत्वसत्त्वादतिव्याप्तिरतः सत्यन्तम्। यत्किञ्चिद्घटव्यक्तिं प्रति रासभस्य नियतपूर्ववर्तित्वमस्ति, तथापि घटजातीयं प्रति सिद्धकारणभावैर्दण्डादिभिरेव तद्घटकैरपि सम्भवे

समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम् ।
एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम् ॥ १७ ॥

अन्यथासिद्धेति । तस्य कारणत्वस्य ॥ १६ ॥ १७ ॥

यत्समवेतं कार्यं भवति ज्ञेयं तु समवायिजनकं तत् ।
तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् ॥ १८ ॥

तत्रेति । समवायिकारणे मासन्नं प्रत्यासन्नं कारणं द्वितीयमसमवायिकारणमित्यर्थः । अत्र यद्यपि तुरीतन्तुसंयोगानां पटासमवायिकारणत्वं स्यात् । एवं वेगादीनामभिघातादयसमवायिकारणत्वं स्यात् । एवं ज्ञानादिकमपीच्छाद्यसमवायिकारणं स्यात् । तथापि पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगभिन्नत्वं देयम् । तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रत्यसमवायिकारणं भवत्येव । एवं वेगादिकमपि वेगस्पन्दाद्यसमवायिकारणं भवत्येवेति तत्तत्कार्यासमवायिकारणलक्षणे तत्तद्भिन्नत्वं देयम् । आत्मविशेषगुणानां तु कुत्राप्यसमवायिकारणत्वं नास्ति तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेव ।

यत्र समवायिकारणे प्रत्यासत्तिं द्विविधं कार्यैकार्थप्रत्यासत्त्याकारणैकार्थप्रत्यासत्त्या च । आद्यं यथा—घटादिकं प्रति कपालसंयोगादिकमसमवायिकारणम् । तत्र कार्येण घटेन सह कारणस्य कपालसंयोगस्यैकस्मिन्कपाले प्रत्यासत्तिरस्ति । द्वितीयं यथा—घटरूपं प्रति कपालरूपमसमवायिकारणम् । तत्र स्वगतरूपादिकं प्रति समवायिकारणं घटः, तेन सह कपालरूपस्यैकस्मिन्कपाले प्रत्यासत्तिरस्ति । तथा च क्वचित्समवायसम्बन्धेन क्वचित्स्वसमवायिसमवायसम्बन्धेनेति फलितोऽर्थः ।

इत्थं च कार्यैकार्थकारणैकार्थान्यतरप्रत्यासत्त्या समवायिकारणे प्रत्या-

---

मुक्तावलीमयूखः ।

सत्समाऽन्यथासिद्ध इति पदमान्यथासिद्धिमात्रेऽपि तद्घटत्वावच्छिन्नं प्रति तद्घटसमे घटत्वावच्छिन्नेऽनन्यथासिद्धतया तद्घटसमेऽतिव्याप्तिवारणाय नियतेति । नियतविद्यमानत्वमित्यस्य नियतविद्यमानजातीयत्वमित्यर्थः । तेनाऽन्यत्रदण्डेऽपि कारणत्वोपपत्तिरित्यलम् ॥ १६ ॥ १७ ॥

अत्र यद्यपीति । ननु तुरीतन्तुसंयोगस्य पटासमवायिकारणत्वे को दोष इति चेत् ।
न, [illegible]

न चोक्तनियमे मानाभावः, समवायिकारणनाशे द्रव्यनाश इति नियमस्वीकारेणैव द्रव्यनाशोपपत्तेरिति वाच्यम्, द्व्यणुकनाशान्यथानुपपत्त्या तत्कल्पनात् ।

इत्थञ्चेति । यत्कार्यसमवायिकारणे समवायस्वसमवायिसमवेतत्वान्यतरसम्बन्धेन विद्यमानं सत्कारणं ज्ञानादिभिन्नं तत्कार्यं प्रत्यसमवायिकारणमिति पर्यवसन्नम् ।

ननु ज्ञानादीनां किमसमवायिकारणमिति चेदात्ममनःसंयोग एवेति गृहाण ।

सत्त्वं कारणं ज्ञानादिभिन्नमसमवायिकारणमिति सामान्यलक्षणं पर्यवसन्नम्। आभ्यां समवायिकारणासमवायिकारणाभ्यां परं भिन्नं कारणं तृतीयं निमित्तकारणमित्यर्थः ॥ १८ ॥

इदानीमन्यथासिद्धत्वमेव कियतां पदार्थानामत आह—

येन सह पूर्वभावः कारणमादाय वा यस्य।
अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम् ॥ १९ ॥
जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते।
अतिरिक्तमथापि यद्धर्मेन्नियतावश्यकपूर्वभाविनः ॥ २० ॥

येनेति। यत्कार्यं प्रति कारणस्य पूर्ववृत्तिता येन रूपेण गृह्यते तत्कार्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः। यथा घटं प्रति दण्डत्वमिति।

द्वितीयमन्यथासिद्धमाह—कारणमिति। यस्य स्वातन्त्र्येणान्वयव्यति-

---

मुक्तावलीमयूखः।

ननु "समवायिकारणासमवायिकारणभिन्नं कारणं निमित्तकारणम्" इदं लक्षणमयुक्तं तुरीपटसंयोगासमवायिकारणस्य तुरीतन्तुसंयोगस्य पटं प्रति निमित्तत्वानापत्तेरिति चेद् ? न, समवायिकारणत्वासमवायिकारणत्वभिन्नकारणत्वं निमित्तकारणत्वमित्यर्थे तात्पर्येणादोषात् १८

यत्कार्यं प्रतीति। घटकार्यं प्रति दण्डस्य पूर्ववर्तिता दण्डत्वेन गृह्यते, दण्डत्वावच्छिन्नस्य घटं प्रति कारणत्वादिति घटं प्रति दण्डत्वमन्यथासिद्धमिति समन्वयः।

यस्य स्वातन्त्र्येणेति। घटकार्यं प्रति दण्डरूपस्य अन्वयव्यतिरेकौ घटकारणीभूतदण्डमादायैव गृह्येते न स्वातन्त्र्येणेति घटं प्रति दण्डरूपमन्यथासिद्धम्, 'यत्र स्वाश्रयजन्यभ्रमिमत्त्वसम्बन्धेन दण्डरूपं तत्र घटः" इत्यन्वये "यत्रोक्तसम्बन्धेन दण्डरूपाभावस्तत्रघटाभावः" इति व्यतिरेके च स्वाश्रयपदेन दण्डस्यैव ग्रहणेन दण्डमादायैवान्वयव्यतिरेकयोर्ग्रहात्। स्वं दण्डरूपं, तदाश्रयो दण्डः, तज्जन्यभ्रमणत्वं चक्रे, तत्रैव घट इति बोध्यम्। अन्वयव्यतिरेकयोः स्वातन्त्र्यं च 'स्वभिन्नप्रकृतकार्यकारणान्वयव्यतिरेकाप्रयुक्तत्वम्' तच्च प्रकृतान्वयव्यतिरेकयोर्नास्तीति सर्वं सुस्थम्।

न च "कारणमादाय वा यस्य" इति द्वितीयान्यथासिद्धिलक्षणे कारणत्वस्य, कारणत्वलक्षणे अन्यथासिद्धेश्च प्रवेशेनान्योन्याश्रयप्रसङ्ग इति वाच्यम्, पृथगन्वयव्यतिरेकशालित्वरूपकारणत्वस्य अन्यथासिद्धिलक्षणे प्रवेशेनान्योन्याश्रयाभावात्।

ननु द्वितीयान्यथासिद्धिलक्षणस्य दण्डत्वेऽपि सद्भावात् प्रथमान्यथासिद्ध्यनङ्गीकार एवेति चेत् ? न, स्वातन्त्र्येण, यत्कार्यनिरूपितान्वयव्यतिरेकशून्यत्वे सति तत्कार्यकारणावच्छिन्नस्वनिष्ठतत्कार्यनिरूपिततनियतपूर्ववृत्तित्वप्रहविशेष्यतानाश्रयस्तत्कार्यं प्रत्यन्यथासिद्धमित्येवरूपाया द्वितीयान्यथासिद्धेर्दण्डत्वेऽसत्त्वेन प्रथमान्यथासिद्धेरावश्यकत्वात्। तथाहि, दण्डरूपं घटनियतपूर्ववर्ति इति पूर्ववर्तित्वग्रहे घटकार्यकारणीभूतो यो दण्डस्तदवच्छिन्ना घटनियतपूर्ववर्तित्वनिष्ठप्रकारतानिरूपितदण्डरूपनिष्ठा विशेष्यता वर्तते, तदाश्रयो दण्डरूपं स्वतन्त्रान्वयव्यतिरेकशून्यं चेति भवति समन्वयः।

रेको न स्तः, किं तु कारणमादायैवान्वयव्यतिरेकौ गृह्येते तदन्यथासिद्धम्। यथा दण्डरूपम्।

तृतीयमाह—अन्यं प्रतीति। अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम्। यथा घटादिकं प्रत्याकाशस्य। तस्य हि घटादिकं प्रति कारणत्वमाकाशत्वेनैव स्यात्। आकाशत्वं हि शब्दसमवायिकारणत्वम्। एवं च तस्य शब्दं प्रति जनकत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं ग्राह्यमतस्तदन्यथासिद्धम्।

ननु शब्दाश्रयत्वेन तस्य कारणत्वे काऽन्यथासिद्धिरिति चेत्? पञ्चमीति गृहाण। नन्वाकाशस्य शब्दं प्रति जनकत्वे (१)किमवच्छेदकमिति चेत्? कवत्वादिकं(२)विशेषपदार्थो वेति।

चतुर्थमन्यथासिद्धमाह—जनकं प्रतीति। यत्कार्यजनकं प्रति पूर्ववृत्ति-

---

मुक्तावलीमयूखः।

दण्डत्वं घटनियतपूर्ववर्तीति ग्रहे च दण्डत्वनिष्ठा विशेष्यता दण्डत्वत्वावच्छिन्ना न घटकारणीभूतदण्डावच्छिन्नेति न दोष इति। कपालसंयोगो घटपूर्ववर्तीति पूर्ववर्तित्वग्रहे कपालसंयोगनिष्ठविशेष्यतायाः घटकारणकपालावच्छिन्नतया कपालसंयोगेऽतिव्याप्तिरतः सत्यन्तम्। दण्डत्वेऽतिव्याप्तिवारणाय विशेष्यम्। तथाच स्वविशिष्टं स्वं प्रत्यन्यथासिद्धमिति लक्षणं पर्यवसन्नम्। वैशिष्ट्यञ्च स्वनिरूपितस्वतन्त्रान्वयव्यतिरेकशून्यत्व—स्वविशिष्टविशेष्यताश्रयत्वोभयसम्बन्धेन। अत्र वैशिष्ट्यं स्वकारणावच्छिन्नत्व-स्वनिरूपितनियतपूर्ववृत्तित्वनिष्ठप्रकारतानिरूपितत्वोभयसम्बन्धेन। स्वं कार्यमिति बोध्यम्।

प्रथमान्यथासिद्धिस्तु—तद्धर्मावच्छिन्ननिरूपितनियतपूर्ववर्तित्वग्रहविशेष्यतावच्छेदकत्वे सति तद्धर्मावच्छिन्नं प्रति स्वतन्त्रान्वयव्यतिरेकशून्यत्वं तद्धर्मावच्छिन्नं प्रत्यन्यथासिद्धत्वम्। तद्धर्मपदेन घटत्वम्। तमन्वयस्तु दण्डो घटनियतपूर्ववर्तीति ग्रहे घटत्वावच्छिन्ननियतपूर्ववर्तित्वप्रकारकज्ञानीयविशेष्यतावच्छेदकत्वं स्वतन्त्रान्वयव्यतिरेकशून्यत्वं च दण्डत्वस्येति बोध्यः। दण्डरूपेऽतिव्याप्तिवारणाय सत्यन्तम्। कपालसंयोगो घटपूर्ववर्तीतिग्रहमादाय कपालेऽतिव्याप्तिवारणाय विशेष्यम्।

तथाच—स्वविशिष्टं स्वावच्छिन्नं प्रत्यन्यथासिद्धम्। वैशिष्ट्यञ्च—स्वावच्छिन्ननिरूपितनियतपूर्ववर्तित्वनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकत्व-स्वावच्छिन्ननिरूपितस्वतन्त्रान्वयव्यतिरेकशून्यत्वोभयसम्बन्धेन। स्वपदेन कार्यतावच्छेदकीभूतो धर्मो ग्राह्य इति।

अन्यं प्रतीति। ननु कुलालपितुः कुलालं प्रति पूर्ववर्तित्वं गृहीत्वैव घटं प्रति [पूर्ववर्तित्वं गृह्यते, इति कुलालपितुस्तेनैवान्यथासिद्धस्य सतः, चतुर्थेनान्यथासिद्धि. किमर्थमिति चेत्? न, अन्यं प्रतीत्यत्रान्यपदेन प्रकृतकार्यजनकस्य ग्रहणेन कुलालस्य घटजनकत्वेन तस्यान्यपदेन ग्रहणासम्भवात्।

---

(१) आकाशस्य समवायिकारणत्वे समवायिकारणतया अवच्छेदकमाकाशातिरिक्तं किमिति प्रश्नाशयः। (२) ननु कवत्वं क एवेति विनिगमकाभावेन बहूनां वर्णानां कारणतावच्छेदकत्वे गौरवमित्यत आह-विशेषपदार्थो वेति।

त्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम्। यथा कुलालपितुर्घटं प्रति। तस्य हि कुलालपितृत्वेन घटं प्रति जनकत्वे एवान्यथासिद्धिः। कुलालत्वेन जनकत्वे त्विष्टापत्तिः, कुलालमात्रस्य घटं प्रति जनकत्वात्।

पञ्चममन्यथासिद्धमाह—अतिरिक्तमिति। अवश्यकल्पनियतपूर्ववर्तिन एव कार्यसम्भवे तद्भिन्नमन्यथासिद्धमित्यर्थः। अत एव प्रत्यक्षे महत्त्वं कारणम्। अनेकद्रव्यवत्त्वमन्यथासिद्धम्। तत्र हि महत्त्वमवश्यकल्पं तेनानेकद्रव्यवत्त्वमन्यथासिद्धम्।

नच वैपरीत्ये किं विनिगमकमिति वाच्यम्, महत्त्वत्वजातेः कारणतावच्छेदकत्वे लाघवात् ॥ १९ ॥ २० ॥

एते पञ्चान्यथासिद्धा दण्डत्वादिकमादिमम्।
घटादौ दण्डरूपादि द्वितीयमपि दर्शितम् ॥ २१ ॥
तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः।
पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ ॥ २२ ॥

रासभादिरिति। यद्यपि यत्किञ्चिद्घटान्यक्तिं प्रति रासभस्य नियतपूर्ववर्तित्वमस्ति, तथापि घटजातीयं प्रति सिद्धकारणभावैर्दण्डादिभिरेव तद्व्यपतेरपि सम्भवे रासभोऽन्यथासिद्ध इति भावः।

एतेष्विति। एतेषु पञ्चस्वन्यथासिद्धेषु मध्ये पञ्चमोऽन्यथासिद्ध आव-

मुक्तावलीमयूखः।

कुलालपितृत्वेनेति। अयं भावः—कुलालपितृत्वं हि कुलालनिष्ठजन्यतानिरूपितपुंस्त्वसमानाधिकरणजनकतावत्त्वम्। जनकता च पूर्ववर्तित्वघटितेति कुलालपितृत्वेन घटं प्रति जनकत्वाङ्गीकारे कुलालपूर्ववर्तित्वग्रहस्य कुलालपितर्यावश्यकत्वम्। अन्यथा पूर्ववर्तित्वघटितजनकत्वग्रह एव न स्यात्। एवं तृतीयान्यथासिद्ध्युदाहरणे शब्दसमवायिकारणत्वेन आकाशस्य कारणत्वाङ्गीकारे एव घटं प्रत्याकाशमन्यथासिद्धं कारणत्वस्य पूर्ववर्तित्वघटितत्वात्।

शब्दाश्रयत्वेन कारणत्वे तु आश्रयत्वस्य पूर्ववर्तित्वाघटितत्वेन नास्योदाहरणं तत्, किन्तु पञ्चमान्यथासिद्धत्वस्यैति बोध्यम्।

अवश्यकल्पनेति। लघुनियतपूर्ववर्तिन एव कार्यसम्भवे तद्भिन्नमन्यथासिद्धमित्यर्थः।

लाघवादिति। अयं भावः—अनेकद्रव्यत्वं नानेकद्रव्यसमवेतत्वं, तस्य द्व्यणुकेऽपि सत्त्वेन द्व्यणुकप्रत्यक्षापत्तेः। अनेकद्रव्यसमवेतसमवेतत्वं तदित्यपि न, तस्यात्मन्यसत्त्वेऽप्रत्यक्षत्वापत्तेः। किन्त्वणुभिन्नद्रव्यत्वमनेकद्रव्यत्वम्। एवं च महत्त्वस्य प्रत्यक्षं प्रति कारणत्वाङ्गीकारे महत्त्वत्वजातेः कारणतावच्छेदकतया लाघवम्। अनेकद्रव्यत्वस्य कारणत्वे तु गौरवम्, तस्य गुरुशरीरत्वात्। लाघवं त्रिविधं-शरीरकृतं, उपस्थितिकृतं, सम्बन्धकृतञ्च। तत्राद्यमुक्तम्। द्वितीयं—गन्धं प्रति गन्धप्रागभावस्य हेतुता शीघ्रो-

श्यकः, तेनैव परेषां चरितार्थत्वात्। तथाहि—दण्डादिभिरवश्यकल्पनीय-तपूर्ववर्तिभिरेव कार्यसम्भवे दण्डत्वादिकमन्यथासिद्धम्।

न च वैपरीत्ये किं विनिगमकमिति वाच्यम्, दण्डत्वस्य कारणत्वे दण्डघटितपरम्परायाः सम्बन्धत्वकल्पने गौरवात्। एवमन्येषामप्यनेनैव चरितार्थत्वं सम्भवतीति बोध्यम् ॥ २१ ॥ २२ ॥

समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम्।
गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम् ॥ २३ ॥

समवायीति। स्पष्टम्।

गुणकर्मेति। असमवायिकारणत्वं गुणकर्मभिन्नानां वैधर्म्यं न तु गुणकर्मणोः साधर्म्यमित्यत्र तात्पर्यम्। अथवा असमवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्वं तदर्थः। तेन ज्ञानादीनामसमवायिकारणत्वविरहेऽपि न क्षतिः ॥ २३ ॥

अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते।

अन्यत्रेति। नित्यद्रव्याणि परमाणवाकाशादीनि विहायाश्रितत्वं साधर्म्यमित्यर्थः। आश्रितत्वं तु समवायादिसम्बन्धेन वृत्तिमत्त्वम्, विशेषणतया नित्यानामपि कालादौ वृत्तेः।

मुक्तावलीमयूखः।

पस्थितिकत्वात्, न तु रूपप्रागभावस्येति। तृतीयं दण्डत्वादेर्घटकारणत्वे स्वाश्रयभ्रमित्वादि सम्बन्धकृतं गौरवमिति ॥ २१-२२ ॥

ननु गुणकर्ममात्रवृत्तीत्यनेन गुणकर्मणोरसमवायिकारणत्वं साधर्म्यं प्रतीयते, तच्चायुक्तं ज्ञानादीनां कुत्राप्यसमवायिकारणत्वं नास्तीति पूर्वमुक्तत्वादित्यत आह—असमवायिकारणत्वमिति।

ननु साधर्म्यप्रकरणे वैधर्म्यकथनयुक्तमित्यरुचेराह—अथवेति। असमवायिकारणवृत्तीत्यनुपादाने सत्तासामान्यभिन्नद्रव्यत्वजातिमादाय द्रव्येऽतिव्याप्तिः। सत्तासामान्येत्यनुपादाने सत्तामादायोक्तातिव्याप्तितादवस्थ्यम्। जातीत्यनुक्तौ धर्मपदनिवेशे द्रव्यगुणान्यतरत्वमादाय उक्तातिव्याप्तितादवस्थ्यमिति बोध्यम्। असमवायिकारणवृत्तिसत्ताभिन्नगुणत्वजातेर्ज्ञानादौ सत्त्वात् समन्वयः।

नित्यद्रव्येभ्योऽन्यत्राश्रितत्वं साधर्म्यमित्ययुक्तं, गगनं सर्वदैवास्तीति प्रतीत्या कालिकसम्बन्धेन नित्यद्रव्यस्याकाशस्यापि आश्रितत्वादत आह—

आश्रितत्वं च समवायादिसम्बन्धेन वृत्तिमत्त्वमिति। सर्वाधारतानियामककालिकसम्बन्धातिरिक्तसम्बन्धेन वृत्तिमत्त्वमिति यावत्।

न च संयोगेन परमाणोरपि वृत्तितया परमाणावतिव्याप्तिरिति वाच्यम्, पतनप्रतिबन्धकीभूतसंयोगस्यैव वृत्तिनियामकतया गगनपरमाण्वादिसंयोगस्य वृत्त्यनियामकत्वात्।

न च परमाण्वादौ पतनप्रतिबन्धकीभूतः संयोगः किं नेष्यते इति वाच्यम्, जन्य-

इदानीं द्रव्यस्यैव विशिष्य साधर्म्यं वक्तुमारभते—

क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता ॥ २४ ॥
क्षितिर्जलं तथा तेजः पवनो मन एव च ।
परापरत्वमूर्तत्वक्रियावेगाश्रया अमी ॥ २५ ॥

क्षित्यादीनामिति। स्पष्टम्।

क्षितिरिति। पृथिव्यप्तेजोवायुमनसां परत्वापरत्ववत्त्वं मूर्तत्वं क्रियावत्त्वं वेगवत्त्वं च साधर्म्यम्। नच यत्र घटादौ परत्वमपरत्वं वा नोत्पन्नं तत्राव्याप्तिरिति वाच्यं, परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। मूर्तत्वमपकृष्टपरिमाणवत्त्वम्। तच्च तेषामेव, गगनादिपरिमाणस्य कुतोऽप्यपकृष्टत्वाभावात्। पूर्ववत् कर्मवत्त्वं कर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं, वेगवत्त्वं वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं च बोध्यम् ॥ २४ ॥ २५ ॥

कालखात्मदिशां सर्वगतत्वं परमं महत्।
क्षित्यादि पञ्च भूतानि चत्वारि स्पर्शवन्ति हि ॥ २६ ॥

कालेति। कालाकाशात्मदिशां सर्वगतत्वं—सर्वमूर्तसंयोगित्वं, परममहत्त्वं च साधर्म्यम्। परममहत्त्वं जातिविशेषः, अपकर्षानाश्रयपरिमाणत्वं वा।

मुक्तावलीमयूखः।

गुरुत्वस्य पतनकारणतया तदभावादेव परमाणुगगनादौ पतनस्याभावेन तादृशसंयोगस्य पतनप्रतिबन्धकत्वे मानाभावात्।

परत्वादिसमानाधिकरणेति। आत्मन्यतिव्याप्तिवारणाय **समानाधिकरणान्तम्**। सत्तामादाय तत्रैवातिव्याप्तिवारणाय **द्रव्यत्वव्याप्येति**। स्वस्यापि स्वव्याप्यत्वमिति सिद्धान्तात् तादृशं द्रव्यत्वमादायोक्तातिव्याप्तिवारणाय द्रव्यत्वभिन्नत्वेनापि जातिर्विशेषणीया। आत्मपृथिव्यन्यतरत्वमादायात्मन्यतिव्याप्तिवारणाय **जातीति**।

अपकृष्टेति। न च परमाणुपरिमाणस्यापकृष्टत्वाभावात्तत्रव्याप्तिरिति वाच्यम्, अपकृष्टपरिमाणवत्त्वमित्यस्य परममहत्परिमाणभिन्नपरिमाणवत्त्वमित्यर्थे तात्पर्येणादोषात्।

कर्मसमानाधिकरणेति। आत्मन्यतिव्याप्तिवारणाय **समानाधिकरणान्तम्**। सत्तामादाय तत्रैवातिव्याप्तिवारणाय **द्रव्यत्वव्याप्येति**। आकाशपृथिव्यन्यतरत्वमादायाकाशेऽतिव्याप्तिवारणाय **जातीति**। जातिमत्त्वं च समवायेन बोध्यम्।

वेगवद्वृत्तेति। आत्मन्यतिव्याप्तिवारणाय **वृत्त्यन्तम्**। सत्तामादाय तत्रैवातिव्याप्तिवारणाय **द्रव्यत्वव्याप्येति**। आकाशपृथिव्यन्यतरत्वमादायाकाशेऽतिव्याप्तिवारणाय **जातीति** ॥ २४ ॥ २५ ॥

ननु कालादौ स्पन्दासम्भवेन सर्वगतत्वं तत्राव्याप्तमत आह—**सर्वमूर्तेति**।

परममहत्त्वं जातिविशेष इति। गुणपरात्परममहच्छब्दात्त्वप्रत्ययः अत्र इति

क्षित्यादीति । पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वं साधर्म्यम् । तच्च बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम् । अत्र ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वं बोध्यम् । तेन ज्ञातो घट इत्यादिप्रत्यक्षे ज्ञानस्याप्युपनीतभानविषयत्वात् द्रव्यात्मनि नातिव्याप्तिः । न वा प्रत्यक्षाविषयरूपादिमति परमाणवादावव्याप्तिः, तस्यापि स्वरूपयोग्यत्वात् । महत्त्वलक्षणकारणान्तरासन्निधानाच्च न प्रत्यक्षम् । अथवा मात्मावृत्तिविशेषगुणवत्त्वं तत्त्वम् ।

चत्वारीति । पृथिव्यप्तेजोवायूनां स्पर्शवत्त्वम् ॥ २६ ॥

द्रव्यारम्भश्चतुर्षु स्यादथाकाशशरीरिणाम् ।
अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते ॥ २७ ॥

मुक्तावलीमयूखः ।

बोध्यम् । यदि च परमहत्त्वत्वमिति पाठस्तदा द्रव्यपरात्परममहच्छब्दात्त्वप्रत्यये परममहत्त्वमिति, स च गुणस्ततस्त्वप्रत्यये परममहत्त्वत्वं जातिरिति ध्येयम् ।

ननु परममहत्त्वस्य कारणतावच्छेदकत्वेन जातित्वसाधकप्रमाणविरहात्कथं जातित्वम् ? 'अहं परममहान्' इति प्रतीतिविषयपरममहत्त्वस्य गगनपरिमाणसाधारणस्य जातित्वसम्भवेऽपि आत्मपरिमाणमयोग्यमिति टीकाकृन्मते अहं परममहानिति प्रतीतेरभावात्तस्या अपि न जातित्वसाधकत्वमित्यरुचेराह—अपकर्षानाश्रयपरिमाणत्वं वेति ।

ननु परिमाणनिष्ठोत्कर्षापकर्षयोः स्वसजातीयपरिमाणावधिकत्वनियमः । एवं चाणुपरमाणेषु द्व्यणुकपरिमाणमेवापकर्षाश्रयो न परमाणुपरिमाणमिति परमाणावतिव्याप्तिरिति चेद् न, अपकर्षानाश्रयमहत्परिमाणवत्त्वमिति विवक्षणेन परमाणौ महत्परिमाणाभावेनातिव्याप्त्यनवकाशात् ।

बहिरिन्द्रियेति । अन्तरिन्द्रिय (मनो) ग्राह्यसुखादिरूपविशेषगुणस्यात्मनि सत्त्वेनातिव्याप्तिवारणाय बहिःपदम् । परमाणुरूपादेरप्रत्यक्षतया बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वस्य परमाणावव्याप्तिरतो बहिरिन्द्रियग्राह्यजातिमद्विशेषगुणवत्त्वं भूतत्वमिति वक्तव्यम् । ततश्च संयोगप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य कारणतया कालादिवृत्तिसंयोगस्याप्रत्यक्षत्वेऽपि बहिरिन्द्रियग्राह्यजातिमत्त्वस्य तादृशसंयोगेऽपि सत्त्वेन कालादावतिव्याप्तिरतो विशेषेति । द्रव्यत्वमादाय कालादावतिव्याप्तिवारणाय गुणेति ।

यथा 'सुरभि चन्दनखण्डमि'त्यत्र संयोगसन्निकर्षेण चन्दनखण्डस्य स्वसंयुक्तसमवेतसंयुक्तात्मसमवेतज्ञानविषयत्वरूपज्ञानलक्षणसन्निकर्षेण सौरभस्य चाक्षुषं भवति । तथा 'ज्ञातो घट' इति प्रत्यक्षे स्वसंयुक्तसमवेतसंयुक्तात्मसमवेतज्ञानविषयत्वरूपज्ञानलक्षणसन्निकर्षेण ज्ञानस्यापि चाक्षुषमिति बहिरिन्द्रियग्राह्यजातीयज्ञानवत्त्वस्यात्मनि सत्त्वादतिव्याप्तिरतो ग्राह्यत्वं लौकिकसन्निकर्षेति बोध्यम् ।

तथा च बहिरिन्द्रियजन्यलौकिकसन्निकर्षप्रयोज्यज्ञानविषयजातिमद्विशेषगुणवत्त्वं फलितम् ।

अत्रग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वं बोध्यमिति । नन्वेवं चक्षुरादिगतरूपा-

द्रव्यारम्भ इति। पृथिव्यप्तेजोवायुषु चतुर्पुद्रव्यारम्भकत्वं साधर्म्यम्। न च द्रव्यानारम्भके घटादावव्याप्तिः, द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्।

आकाशशरीरिणामिति। आकाशात्मनामव्याप्यवृत्तिक्षणिकविशेषगुणवत्त्वं साधर्म्यमित्यर्थः। आकाशस्य विशेषगुणः शब्दः, स चाव्याप्यवृत्तिर्यदा किञ्चिदवच्छेदेन शब्द उत्पद्यते तदाऽन्यावच्छेदेन तदभावस्यापि सत्त्वात्। क्षणिकत्वं च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्। योग्यविभुविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वात्प्रथमशब्दस्य द्वितीयशब्देन नाशः। एवं ज्ञानादीनामपि। ज्ञानादिकं यदाऽऽत्मनि विभौ शरीरावच्छेदेनोत्पद्यते तदा घटावच्छेदेन तदभावोऽस्त्येव। एवं ज्ञानादिकमपि क्षणद्वयावस्थायि। इत्थं चाव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं चार्थः। पृथिव्यादौ रूपादिर्विशेषगुणोऽस्तीत्यतोऽव्याप्यवृत्तीयुक्तम्। पृथिव्यादावव्याप्यवृत्तिः संयोगादिरस्तीत्यतो विशेषगुणेत्युक्तम्।

न च रूपादीनामपि कदाचित्तृतीयक्षणे नाशसम्भवात्क्षणिकविशेषगुणवत्त्वं क्षित्यादावतिव्याप्तमिति वाच्यम्, चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्भि-

---

मुक्तावलीमयूखः।

दिविशेषगुणानामनुद्भूतत्वेन बहिरिन्द्रियग्रहणायोग्यत्वाच्चक्षुरादावव्याप्तिः, स्वरूपयोग्यत्वमपहाय बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयजातिमद्विशेषगुणवत्त्वविवक्षणेऽपि गौरवमस्त्येवेत्यरुचेराह— आत्मावृत्तीति। ज्ञानमादाय आत्मन्यतिव्याप्तिवारणाय आत्मावृत्तीति। दैशिकपरत्वापरत्वे आदाय मनस्यतिव्याप्तिवारणाय विशेषेति ॥ २६ ॥

द्रव्यसमवायिकारणेति। वृत्यन्तानुपादाने द्रव्यत्वव्याप्यात्मत्वजातिमादायात्मन्यतिव्याप्तिरतो वृत्यन्तम्। द्रव्यत्वमपि द्रव्यत्वव्याप्यमित्युक्तदोषतादवस्थ्यमतो द्रव्यत्वभिन्नेति निवेश्यम्। ज्ञानसमवायिकारणात्मवृत्त्यात्मत्वजातिमादायात्मनि अतिव्याप्तिवारणाय द्रव्यपदम्।

मूले विशेषगुण इष्यते इति। विशेषगुणाश्च—

"बुद्ध्यादिपट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः।
अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः"।
इति वक्ष्यमाणा बोध्याः।

योग्यविशेषगुणेति। यत्र प्रतियोगितासम्बन्धेन योग्यविभुविशेषगुणनाशः तत्र स्वाश्रयानाधिकरण्य—स्वाव्यवहितपूर्ववर्तित्वोभयसम्बन्धेन योग्यविभुविशेषगुणः इति स्वाश्रयानाधिकरण्येन नाशकत्वं बोध्यम्। कार्यतावच्छेदके योग्यत्वानिवेशे प्रायश्चित्तादिजन्यादृष्टनाशे व्यभिचारः स्यादतस्तन्निवेशितम्। योग्यत्वं च लौकिकसाक्षात्कारविषय—निर्विकल्पकान्यतरत्वम् तच्चादृष्टे नास्तीति न दोषः। रूपादिनाशे व्यभिचारवारणाय विभ्विति। संयोगनाशे व्यभिचारवारणाय विशेषेति।

चतुःक्षणवृत्तीति। चतुःक्षणवृत्तीनि यानि जन्यानि घटादीनि तदवृत्तिर्जातिर्यत्र-

शेषगुणवत्त्वस्य तदर्थत्वात्। अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति, क्षणचतुष्टयं तु न किमपि जन्यज्ञानादिकं तिष्ठति।

रूपत्वादिकं तु क्षणचतुष्टयस्थायिन्यपि रूपादौ वर्तत इति तद्व्युदासः। ईश्वरज्ञानस्य चतुःक्षणवृत्तित्वाज्ज्ञानत्वस्य तद्वृत्तित्वाज्जन्येत्युक्तम्। व्योमाकाशजीवात्मनोः साधर्म्यं तदा जन्येति न देयम्। द्वेषत्वादिकमादाय लक्षणसमन्वयात्, परममहत्त्वस्य तादृशगुणत्वाच्चतुर्थक्षणे द्वित्वादीनामपि नाशाभ्युपगमाद् द्वित्वादीनामपि तथात्वाच्चतुरणाय विशेषेति। त्रिक्षणवृत्तित्वं वा वाच्यम्। द्वेषत्वादिकमादायात्मनि लक्षणसमन्वयः ॥ २७ ॥

रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः।
गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः ॥ २८ ॥

पृथिव्यप्तेजसां रूपवत्त्वं, द्रवत्ववत्त्वं, प्रत्यक्षविषयत्वं च साधर्म्यमित्यर्थः। न च चक्षुरादीनां भर्जनकपालस्थवह्निरूपणश्च रूपवत्त्वे किं मानमिति वाच्यम्, तत्रापि तेजस्त्वेन रूपानुमानात्। एवं वाय्वानीतपृथिवीजलतेजोभागानामपि पृथिवीत्वादिना रूपानुमानं बोध्यम्।

न च घटादौ द्रुतसुवर्णादिभिन्ने तेजसि च द्रवत्ववत्त्वमव्याप्तमिति वा-

---

मुक्तावलीमयूखः।

त्वादिः तद्वान् विशेषगुणो ज्ञानादिः, तद्वत्त्वमात्मादाविति लक्षणसमन्वयः।

ननु प्रथमोपस्थितत्वात्त्रिक्षणवृत्तीत्येव वक्तव्ये चतुःक्षणवृत्तीति कथनं किमर्थमत आह—अपेक्षाबुद्धिः क्षणत्रयमिति।

अत्रेदं बोध्यम्, प्रथमम् अयमेकः अयमेकः इत्येवंरूपा अपेक्षाबुद्धिः, ततो द्वित्वोत्पत्तिः, ततो विशेषणज्ञानं द्वित्वत्वनिर्विकल्पात्मकम्, ततो द्वित्वत्वविशिष्टद्वित्वप्रत्यक्षम् अपेक्षाबुद्धिनाशश्च, ततो द्वित्वनाशः, इति प्रक्रिया।

एवं च अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति। यद्यपि जन्यज्ञानानां द्विक्षणमात्रस्थायित्वं 'योग्यविभुविशेषगुणानां स्वोत्तरवर्तिगुणानारम्भकत्वनियमात्' तथापि अपेक्षाबुद्धेर्द्विक्षणमात्रावस्थायित्वे द्वित्वत्वनिर्विकल्पकक्षणेऽपेक्षाबुद्धेर्नाशे तदनन्तरं द्वित्वस्यैव नाशाद् विषयाभावेन द्वित्वस्य प्रत्यक्षं न स्यादतस्त्रिक्षणावस्थायित्वं कल्प्यते इति।

ज्ञानत्वादेर्जन्यवृत्तित्वादसम्भववारणाय चतुःक्षणवृत्तीति। चतुःक्षणवृत्त्यवृत्तीश्वरज्ञानस्य नित्यतया 'चतुःक्षणवृत्तित्वेन ज्ञानत्वस्यातादृशवृत्तिदायेन समन्वयो न स्यादतो जन्येति। चतुःक्षणवृत्तिजन्यावृत्तिपरमहत्त्वत्वजातिमद्गुणवत्त्वस्य कालादौ सत्त्वादतिव्याप्तिरतो विशेषेति।

ननु परममहत्त्वत्वं न जातिः किन्तु अपकर्षानाश्रयपरिमाणत्वमित्युक्तं, तथा च कथं तदादायातिप्रसङ्ग इत्यत आह—चतुर्थक्षणे इति।

प्रथमोपस्थितत्वरूपलाघवमभिसन्धायाह—त्रिक्षणवृत्तित्वे वेति। त्रिक्षणवृत्त्यवृत्तिजातिमद्विशेषगुणवत्त्वमिति लक्षणं निष्पन्नम्।

च्यम्, द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। घृतजतुप्रभृतिषु पृथिवीषु, जलेषु, द्रुतसुवर्णादौ तेजसि, च द्रवत्वसत्त्वात्तत्र च पृथिवीत्वादिसत्त्वात्तदादाय सर्वत्र लक्षणसमन्वयः।

न च प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तमतिव्याप्तं च रूपादाविति वाच्यम्, चाक्षुषलौकिकप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। आत्मन्यतिव्याप्तिवारणाय चाक्षुषेति।

गुरुणी इति। गुरुत्ववत्त्वं रसवत्त्वं च पृथिवीजलयोरित्यर्थः। न च घ्राणेन्द्रियादीनां वाय्वानोतपार्थिवादिभागानां च रसादिमत्त्वे किं मानमिति वाच्यम्, तत्रापि पृथिवीत्वादिना तदनुमानात्।

द्वयोरिति। पृथिवीतेजसोरित्यर्थः। न च नैमित्तिकद्रवत्ववत्त्वं घटादौ वह्न्यादौ चाव्याप्तमिति वाच्यम्, नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्॥ २८॥

आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः।

पृथिव्यप्तेजोवाय्वाकाशात्मनां विशेषगुणवत्त्वं साधर्म्यमित्यर्थः।

यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत्॥ २९॥

ज्ञेयत्वादिकं विहायेति बोध्यम्। तच्च न कस्यापि वैधर्म्यं, केवलान्वयित्वात्॥ २६॥

स्पर्शादयोऽष्टौ वेगाख्यः संस्कारो मरुतो गुणाः।
स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः॥ ३०॥
स्पर्शादयोऽष्टौ वेगश्च गुरुत्वं च द्रवत्वकम्।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश॥ ३१॥

मुक्तावलीमयूखः।

न चैवं त्रिक्षणवृत्तिर्जन्याऽपेक्षाबुद्धिः, तद्वृत्तिरेव ज्ञानत्वम् इति कथं तदादाय समन्वय इति वाच्यम्, द्वेषत्वजातेरतथात्वेन तामादाय लक्षणसमन्वयात्।

न च परमेश्वरे द्वेषाभावात्तत्र लक्षणसमन्वयो न स्यादिति वाच्यम्, आकाशजीवात्मनोः साधर्म्यमित्युक्तया परमेश्वरे लक्षणागमनेऽपि क्षत्यभावात्। यदि च परमात्मनोऽपि साधर्म्यमभिमतं तदा त्रिक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वमिति विवक्षणेन ईश्वरेच्छाया नित्यत्वेन त्रिक्षणवृत्तित्वेऽपि जन्येच्छायास्त्रिक्षणवृत्तित्वाभावेन इच्छात्वमादाय लक्षणसमन्वय इति बोध्यम्।

एवं च द्वेषत्वमादायेति पाठः इच्छात्वमादायेति पाठश्च रम्य इति तत्त्वम्॥२७॥

चाक्षुषलौकिकप्रत्यक्षेति। घटो वायुमानिति वाक्यांशे ज्ञानलक्षणप्रत्यासत्त्या चाक्षुषविषयवायुवृत्तिद्रव्यत्वव्याप्यवायुत्वजातिमति वायावतिव्याप्तिवारणाय लौकिकेति॥ २८॥ २९॥

स्नेहहीना गन्धयुताः क्षितावेते चतुर्दश ।
बुद्ध्यादिपट्कं सङ्ख्यादिपञ्चकं भावना तथा ॥ ३२ ॥
धर्माधर्मौ गुणा एते ह्यात्मनः स्युश्चतुर्दश ।
सङ्ख्यादिपञ्चकं कालदिशोः शब्दश्च ते च खे ॥ ३३ ॥
सङ्ख्यादयः पञ्च बुद्धिरिच्छा यत्नोऽपि चेश्वरे ।
परापरत्वे संस्कारा: पञ्च वेगश्च मानसे ॥ ३४ ॥

ते च खे आकाशे ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

साधर्म्यवैधर्म्ये निरूप्य स्वप्रति प्रत्येकं पृथिव्यादिकं निरूपयति—

तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता ।
षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः ॥ ३५ ॥

गन्धहेतुरिति । गन्धसमवायिकारणमित्यर्थः । यद्यपि गन्धवत्त्वमात्रं लक्षणमुचितं, तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तम् ।

मुक्तावलीमयूखः ।

स्पर्शादयोष्टाविति । अयमत्र संग्रहः—

"वायोर्नवैकादश तेजसो गुणा जलक्षितिप्राणभृता चतुर्दश ।
दिक्कालयो: पञ्च षडेव चाम्बरे महेश्वरेऽष्टौ मनसस्तथैव च" ॥ इति ॥ ३०–३४ ॥

गन्धहेतुत्वस्य पृथिवीलक्षणत्वाङ्गीकारे कालादावतिव्याप्तिरत आह—गन्धसमवायिकारणमित्यर्थ इति ।

तथा च गन्धत्वावच्छिन्नसमवायसम्बन्धावच्छिन्नकार्यतानिरूपितादात्म्यसम्बन्धावच्छिन्नकारणतावत्त्वं पृथिव्या लक्षणं निष्पन्नम् ।

ननु सुरभ्यसुरभिकपालाभ्यामारब्धो घटो निर्गन्ध एव, न हि तत्र सुरभिगन्ध उत्पत्तुमर्हति, समवायेन सुरभिगन्धं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन सुरभिगन्धातिरिक्तगन्धत्वेन प्रतिबन्धकत्वात् । न वा असुरभिगन्धः, समवायेन असुरभिगन्धं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन असुरभिगन्धातिरिक्तगन्धत्वेन प्रतिबन्धकत्वात् । न वा चित्रगन्धस्तस्य, प्रमाणिकैरनभ्युपगमात्तत्र गन्धवत्त्वोपलम्भस्यावयवगन्धेनैवेति तादृशघटे गन्धसमवायिकारणत्वस्याभावेनाव्याप्तिरिति चेद् ?

न, स्वरूपयोग्यतारूपकारणतायास्तत्र सत्त्वेनादोषात्, पदार्थतत्त्वनिरूपणे शिरोमणिभिः तादृशघटे अव्याप्यवृत्तिगन्धोत्पत्तेरेवाभिमततया फलोपधायकतारूपकारणतायास्तत्रसत्त्वाच्च

न च व्याप्यवृत्त्यव्याप्यवृत्तिजातीययोर्विरोधः, मानाभावात् । उक्तप्रतिबन्ध्यप्रतिबन्धकभावश्च हेय एव, गौरवात् । एतेन चित्ररूपमपि प्रत्याख्यातं वेदितव्यम् ।

गन्धवत्त्वमात्रमिति । "ननूत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियं च तिष्ठती"ति नियमात् उत्पत्तिकालीकेघटे गन्धवत्त्वाभावादव्याप्तिरिति चेद् ?

न, गन्धवत्त्वमित्यनेन गन्धवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षणेनादोषात् ।

तथा हि—पृथिवीत्वं हि गन्धसमवायिकारणतावच्छेदकतया सिद्ध्यति अन्यथा गन्धत्वावच्छिन्नस्याकस्मिकत्वापत्तेः।

न च पाषाणादौ गन्धाभावाद्गन्धवत्त्वमसिद्धमिति वाच्यं, तत्रापि गन्धसत्त्वात्। अनुपलब्धिसत्त्वनुत्कटत्वेनाप्युपपद्यते। कथमन्यथा तद्भस्मनि गन्ध उपलभ्यते? भस्मनो हि पाषाणध्वंसजन्यत्वात्पाषाणोपादानोपादेयत्वं सिद्ध्यति। "यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमि"ति व्याप्तेः। दृष्टं चैतत्खण्डपटे महापटध्वंसजन्ये। इत्थं च पाषाणपरमाणोः पृथिवीत्वात्तज्जन्यस्य पाषाणस्यापि पृथिवीत्वम्। तथा च तस्यापि गन्धवत्त्वे बाधकाभावः।

नानारूपेति। शुक्लनीलादिभेदेन नानाजातीयं रूपं पृथिव्यामेव वर्तते न तु जलादौ, तत्र शुक्लस्यैव सत्त्वात्। पृथिव्यां तु एकस्मिन्नपि

मुक्तावलीमयूखः।

द्रव्यत्वव्याप्यजलत्वजातिमादाय जलेऽतिव्याप्तिवारणाय वृत्त्यन्तम्। सत्तामादाय जलादावतिव्याप्तिवारणाय द्रव्यत्वव्याप्येति। गन्धवत्त्वं वृत्तिमत्त्वं च समवायेन। अन्यथा कालिकेन गन्धवत्त्वस्य जलादौ सत्त्वेन तत्समवेतां, गन्धवति घटे कालिकेन वृत्तिमतीं वा जलत्वजातिमादायातिव्याप्तिस्तदवस्थैव स्यात्।

ननु 'इयं पृथिवी' इत्यनुगता प्रतीतिः घृतजतुप्रभृतिषु नास्तीति न तया पृथिवीत्वजातिसिद्धिसम्भव इति पृथिवीत्वजातौ किं प्रमाणमिति चेद्?

उच्यते, 'समवायेन गन्धं प्रति तादात्म्येन पृथिवी कारणमि'ति कार्यकारणभावात् समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नकार्यतानिरूपिता या तादात्म्यसम्बन्धावच्छिन्ना पृथिवीनिष्ठा कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् इत्यनुमानेन पृथिवीत्वजातिसिद्धिः,

ननूक्तकार्यकारणभावे किम्मानमिति चेद्?

न, उक्तकार्यकारणभावानङ्गीकारे गन्धत्वावच्छिन्नस्याकस्मिकत्वापत्त्या जलादावपि गन्धोत्पादप्रसङ्गात्।

ननु गन्धवत्त्वस्य पृथिवीलक्षणत्वे पाषाणेऽव्याप्तिरिति चेद्।

न, पाषाणो गन्धवान्, पृथिवीत्वात् पुष्पवत् इत्यनुमानेन तत्रापि गन्धसिद्धेः।

ननु तस्य पृथिवीत्वे एव किम्मानमिति चेद्? पाषाणः पृथिवी, गन्धवद्द्रव्यारब्धत्वात् घटवत् इत्यनुमानमेव गृहाण।

ननु पाषाणावयवानां गन्धवत्त्वे किम्मानमिति चेद्?

न, पाषाणावयवा गन्धवन्तः, गन्धवद्भस्मद्रव्यारम्भकत्वात् इत्यनुमानस्यैव मानत्वात्।

ननु भस्मनः पाषाणावयवारब्धत्वे किं मानमिति चेद्? भस्म पाषाणोपादानोपादेयं पाषाणध्वंसजन्यत्वात्, 'यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयं' महापटध्वंसजन्यखण्डपटवदिति ब्रूमः।

यद्द्रव्यमिति। घटध्वंसप्रत्यक्षे घटोपादानानुपादेये व्यभिचारवारणाय प्रथमं द्रव्यपदम्। अथ वा घटध्वंसजन्यरूपध्वंसे व्यभिचारवारणाय तत्। दण्डप्रागभावध्वंसस्य दण्डरूपतया तज्जन्ये घटे, नवीनमते दण्डप्रागभावध्वंसस्य दण्डरूपत्वानङ्गीकारेण दण्ड-

र्मिणि पाकवशेन नानारूपसम्भवात् । न च यत्र नानारूपं नोत्पन्नं तत्राव्याप्तिरिति वाच्यं, रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य वा वाच्यत्वात् । वैशेषिकनये पृथिवीपरमाणौ रूपनाशस्य रूपान्तरस्य च सत्त्वात् । न्यायनये घटादावपि तत्सत्त्वाल्लक्षणसमन्वयः ।

षड्विध इति । मधुरादिभेदेन यः षड्विधो रसः स पृथिव्यामेव ।

मुक्तावलीमयूखः ।

जन्यघटादौ व्यभिचारासम्भवे तु मिथ्याज्ञानध्वंसजन्यकार्यव्यूहे, व्यभिचारवारणाय द्वितीयं द्रव्यपदम् । प्रतिबन्धकव्यावर्त्यनन्तभावजन्ये द्रव्ये व्यभिचारवारणाय ध्वंसपदम् ।

ननु पाषाणो गन्धवान्, पृथिवीत्वादित्यनुमानं न सम्भवति, निर्गन्धघटे व्यभिचारादिति चेत् ?

न, सुरभ्यसुरभिकपालाभ्यामारब्धेऽपि घटे गन्धवत्त्वस्य नव्यैरङ्गीकारेण व्यभिचाराभावात् ।

केचित्तु पाषाणः पृथिवी, गन्धवदुपादानोपादेयत्वादित्यनुमानेन पाषाणे पृथिवीत्वं साधयित्वा गन्धवत्त्वमित्यस्य गन्धवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वपरिष्कारेण पाषाणे लक्षणसमन्वयं वदन्ति ।

रूपद्वयेति । रूपद्वयवान् घटादिस्तद्वृत्तिर्द्रव्यत्वव्याप्या जातिः पृथिवीत्वं तद्वत्त्वं पटादौ इति लक्षणसमन्वयः । द्रव्यत्वव्याप्यजलत्वजातिमादाय जलेऽतिव्याप्तिवारणाय वृत्यन्तम् । रूपद्वयवद्वृत्तिसत्ताजातिमादाय जलादावतिव्याप्तिवारणाय द्रव्यत्वव्याप्येति । रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजलपृथिव्यन्यतरत्वमादाय जलेऽतिव्याप्तिवारणाय जातीति ।

वृत्तिमत्त्वं जातिमत्त्वं च समवायेनैव विवक्षितम् । अन्यथा जलत्वं पृथिवीत्वं चादाय जलेऽतिव्याप्तिः स्यात् ।

नन्वेवं रूपद्वयवति समवायेन जलपृथिव्यन्यतरत्वं न वर्तत इत्यत एव दोषवारणसम्भवे जातीति व्यर्थमिति चेत् ?

न, रूपद्वयवति समवायेन वर्तमानं जलपृथिव्युभयत्वमादायैव प्रसक्तातिव्याप्तिवारणार्थत्वात् ।

ननु रूपद्वयेति लक्षणे रूपनिष्ठं द्वित्वं न सङ्ख्यारूपं, गुणे गुणानङ्गीकारात्, किन्तु अपेक्षाबुद्धिविशेषविषयत्वरूपं, तथा च अपेक्षाबुद्धीनां नानात्वेन इदं लक्षणं गुरु, इति गौरवाज्ञायघटितं लघुलक्षणमाह—रूपनाशेति ।

वैशेषिकनये पृथिवीपरमाणौ पाकेन रूपनाशस्य रूपान्तरोत्पादस्य चाङ्गीकारात्, न्यायनये घटे पृथिवीपरमाणौ च तयोरभ्युपगमात् रूपनाशवान्पृथिवीपरमाणुः, तद्वृत्तिर्द्रव्यत्वव्याप्या जातिः पृथिवीत्वं पटादाविति लक्षणसमन्वयः ।

जलत्वमादायातिव्याप्तिवारणाय वृत्यन्तम् । सत्तामादाय जलादावतिव्याप्तिवारणाय द्रव्यत्वव्याप्येति ।

वृत्तित्वं जातिमत्त्वं च समवायेन बोद्धव्यम् । तद्वयावृत्तिश्च पूर्ववद्बोध्या इति ।

जले च मधुर एव रसः। अत्रापि पूर्ववद्रसद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणार्थोऽवसेयः।

गन्धस्त्विति। द्विविध इति वस्तुस्थितिमात्रं, न द्विविधगन्धवत्त्वं लक्षणं, द्विविधत्वस्य व्यर्थत्वात्। द्वैविध्यं च सौरभासौरभभेदेन बोध्यम् ॥३५॥

स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः।

तस्याः पृथिव्याः। अनुष्णाशीतस्पर्शवत्त्वं वायोरपि वर्तत इत्युक्तं पाकज इति। इत्थं च पृथिव्याः स्पर्शोऽनुष्णाशीत इति ज्ञापनार्थं तदुक्तम्। वस्तुतस्तु पाकजस्पर्शवत्त्वमात्रं लक्षणम्, अधिकस्य वैयर्थ्यात्। यद्यपि पाकजस्पर्शः पटादौ नास्ति तथापि पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः।

नित्यानित्या च सा द्वेया नित्या स्यादणुलक्षणा ॥ ३६ ॥
अनित्या तु तदन्या स्यात्सैवावयवयोगिनी।
सा च त्रिधा भवेद्देहमिन्द्रियं विषयस्तथा ॥ ३७ ॥

सा पृथिवी त्रिविधा, नित्या अनित्या चेत्यर्थः। अणुलक्षणा परमाणुरूपा पृथिवी नित्या। तदन्या परमाणुभिन्ना पृथिवी द्व्यणुकादिरूपा सर्वाऽप्यनित्येत्यर्थः। सैव-अनित्या पृथिव्येव, अवयववतीत्यर्थः।

ननु अवयविनि किं मानं, परमाणुपुञ्जैरेवोपपत्तेः। न च परमाणूनामतीन्द्रियत्वाद्घटादेः प्रत्यक्षं न स्यादिति वाच्यम्, एकस्य परमाणोर-

---

मुक्तावलीमयूखः।

ननु यत्र नाना रसा नोत्पद्यास्तत्राव्याप्तिरत आह—रसद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमिति।

रसद्वयवदात्रफलम्, तद्वृत्तिद्रव्यत्वव्याप्यपृथिवीत्वजातिमादाय एकरसवति गुडादौ समन्वयः। व्यावृत्तिः पूर्ववत्।

अपेक्षाबुद्धिविशेषविषयत्वरूपद्वित्वघटितत्वेन गौरवानुसन्धाने अत्रापि रसनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमित्येवं लक्षणं बोध्यम्। यद्यपि षड्विधस्तु रसस्तत्रेति मूलेन षड्विधरसवद्वृत्तीत्यादेव लक्षणं प्रतीयते, तथापि द्वित्वापेक्षया षट्त्वस्य गुरुत्वात्पक्षं मुक्तावलीकृतेति विज्ञेयम्।

ननु गन्धस्य पृथिव्यामेव सत्त्वेन गन्धवत्त्वमात्रस्यैव लक्षणत्वं युक्तं न तु द्विविधगन्धवत्त्वस्येत्यत आह—द्विविध इति वस्तुस्थितिमात्रमिति ॥ ३५ ॥

पाकजस्पर्शवदिति। जलत्वमादाय जलादावतिव्याप्तिवारणाय वृत्त्यन्तम्। सत्तामादाय तत्रैवातिव्याप्तिवारणाय द्रव्यत्वव्याप्येति। जलपृथिव्युभयत्वमादाय तत्रैवातिव्याप्तिवारणाय जातीति। तत्रैवातिव्याप्तिवारणाय पाकजेति।

ननु पृथिवीत्वजातिमत्त्वमपि पृथिवीलक्षणं सम्भवति, तत्कथं त्यक्तमिति चेद्?

न, पृथिवीत्वस्य लक्ष्यतावच्छेदकत्वेन लक्षणत्वासम्भवात्।

प्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वात्। यथैकस्य केशस्य दूरेऽप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वम्। न चैको घटः स्थूल इति बुद्धेरनुपपत्तिरिति वाच्यम्, एको महान्धान्यराशिरितिवदुपपत्तेः।

मैवं, परमाणोरतीन्द्रियत्वेन तत्समूहस्यापि प्रत्यक्षायोग्यत्वात्। दूरस्थकेशस्तु नातीन्द्रियः, सन्निधाने तस्यैव प्रत्यक्षत्वात्। न च तदानीमदृश्यपरमाणुपुञ्जाद् दृश्यपरमाणुपुञ्जस्योत्पन्नत्वाच्च प्रत्यक्षत्वे विरोध इति वाच्यम्, अदृश्यस्य दृश्यानुपादानत्वात्। अन्यथा चक्षुरुन्मादिसन्ततेरपि कदाचिद् दृश्यत्वप्रसङ्गात्। न चातितप्ततैलादौ कथमदृश्यदहनसन्ततेर्दृश्यदहनोत्पत्तिरिति वाच्यम्, तत्र तदन्तःपातिभिर्दृश्यैरेव दहनावयवैः स्थूलदहनोत्पत्तेरुपगमात्। न चादृश्येन द्व्यणुकेन कथं दृश्यत्रसरेणोरुत्पत्तिरिति वाच्यं, यतो न दृश्यत्वमदृश्यत्वं वा कस्यचित्स्वभावादाचक्ष्महे किन्तु महत्त्वोद्भूतरूपादिकारणसमुदायवशाद् दृश्यत्वं, तदभावे चादृश्यत्वम्। तथा च त्रसरेणोर्महत्त्वात्प्रत्यक्षत्वं न तु द्व्यणुकादेस्तदभावात्। न हि त्वन्मतेऽपि सम्भवतोर्वं, परमाणौ महत्त्वाभावात्। इत्थं चावयविसिद्धौ तेषामुत्पादविनाशयोः प्रत्यक्षत्वादनित्यत्वम्।

तेषां चावयवावयवधारायाः अनन्तत्वे मेरुसर्षपयोरपि साम्यप्रसङ्गः। अतः क्वचिद्विश्रामो वाच्यः। यत्र तु विश्रामस्तस्यानित्यत्वेऽसमवेतभावकार्योत्पत्तिप्रसङ्ग इति तस्य नित्यत्वम्। महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिवाणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वमस्तीति तस्य परमाणुत्वसिद्धिः। न च त्रसरेणावेव विश्रामोऽस्त्विति वाच्यं, त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन तदवयवसिद्धौ, त्रसरेणोरवयवाः सावयवाः महदारम्भकत्वात् कपालवदित्यनुमानेन तदवयवसिद्धेः। न चेदमप्रयोजकम्, अपकृष्टमहत्त्वं प्रत्यनेकद्रव्यवत्त्वस्य प्रयोजकत्वात्। न चैवं क्रमेण तदवयवधाराऽपि सिध्येदिति वाच्यम्, अनवस्थाभयेन तदसिद्धेरिति।

सा चेति। सा कार्यरूपा पृथिवी त्रिधा शरीरेन्द्रियविषयभेदादित्यर्थः ॥ ३६ ॥ ३७ ॥

मुक्तावलीमयूखः।

मेरुसर्षपयोरिति। साम्यं परिमाणतारतम्याभावः, परिमाणप्रचयकारणीभूतावयवप्रचयया उभयत्र साम्यादिति भावः। न च मेर्ववयवानां सर्षपतुल्यपरिमाणत्वं न तु सर्षपावयवानां सर्षपतुल्यपरिमाणत्वमित्यवयवपरिमाणद्वैशेष्य इति वाच्यम् मेर्ववयवसर्षपावयवयोरप्यनन्तत्वेन तत्परिमाणतारतम्या भावस्यापादनीयत्वात्।

अनेकद्रव्यवत्त्वस्येति। अनेकद्रव्यसमवेतत्वं नानेकद्रव्यवत्त्वं, द्व्यणुके महत्त्वोत्पादप्रसङ्गात्। किन्तु अनेकद्रव्यसमवेतसमवेतत्वमेव तत्। समन्वयश्च अनेकद्रव्यं परमाणुद्वय, तत्समवेतं द्व्यणुकं, तत्समवेतत्रसरेणुरिति बोध्यम्।

द्वाभ्यां परमाणुभ्यां द्व्यणुकं, त्रिभिर्द्व्यणुकैस्त्रसरेणुर्जायते इति प्रक्रिया। त्रसरेणुपदं च

तत्र देहमुदाहरति—

योनिजादि भवेद्देहमिन्द्रियं घ्राणलक्षणम्।
विषयोऽणुकादिश्च ब्रह्माण्डान्त उदाहृतः ॥ ३८ ॥

योनिजमयोनिजं चेत्यर्थः। योनिजमपि द्विविधं जरायुजमण्डजं च। जरायुजं मानुषादीनाम्। अण्डजं सर्पादीनाम्। अयोनिजं स्वेदजोद्भिज्जादिकम्। स्वेदजाः कृमिदंशाद्याः। उद्भिज्जास्तरुगुल्माद्याः। नारकिणां शरीरमप्ययोनिजम्।

न च मानुषादिशरीराणां पार्थिवत्वे किं मानमिति वाच्यं, गन्धादिमत्त्वस्यैव प्रमाणत्वात्। न च क्लेदोष्मादेरुपलम्भादाप्यत्वादिकमपि स्यादिति वाच्यं, तथा सति जलत्वपृथिवीत्वादिना सङ्करप्रसङ्गात्। न च तर्हि जलीयत्वादिकमेवास्तु न तु पार्थिवत्वमिति वाच्यं, क्लेदादीनां विनाशेऽपि शरीरत्वेन प्रत्यभिज्ञानाद्गन्धाद्युपलब्धेश्च पृथिवीत्वसिद्धेः। तेन पार्थिवादिशरीरे जलादीनां निमित्तत्वमात्रं बोध्यम्।

शरीरत्वं तु न जातिः, पृथिवीत्वादिना साङ्कर्यात् किन्तु चेष्टाश्रयत्वम्। वृक्षादीनामपि चेष्टासत्त्वान्नाव्याप्तिः। न च वृक्षादेः शरीरत्वे किं मानमिति वाच्यम्, आध्यात्मिकवायुसम्बन्धस्य प्रमाणत्वात्। तत्रैव किं मानमिति चेद्? भग्नक्षतसंरोहणादिना तदनुमानात्। यदि हस्तादौ शरीरव्यवहारो न भवति तदाऽन्त्यावयवित्वेन विशेषणीयम्। न च यत्र शरीरे चेष्टा न जाता तत्राव्याप्तिरिति वाच्यं, तादृशे प्रमाणाभावात्। अथवा चेष्टावदन्त्यावय-

---

मुक्तावलीमयूखः।

त्रेमिद्वर्थं णुकैरारब्धे द्रव्ये रूढम्। यद्वा त्रिभिस्सहितो रेणुस्त्रसरेणुरिति पृषोदरादित्वात्साधुरिति बोध्यम् ॥ ३६ ॥ ३७ ॥

जलत्वपृथिवीत्वादिना सङ्करप्रसङ्गादिति। पृथिवीत्वाभाववति तडागजले जलत्वं, जलत्वाभाववति घटे पृथिवीत्वं, मनुष्यशरीरे जलत्वपृथिवीत्वयोः समावेशात् परस्परात्यन्ताभावसमानाधिकरणधर्मयोरेकत्र समावेशरूपसङ्करदोषप्रसङ्गः स्यादित्यर्थः।

शरीरत्वं तु न जातिः, पृथिवीत्वादिना साङ्कर्यादिति। पृथिवीत्वाभाववति जलीयशरीरे शरीरत्वं, शरीरत्वाभाववति घटादौ पृथिवीत्वं, मनुष्यशरीरे पृथिवीत्वशरीरत्वयोः समावेशात्सङ्करः स्यादित्यर्थः।

अन्त्यावयवित्वेन विशेषणीयमिति। तथा च अन्त्यावयवित्वे सति चेष्टाश्रयत्वं शरीरत्वमिति लक्षणं निष्पन्नम्। अन्त्यावयवित्वं च द्रव्यानारम्भकद्रव्यत्वम्।

ननु घटादावपि क्रियासत्त्वात्तत्राप्यव्याप्तिरेवेति चेत्?

न, चेष्टापदेन हिताहितप्राप्तिपरिहारार्था क्रिया, न तु क्रियामात्रमित्यदोषात्।

मृतशरीरेऽव्याप्तिरत आह—अथवेति।

ननु मृतशरीरेऽपि। पूर्वं चेष्टासत्त्वाल्लक्षणसमन्वयाच्चाव्याप्तिरिति चेत्?

न, यत्र मरणानन्तरं खण्डशरीरान्तरमुत्पन्नं तत्राव्याप्तिरित्याशयात्।

विवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वम्, अन्त्यावयविमात्रवृत्तिचेष्टावद्वृत्तिजातिमत्त्वं वा तत्। मानुषत्वचैत्रत्वादिजातिमादाय लक्षणसमन्वयः।

न च नृसिंहशरीरे कथं लक्षणसमन्वयः, तत्र नृसिंहत्वस्यैकव्यक्तिवृत्तितया जातित्वाभावाज्जलीयतैजसशरीरवृत्तितया देवत्वस्यापि जातित्वाभावादिति वाच्यं, कल्पभेदेन नृसिंहशरीरस्य नानात्वेन नृसिंहत्वजातेः लक्षणसमन्वयात्।

इन्द्रियमिति। घ्राणेन्द्रियं पार्थिवमित्यर्थः पार्थिवत्वं कथमिति चेत्! इत्थम्, घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात्, कुङ्कुमगन्धाभिव्यञ्जकगोघृतवत्। न च दृष्टान्ते स्वकीयरूपादिव्यञ्जकत्वादसिद्धिरिति वाच्यं, परकीयरूपाद्यव्यञ्जकत्वस्य तदर्थत्वात्। न च नवपरावगन्धव्यञ्जकजलेऽनैकान्तिकत्वमिति वाच्यं, तस्य सक्तुरसाभिव्यञ्जकत्वात्। यद्वा परकीयेति न देयं वापूपनीतसुरभिमागस्य दृष्टान्तत्वसम्भवात्। न च घ्राणेन्द्रियसन्निकर्षस्य गन्धमात्रव्यञ्जकत्वात् तत्र व्यभिचार इति वाच्यं, द्रव्यत्वे सतीति विशेषणात्।

विषय इति। उपभोगसाधनं विषयः। "सर्वमेव हि कार्यजातमदृष्टाधीनम्"। यत्कार्यं यदृष्टाधीनं तत्तदुपभोगं साक्षात्परम्परया वा जनयत्येव। न हि योज्यप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति। तेन द्व्यणुकादि ब्रह्माण्डान्तं सर्वमेव विषयो भवति। शरीरेन्द्रिययोर्विषयत्वेऽपि प्रकारान्तरोपन्यासः शिष्यबुद्धिवैशद्यार्थः ॥ ३८ ॥

मुक्तावलीमयूखः।

चेष्टावदिति। घटत्वमादाय घटेऽतिव्याप्तिवारणाय चेष्टावदिति। हस्तत्वमादाय हस्तेऽतिव्याप्तिवारणाय अन्त्यावयवेति।

नन्व हस्तत्वं न जातिः, पृथिवीत्वादिना साङ्कर्यादिति वाच्यम्, पृथिवीत्वादिव्याप्यनानाघटत्ववत् पृथिवीत्वादिव्याप्यनानाहस्तत्वाङ्गीकारेणादोषात्। सत्तामादायातिव्याप्तिवारणाय द्रव्यत्वव्याप्येति।

ननु तादृशपृथिवीत्वजातिमादाय घटादावतिप्रसङ्गो दुर्वार इयत आह—अन्त्यावयविमात्रवृत्तीति। अन्त्यावयविमात्रवृत्ति चेष्टावद्वृत्ति च मनुष्यत्वं चैत्रत्वं वा, तद्वत्त्वं चैत्रशरीरे इति लक्षणसमन्वयः। द्रव्यत्वमादायातिव्याप्तिवारणाय प्रथमं वृत्त्यन्तम्। घटत्वमादायातिव्याप्तिवारणाय द्वितीयं वृत्त्यन्तम्।

न च नृसिंहशरीर इति। बाल्ययौवनावस्थाभेदेन चैत्रशरीरस्य नानात्वेन चैत्रत्वस्य नैकव्यक्तिवृत्तित्वं नृसिंहशरीरस्य तु नित्यत्वेन नानात्वासम्भवादेकत्वमिति अनेकव्यक्तिवृत्तित्वाभावात् नृसिंहत्वं न जातिरिति भावः।

घ्राणेन्द्रियसन्निकर्षस्येति। स्वसंयुक्तसमवायसम्बन्धस्येत्यर्थः। परकीयेति विशेषणप्रक्षेप एव पूर्वलक्षणे गौरवमिति बोध्यम् ॥ ३८ ॥

जलं निरूपयति—

वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ।
स्नेहस्तत्र, द्रवत्वं तु सांसिद्धिकमुदाहृतम् ॥ ३९ ॥

स्नेहसमवायिकारणतावच्छेदकतया जलत्वजातिः सिद्ध्यति। यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया न कार्यतावच्छेदकं, तथापि जन्यस्नेहत्वं तथा वोध्यम्।

अथ परमाणौ जलत्वं न स्यात्तत्र जन्यस्नेहाभावात्, नित्यस्य च स्वरूपयोग्यत्वे फलावश्यम्भावनियमादिति चेत्?

न जन्यस्नेहजनकतावच्छेदकतया जन्यजलत्वजातेः सिद्धौ, तद्वच्छिन्नजनकतावच्छेदकतया जलत्वजातिसिद्धेः।

मुक्तावलीमयूखः।

ननु जलत्वजातौ किंप्रमाणम् 'इदं जलं इदं जलम्' इति प्रतीतेः पामराणां हिमादित्वभावादिति चेद्?

उच्यते—समवायेन स्नेहं प्रति तादात्म्येन जलं कारणमिति कार्यकारणभावात् समवायसम्बन्धावच्छिन्नस्नेहत्वावच्छिन्नकार्यतानिरूपिता या तादात्म्यसम्बन्धावच्छिन्ना जलनिष्ठा कारणता सा किंचिद्धर्मावच्छिन्ना कारणतात्वात्, इत्यनुमानेन स्नेहसमवायिकारणतावच्छेदकविधया जलत्वं जातिः सिध्यति।

ननु स्नेहनिष्ठकार्यतावच्छेदकत्वं स्नेहत्वस्य न सम्भवति, अन्यूनानतिप्रसक्तधर्मस्यैव अवच्छेदकत्वनियमेन स्नेहत्वस्य नित्यानित्यवृत्तितया कार्यताऽतिरिक्तवृत्तित्वात्। एवं च स्नेहत्वावच्छिन्नकार्यत्वाप्रसिद्धया तन्निरूपितकारणतारूपपक्षाप्रसिद्धौ नोक्तानुमानसम्भव इति चेद्?

न, स्नेहत्वस्यातिप्रसक्तत्वेऽपि जन्यस्नेहत्वस्यानतिप्रसक्ततया समवायसम्बन्धावच्छिन्नजन्यस्नेहत्वावच्छिन्नकार्यतानिरूपिता तादात्म्यसम्बन्धावच्छिन्नाजलनिष्ठा कारणताकिंचिद्धर्मावच्छिन्ना, कारणतात्वात् इत्यनुमानेन जलत्वजातिसिद्धिसम्भवात्।

नन्वेवमपि परमाणौ जन्यस्नेहाभावेन जन्यस्नेहत्वावच्छिन्नकार्यतानिरूपितकारणतायास्तत्राभावेन जलत्वस्य कारणताऽतिरिक्तवृत्तितया न सिद्धिसम्भवः, किन्तु जन्यजलत्वस्यैव।

न च स्वरूपयोग्यतारूपकारणतायास्तत्रापि सत्त्वमिति वाच्यम्, नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भावनियमेन स्वरूपयोग्यतारूपकारणतायाऽपि तत्रासम्भवादिति चेद्?

न, जन्यस्नेहत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकविधया पूर्वोक्तानुमानेन जन्यजलत्वसिद्धौ समवायसम्बन्धावच्छिन्नजन्यजलत्वावच्छिन्नकार्यतानिरूपिता या तादात्म्यसम्बन्धावच्छिन्ना जलनिष्ठा कारणता सा किंचिद्धर्मावच्छिन्ना, कारणतात्वादित्यनुमानेन जलत्वजातिसिद्धिरित्यदोषात्।

नन्वेवमपि अन्त्यावयविनि जले जन्यजलत्वावच्छिन्नकार्यतानिरूपितकारणताया असम्भवेन न तत्साधारणजलत्वजातिसिद्धिसम्भव इति चेत्?

शुक्लरूपमेव जलस्येति दर्शयितुमुक्तं वर्णः शुक्ल इति। ननु शुक्लरूपवत्त्वं लक्षणम्। अथवा नैमित्तिकद्रवत्ववद्वृत्तिरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्, अभास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः। तेन स्फटिकादौ नातिव्याप्तिः।

रसस्पर्शौचिति। जलस्य मधुर एव रसः, शीत एव स्पर्शः। तिक्तरसवदवृत्तिमधुरवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं तदर्थः। तेन शर्करादौ नातिव्याप्तिः। शीतेतरस्पर्शवदवृत्तिस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं तदर्थः।

ननु-शुक्लरूपवत्त्वमेवेति कुतः, कालिन्दीजलादौ नीलिमोपलब्धेरितिचेद्—न, नीलजनकतावच्छेदिकायाः पृथिवीत्वजातेरभावाज्जले नीलरूपासम्भवात्। कालिन्दीजले नीलत्वप्रतीतिस्त्वाश्रयौपाधिकी। अत एव वियति विक्षेपे धवलिमोपलब्धिः। अथ जले माधुर्यं किं मानम्? नहि प्रत्यक्षेण कोऽपि रसस्तत्रानुभूयते।

न च नारिकेलजलादौ माधुर्यमुपलभ्यत एवेति वाच्यं, तस्या श्रयोपा-

---

मुक्तावलीमयूखः।

न, सर्वस्मिन्नपि जले जलान्तरसंयोगेन बृहज्जलजननयोग्यतासत्त्वात् जलस्यान्त्यावयवित्वानुपपत्तेरदोषादिति दिक्।

न त्विति। पृथिव्यादावतिव्याप्तेरिति शेषः। शुक्लरूपवत्त्वस्य लक्षणत्वेऽपि न क्षतिरित्याशङ्क्याह—अथवेति। पृथिव्यामतिव्याप्तिवारणाय नैमित्तिकद्रवत्ववद्वृत्तीति। वायावतिव्याप्तिवारणाय रूपवद्वृत्तीति। पटत्वमादायातिव्याप्तिवारणाय द्रव्यत्वसाक्षाद्व्याप्येति।

ननु कारिकास्थशुक्लरूपपदयोर्लक्षणेऽप्रवेशेन कारिकोऽननुगुण्यमित्यरुचेराह—अभास्वरशुक्लेति। पृथिवीत्वमादाय पृथिव्यामतिव्याप्तिवारणायासमानाधिकरणान्तम् जलत्वस्य शुक्लरूपसमानाधिकरण्यसम्भवाद् असम्भव इति रूपे शुक्लेतरत्वं विशेषणम्। तेजस्त्वमादाय तेजस्यतिव्याप्तिवारणाय अभास्वरेति। वायुत्वमादाय वायावतिव्याप्तिवारणाय रूपवद्वृत्तीति। पटत्वमादायातिव्याप्तिवारणाय साक्षादिति।

न च पटे नीलरूपस्यापि अनुमवसिद्धत्वात्पटत्वमित्ययुक्तम् इति वाच्यम्, नीलपटे नीलं रूपं नीलयुक्तद्रव्यान्तरस्यैव न तु पटस्येत्यदोषात्। द्रव्यत्वसाक्षाद्व्याप्यत्वं च द्रव्यत्वव्याप्याव्याप्यत्वं, तच्च न पटादावस्त्येवदोषः। जलघटान्यतरत्वमादायातिव्याप्तिवारणाय जातीति।

ननु शीतस्पर्शवत्त्वस्य जललक्षणत्वे शर्करादावतिव्याप्तिरत आह—तिक्तरसेति। पृथिवीत्वमादाय पृथिव्यामतिव्याप्तिवारणाय प्रथमं वृत्त्यन्तम्। तेजस्त्वादिमादायातिव्याप्तिवारणाय द्वितीयं वृत्त्यन्तम्। शर्करात्वमादायातिव्याप्तिवारणाय साक्षादिति। जलतेऽन्यतरत्वमादायातिव्याप्तिवारणाय जातीति।

शीतेतरेति। द्रव्यत्वमादायातिव्याप्तिवारणाय शीतेतरस्पर्शवदवृत्तीति। आ-

धिकत्वात् । अन्यथा जम्बीररसादावम्लाद्युपलब्धेरम्लादिमत्त्वमपि स्यादिति चेत् ?

न-हरीतक्यादिभक्षणस्य जलरसव्यञ्जकत्वात् । न च हरीतक्यामेव जलोष्मसंयोगाद्रसान्तरोत्पत्तिरिति वाच्यं, कल्पनागौरवात् । पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्च जले नाम्लादिकम् । जम्बीररसादौ त्वाश्रयौपाधिकी तथा प्रतीतिः ।

एवं जन्यशीतस्पर्शजनकतावच्छेदकं जन्यजलत्वं तदवच्छिन्नजनकतावच्छेदकं तु जलत्वं बोध्यम् । घृष्टचन्दनादौ तु शैत्योपलब्धिश्चन्दनान्तर्वर्तिशीततरसलिलस्यैव । तेजःसंयोगाज्जले उष्णप्रतीतिरौपाधिकी स्फुटैव, तत्र पाकासम्भवात् ।

स्नेहस्तत्रेति । घृतादावपि तदन्तर्वर्तिजलस्यैव स्नेहः, जलस्य स्नेहसमवायिकारणत्वात् । तेन जल एव स्नेह इति मन्तव्यम् ।

द्रवत्वमिति । सांसिद्धिकद्रवत्वत्वं जातिविशेषः प्रत्यक्षसिद्धः । तदवच्छिन्नजनकतावच्छेदकमपि तदेवेति भावः । तैलादावपि जलस्य द्रवत्वं स्नेहप्रकर्षेण च दहनानुकूल्यमिति वक्ष्यति ॥ ३९ ॥

नित्यतादि प्रथमवत्किन्तु देहमयोनिम् ।
इन्द्रियं रसनं सिन्धुहिमादिर्विषयो मतः ॥ ४० ॥

प्रथमवदिति । पृथिव्या इवेत्यर्थः । तथा हि, जलं द्विविधं—नित्यमनित्यं च । परमाणुरूपं नित्यं, द्व्यणुकादिकं सर्वमनित्यमवयवसमवेतं च ॥ अनित्यमपि त्रिविधं-शरीरेन्द्रियविषयभेदात् ।

पृथिवीतो यो विशेषस्तमाह-किन्विति । देहमयोनिजम् , अयोनिजमेवेत्यर्थः । जलीयं शरीरं वरुणलोके प्रसिद्धम् ।

मुक्तावलीमयूखः ।

त्मत्वमादायातिव्याप्तिवारणाय स्पर्शवद्वृत्तीति । अस्मिल्लक्षणे द्रव्यत्वसाक्षाद्व्याप्येति सम्पातायातम् ।

एवं जन्यशीतस्पर्शेति । समवायसम्बन्धावच्छिन्नजन्यशीतस्पर्शतावच्छिन्नकार्यतानिरूपिता या तादात्म्यसम्बन्धावच्छिन्ना जन्यजलनिष्ठा कारणता सा किञ्चिद्धर्मावच्छिन्ना, कारणतात्वात् इत्यनुमानेन जन्यजलत्वजातिसिद्धौ, समवायसम्बन्धावच्छिन्नजन्यजलत्वावच्छिन्नकार्यतानिरूपिता या तादात्म्यसम्बन्धावच्छिन्ना जलनिष्ठा कारणता सा किञ्चिद्धर्मावच्छिन्ना, कारणतात्वात् इत्यनुमानेन जलत्वं जातिः सिध्यतीति भावः ।

तदेवेति । जन्यजलत्वमेवेत्यर्थः । तदवच्छिन्नजनकतावच्छेदकं जलत्वमिति भावः ।

स्नेहप्रकर्षेण च दहनानुकूल्यमिति । स्नेहो द्विविधः, घनीभूतः, अघनीभूतश्च । तत्राद्यो दहनानुकूलः, परश्च दहनप्रतिकूल इति तत्त्वम् । एवञ्च तप्ततैलादौ घनीभूतस्य तस्य घृत्वेन तत्र जलबिन्दुप्रक्षेपे सद्य एव ज्वालाजटिलस्याग्नेरुत्पत्तिः ॥ ३९ ॥

जलीयं शरीरमिति । तच्च पार्थिवावयवैरुपबृंहितं बोध्यम् । तेन जलमात्रे दूस-

इन्द्रियमिति । जलीयमित्यर्थः । तथाहि, रसनं जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात् सक्तुरसाभिव्यञ्जकोदकवत् । रसनेन्द्रियसन्निकर्ष-व्यभिचारवारणाय द्रव्यत्वं देयम् ।

विषयं दर्शयति-सिन्धुहिमादिरिति । सिन्धुः समुद्रः । हिमं तुषारः । आदिपदात्सरित्कासारकरकादिः सर्वोऽपि ग्राह्यः । न च हिमकरकयोः कठिनत्वात्पार्थिवत्वमिति वाच्यम्, उष्मणा विलीनस्य तस्य जलत्वस्य प्रत्यक्षसिद्धत्वात् । 'यद्द्रव्यं यद्द्रव्यध्वंसजन्यमि'ति व्याप्तेर्जलोपादानोपादेय-त्वसिद्धेः, अदृष्टविशेषेण वा द्रवत्वप्रतिरोधात् । करकादीनां काठिन्य प्रत्यक्षस्य भ्रान्तित्वात् ॥ ४० ॥

तेजो निरूपयति—

उष्णः स्पर्शस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम् ।
नैमित्तिकं द्रवत्वं तु नित्यतादि च पूर्ववत् ॥ ४१ ॥

उष्णत्वं स्पर्शनिष्ठो जातिविशेषः प्रत्यक्षसिद्धः । इत्थं च जन्योष्णस्पर्श-समवायिकारणतावच्छेदकं तेजस्त्वं जातिविशेषः । तस्य परमाणुवृत्तित्वं तु जलत्वस्येवानुसन्धेयम् ।

न चोष्णस्पर्शवत्त्वं चन्द्रकिरणादावव्याप्तमिति वाच्यं, तत्राप्युष्णत्वस्य सत्त्वात् । किन्तु तदन्तःपातिजलरूपेणाभिभवादग्रहः । एवं रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवाच्चक्षुरादौ चानुद्भूतत्वादग्रहः ।

रूपमित्यादि । वैश्वानरे मरकतकिरणादौ च पार्थिवरूपेणाभिभवाच्छु-क्लरूपाग्रहः ।

ननु तद्रूपाग्रहे घर्मिणोऽपि चाक्षुषत्वं न स्यादिति चेत् ? न, अन्यदीय-रूपेणापि घर्मिणो ग्रहसम्भवात्, शङ्खस्येव पित्तपीतिम्ना । वह्नेस्तु शुक्लरूपं नाभिभूतं किन्तु तदीय शुक्लत्वमभिभूतमित्यन्ये ।

मुक्तावलीमयूखः ।

पादादिव्यवस्थाया नानुपपत्तिः एवं तेजः शरीरेऽपि बोध्यम् । पार्थिवशरीरेऽपि पिण्डादि-दर्शनाज्जलाणुपष्टम्भोऽस्त्येवेति भावः ।

उष्मणा विलीनस्य तस्येति । सप्तम्यर्थे षष्ठी । तथा च करकादिद्रव्ये नष्टे सति द्रव्यान्तरोपादानत्व द्रवत्वजलत्वयोः प्रत्यक्षम् । द्रव्यान्तरस्य च जलोपादानकत्वमेव । आह—यद्द्रव्यमिति । 'यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयम्' इति व्याप्तिः । पार्थिवत्वाभावे काठिन्यप्रत्यक्षोपपत्तिमाह—अदृष्टेति ॥ ४० ॥

तेजस्त्वं जातिविशेष इति । समवायसम्बन्धावच्छिन्नजन्योष्णस्पर्शत्वावच्छिन्न-कार्यतानिरूपिता या तादात्म्यसम्बन्धावच्छिन्ना जन्यतेजोनिष्ठा कारणता सा किंचिद्धर्मा-वच्छिन्ना कारणतात्वादित्यनुमानेन जन्यतेजस्त्वजातिसिद्धौ, समवायसम्बन्धावच्छिन्नजन्य-तेजस्त्वावच्छिन्नकार्यतानिरूपिता या तादात्म्यसम्बन्धावच्छिन्ना तेजोनिष्ठा कारणता सा

नैमित्तिकमिति। सुवर्णादिरूपे तेजसि तत्सत्त्वात्। न च नैमित्तिकद्रवत्वं न लक्षणं दहनादावव्याप्तं घृतादावतिव्याप्तं चेति वाच्यं, पृथिव्यवृत्ति नैमित्तिकद्रवत्ववद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्य विवक्षितत्वात्।

पूर्ववदिति। जलस्येवेत्यर्थः। तथाहि, तद् द्विविधं-नित्यमनित्यं च। तत्र नित्यं परमाणुरूपम्। तदन्यदनित्यम्, अवयवि च। तच्च त्रिधा शरीरेन्द्रियविषयभेदात्; शरीरमयोनिजमेव। तच्च सूर्यलोकादौ प्रसिद्धम् ॥ ४१ ॥

अत्र यो विशेषस्तमाह—

इन्द्रियं नयनं, वह्निस्वर्णादिर्विषयो मतः।

ननु चक्षुषस्तैजसत्वे किं मानमिति चेत्? चक्षुस्तैजसं परकीयस्पर्शाव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रदीपवत्; प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वादत्र दृष्टान्तेऽव्याप्तिवारणाय प्रथमं परकीयेति। घटादेः स्वीयरूपव्यञ्जकत्वाद्व्यभिचारवारणाय द्वितीयं परकीयेति। अथवा प्रभाया दृष्टान्तत्वसम्भवादाद्यं परकीयेति न देयम् चक्षुःसन्निकर्षव्यभिचारवारणाय द्रव्यत्वं देयम्।

विषयं दर्शयति-वह्निरिति। ननु सुवर्णस्य तैजसत्वे किं मानमिति चेद्? न, सुवर्णं तैजसम्, असति प्रतिबन्धके अत्यन्तानलसंयोगेऽप्यनुच्छिद्यमान-

---

मुक्तावलीमयूखः।

किञ्चिद्धर्मावच्छिन्ना कारणतात्वादित्यनुमानेन तेजस्त्वं जातिः सिध्यतीति भावः।

पृथिव्यवृत्तीति। नैमित्तिकद्रवत्ववद्वृत्तिपृथिवीत्वजातिमादाय पृथिव्यामतिव्याप्तिवारणाय पृथिव्यवृत्तीति। पृथिव्यवृत्तिजलत्वमादाय जलेऽतिव्याप्तिवारणाय नैमित्तिकद्रवत्ववद्वृत्तीति। जलतेजोऽन्यतरत्वमादायातिव्याप्तिवारणाय जातीति। अत्र द्रव्यत्वसाक्षाद्व्याप्येति सम्पातायातम् ॥ ४१ ॥

वस्तुतस्तु-वृत्तित्वं वृत्तिभेदेन भिन्नं 'सामान्याभावे प्रमाणाभाव'इति मते पृथिव्यवृत्तित्वपदेन पृथिवीनिरूपितसमवायसम्बन्धावच्छिन्नतत्तद्वृत्तित्वव्यक्तेरभावकूटो लक्षणे निवेशनीयः, तदनिवेश्य लाघवेन पृथिवीत्वनिष्ठवृत्तित्वव्यक्तेरभावमात्रं निवेश्य द्रव्यत्वसाक्षाद्व्याप्यत्वनिवेशनैव घटत्वद्रव्यत्वादिकमादाय लक्षणातिव्याप्तिर्वारणीया। एवं च पृथिवीत्वव्यक्तिभिन्नत्वेसति नैमित्तिकद्रवत्ववद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वमिति निष्कर्ष इति वदन्ति।

रामरुद्रभट्टाचार्यास्तु—नैमित्तिकद्रवत्ववद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वमिति जातिपदस्य द्रव्यत्वसाक्षाद्व्याप्यजातिपरत्वेऽपि न निस्तारः किन्तु पृथिव्यवृत्तीतिविशेषणादेवेति सूचयितुं साक्षात्पदमिति वदन्ति।

आद्यं परकीयेति न देयमिति। त्रसरेणोस्त्वाचप्रत्यक्षस्यानभ्युपगमेन स्पर्शाव्यञ्जकत्वे सति रूपव्यञ्जकत्वस्य सत्त्वात्पार्थिवत्रसरेणौ व्यभिचारवारणाय द्वितीयपरकीयं तु देयमेवेति ध्येयम्।

ननु सुवर्णं पार्थिवं नैमित्तिकद्रवत्ववत्त्वादित्यनुमानेन सुवर्णस्य पार्थिवत्वमेवास्तु कथं तैजसत्वमिति चेद्।

जन्यद्रवत्वात्, यन्नेवम् तन्नैवम्, यथा पृथिवीति। न पृथिवीद्रवत्वस्य जन्यजलद्रवत्वस्य चात्यन्ताग्निसंयोगनाश्यत्वात्।

ननु पीतिमगुरुत्वाश्रयस्य पार्थिवभागस्यापि तदानीं द्रुतत्वात् व्यभिचार इति चेत्? न, जलमध्यस्थमपीक्षोदवत्तस्याद्रुतत्वात्।

अपरे तु पीतिमाश्रयस्य अत्यन्ताग्निसंयोगेऽपि पूर्वरूपापरावृत्तिदर्शनात्तत्प्रतिबन्धकं विजातीयद्रवद्रव्यं कल्प्यते। तथा हि-अत्यन्ताग्निसंयोगे पीतिमगुरुत्वाश्रयः विजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तः, अत्यन्ताग्निसंयोगे सत्यपि पूर्वरूपविजातीयरूपानधिकरणत्वात्, जलमध्यस्थपीतपटवत्। तस्य च पृथिवीजलभिन्नस्य तैजसत्वनियमात्।

वायुं निरूपयति—

अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः ॥ ४२ ॥
तिर्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः।
पूर्ववन्नित्यताद्युक्तं देहव्यापि त्वगिन्द्रियम् ॥ ४३ ॥

मुक्तावलीमयूखः।

उच्यते; सुवर्णं तैजसम्, असति प्रतिबन्धकेऽत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानद्रवत्वात् यन्नैवं तन्नैवं, यथा पृथिवीत्यनुमानेन सुवर्णे तैजसत्वसिद्धिः।

न चात्र पीतरूपवद्द्रव्यात्मकस्य सुवर्णस्य पक्षत्वे बाधः तैजससुवर्णस्य पक्षत्वे अनुमानत्वे तैजससुवर्णस्याप्रसिद्ध्या पक्षाप्रसिद्धिः, सुवर्णपदवाच्यस्य पक्षत्वे धर्मशास्त्रे पीतद्रव्येऽपि सुवर्णपदप्रयोगाद्बाधतादवस्थ्यमिति वाच्यम्। असति प्रतिबन्धकेऽत्यन्तानलसंयोगे सति अनुच्छिद्यमानद्रवत्वाधिकरणस्यैव पक्षतयाऽदोषात्।

जलमध्यस्थघृतादौ व्यभिचारवारणाय असति प्रतिबन्धक इति। असति प्रतिबन्धके अनुच्छिद्यमानद्रवत्वादित्येतन्मात्रोक्तौ अग्नेरसमवधाने कथञ्चिदग्निसंयोगे वा अनुच्छिद्यमानद्रवत्वस्य घृतादौ सत्त्वेन व्यभिचारवारणाय-अत्यन्तानलसंयोगेऽपीति।

ननु उच्छिद्यमानो द्रवो यस्य स उच्छिद्यमानद्रवः न उच्छिद्यमानद्रवः अनुच्छिद्यमानद्रवः तस्य भावस्तत्त्वमिति व्युत्पत्त्या उच्छिद्यमानद्रवत्वाधिकरणभिन्नत्वमिति हेतुर्लभ्यते ततश्च गगने व्यभिचार इति चेद्?

न, न उच्छिद्यमानो द्रवो यस्य सोऽनुच्छिद्यमानद्रवः तस्य भावस्तत्त्वमिति व्युत्पत्त्या अनुच्छिद्यमानद्रवत्वाधिकरणत्वं हेतुर्लभ्यते, तादृशहेतोश्च गगनेऽप्रत्वेन व्यभिचाराभावात्।

नचात्रयोऽप्रकम् "अग्नेरपत्यं प्रथमं हिरण्यम्" इति आगमस्य, पृथिवीद्रवत्वस्य जन्यजलद्रवत्वस्य च अत्यन्ताग्निसंयोगनाश्यतया सुवर्णद्रवत्वस्य चाक्षुषत्वानुभवस्य, च अनुकूलतर्कस्य सत्त्वात्।

जलमध्यस्थेति। क्षोदक्षुण्णम्।

पूर्वानुमाने पीतिमगुरुत्वाश्रयस्य द्रुतत्वाद्व्यभिचारमाशङ्क्य तस्याद्रुतत्वेन समाहितमिदानीं पीतिमगुरुत्वाश्रयस्य द्रुतत्वमभ्युपगम्यापि समाधत्ते-अपरे तु इत्यादिना।

अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वादुक्तमपाकज इति। अपाकजस्पर्शस्य जलादावपि सत्त्वादुक्तमनुष्णाशीत इति। तेन वायवीयो विजातीयः स्पर्शो दर्शितः। तज्जनकतावच्छेदकं वायुत्वमिति भावः। एष वायुः स्पर्शादिलिङ्गकः। वायुर्हि स्पर्शशब्दधृतिकम्पैरनुमीयते विजातीयस्पर्शेन विलक्षणशब्देन तृणादीनां धृत्या शाखादीनां कम्पेन च वायोरनुमानात्। यथा च वायोर्न प्रत्यक्षं तथाऽग्रे वक्ष्यते।

पूर्ववदिति। वायुर्द्विविधो नित्योऽनित्यश्च। परमाणुरूपो नित्यस्तदन्योऽनित्योऽवयवसमवेतश्च। सोऽपि त्रिविधः, शरीरेन्द्रियविषयभेदात्। तत्र शरीरमयोनिजं पिशाचादीनाम्। परन्तु जलीयतैजसवायवीयशरीराणां पार्थिवभागोपष्टम्भादुपभोगक्षमत्वं जलादीनां प्राधान्याज्जलीयत्वादिकमिति।

अत्र यो विशेषस्तमाह-देहव्यापीति। शरीरव्यापकं स्पर्शग्राहकमिन्द्रियं त्वक्। तच्च वायवीयं, रूपादिषु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वात् अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवत् ॥ ४२ ॥ ४३ ॥

मुक्तावलीमयूखः।

ननु सुवर्णस्य तैजसत्वेऽन्धकारे कुतो न तद्ग्रहः, सुवर्णरूपालोकसंयोगसत्त्वादिति चेद्? न, उद्भूतानभिभूतरूपालोकसंयोगस्यैव द्रव्यप्रत्यक्षे हेतुत्वात् सुवर्णरूपस्य त्वभिभूतत्वात्।

ननु मूले—'अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः' इत्युक्तं, तेन अपाकजानुष्णाशीतस्पर्शवत्त्वं वायोर्लक्षणं गम्यते तच्च पटादावतिव्याप्तमिति चेद्? न, पाकजस्पर्शवदनुष्णाशीतस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्य तदर्थत्वेनादोषात्।

तज्जनकतावच्छेदकमिति। समवायसम्बन्धावच्छिन्नविजातीयस्पर्शत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्ना कारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् इत्यनुमानेन वायुत्वं जातिः सिध्यतीति भावः। परमाणुवृत्तित्वं तु तस्य जलत्वस्येवानुसन्धेयम्।

ननु स्पार्शनप्रत्यक्षे स्पर्शस्य कारणतास्वीकारकारिनव्यमते वायोः प्रत्यक्षत्वेऽपि बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे उद्भूतरूपस्य कारणत्वाभ्युपगन्तृप्राचीनमते वायोरप्रत्यक्षतया तत्र किं प्रमाणमिति चेद्? उच्यते, *विजातीयस्पर्शेन विलक्षणशब्देन तृणादीनां धृत्या शाखादीनां कम्पेन च वायोरनुमानसम्भव* इति। तथाहि, योऽयं रूपवद्द्रव्यासमवेतः स्पर्शः स क्वचिदाश्रितः स्पर्शत्वात् पृथिवीसमवेतस्पर्शवत्। पृथिव्यादिस्पर्शे सिद्धसाधनवारणाय रूपवद्द्रव्यासमवेत इति विशेषणम्।

एवम् असति रूपवद्द्रव्याभिघाते योऽयं पर्णादिषु शब्दसन्तानः स स्पर्शवद्वेगवद्द्रव्यसंयोगजन्यः अविभज्यमानावयवद्रव्यसम्बन्धिशब्दसन्तानत्वात् दण्डाभिहतभेरीशब्दसन्तानवत्। पृथिव्याद्यभिघातजन्ये सिद्धसाधनवारणायासतीति पक्षविशेषणम्। विभागजन्यनि शब्दे व्यभिचारवारणाय हेतावविभज्यमानेति।

एवम्, नभसि तृणतूलस्तनयित्नुविमानादीनां धृतिः स्पर्शवद्वेगवद्द्रव्यसंयोगहेतुका अस्मदायनधिष्ठितद्रव्यधृतित्वात् नौकाधृतिवत्। जलादिगततृणादौ सिद्धसाधनवारणाय वमनीति। प्रयत्नवदात्मसंयोगहेतुकधृतौ व्यभिचारवारणायास्मदादीति।

विषयं दर्शयति—

प्राणादिस्तु महावायुपर्यन्तो विषयो मतः ।

यद्यप्यनित्यो वायुश्चतुर्विधः, तस्य चतुर्थी विधा प्राणादिरित्युक्तमाकरे, तथापि सङ्क्षेपाद्त्र त्रैविध्यमुक्तम् । प्राणस्त्वेक एव हृदादिनानास्थानवशान्मुखनिर्गमादिनानाक्रियावशात् नानासञ्ज्ञां लभत इति ।

आकाशं निरूपयति—

आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ॥ ४४ ॥

आकाशकालदिशामेकैकव्यक्तित्वादिकं न जातिः । किन्तु आकाशत्वं शब्दाश्रयत्वम् । वैशेषिक इति कथनं तु विशेषगुणान्तरव्यवच्छेदाय । एतेन प्रमाणमपि दर्शितम् । तथाहि, शब्दो विशेषगुणः चक्षुग्रहणायोग्यबहिरिन्द्रियग्राह्यजातीयत्वात् स्पर्शवत् । शब्दो द्रव्यसमवेतो गुणत्वात् संयोगवत् इत्यनुमानेन शब्दस्य द्रव्यसमवेतत्वे सिद्धे शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभावे सत्यकारणगुणपूर्वकप्रत्यक्षत्वात् सुखवत् । पाकजरूपादौ व्यभिचारवारणायसत्यन्तम् । पटरूपादौ व्यभिचारवारणायाकारणगुणपूर्वकेति । जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षे-

---

मुक्तावलीमयूखः ।

एवम्, रूपवद्द्रव्याभिघातमन्तरेण तूले कर्म स्पर्शवद्वेगवद्द्रव्याभिघातजन्यं विजातीयकर्मत्वात् मदपराहतकाशादिकर्मवदिति ॥ ४२ ॥ ४३ ॥

आकरे इति । प्रशस्तपादभाष्यादावित्यर्थः ।

स्थानवशादिति ।

'हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ।
उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः ॥'

इत्यभियुक्तोक्तेरिति भावः ।

आकाशं निरूपयतीति । निपूर्वकरूपयतेः प्रतिपत्त्यनुकूलव्यापारोऽर्थः, तिबर्थः कृतिः । आकाशपदोत्तरद्वितीयाया विषयताऽर्थः । तथाच आकाशनिष्ठविषयतानिरूपकप्रतिपत्त्यनुकूलव्यापारानुकूलवर्तमानकालिककृतिमान् एकत्वावच्छिन्नो ग्रन्थकार इति बोधः ।

कालत्वं दिक्त्व न जातिरित्यत्र कथने गौरवमतो लाघवेन युगपदेव कथयति—आकाशकालेति ।

शब्दाश्रयत्वमिति । आश्रयता चात्र समवायेन । तेन कालिकसम्बन्धेन शब्दस्य काले सत्वेऽपि न क्षतिः ।

ननु आकाशस्य शब्दो गुण इत्येव कथनेन सिद्धे वैशेषिकपदस्य वैयर्थ्यमाशङ्क्याह-वैशेषिक इतीति । शब्दो द्रव्यमिति मीमांसकमतनिरासाय गुणपदम् ।

नन्वाकाशसद्भावे किम्मानमिति चेद्? उच्यते, शब्दः अष्टद्रव्यातिरिक्तद्रव्याश्रितः अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वादित्यनुमानेन आकाशसिद्धिरिति । नच विशेषण-

ति। शब्दो न दिक्कालमनसां गुणो विशेषगुणत्वात्। नात्मविशेषगुणो बहिरिन्द्रियग्राह्यत्वाद्रूपवत्। इत्थं च शब्दाधिकरणं नवमं द्रव्यं गगननामकं सिध्यति।

नच वाय्ववयवेषुसूक्ष्मशब्दक्रमेण वायौ कारणगुणपूर्वकः शब्द उत्पद्यतामिति वाच्यम्, (१)यावद्द्रव्यभावित्वेन वायुविशेषगुणत्वाभावात् ॥ ४४ ॥

तत्र शरीरस्य विषयस्य चाभावादिन्द्रियं दर्शयति—

इन्द्रियं तु भवेच्छ्रोत्रमेकः सन्नप्युपाधितः।

नन्वाकाशं लाघवादेकं सिद्धं श्रोत्रं तु पुरुषभेदेन भिन्नं कथमाकाशं स्यादिति चेत्तत्राह—एकः सन्नपीत्यादि। आकाश एक एव सन्नपि उपाधेः कर्णशष्कुल्यादेर्भेदाद्भिन्नं श्रोत्रात्मकं भवतीत्यर्थः।

मुक्तावलीमयूखः।

सिद्धिरिति वाच्यम्, शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकत्वे सति प्रत्यक्षत्वात् सुखवत्। शब्दो न दिक्कालमनसां गुणः विशेषगुणत्वात् रूपवत् नात्मविशेषगुणः बहिरिन्द्रययोग्यत्वाद्रूपवत् इत्यनुमानैरष्टद्रव्यानाश्रितत्वसिद्धया विशेषणासिद्धयभावात्। न च विशेषगुणत्वस्य शब्देऽसिद्धत्वाद् द्वितीयानुमाने स्वरूपासिद्धिरिति वाच्यम्। शब्दो विशेषगुणः चक्षुर्ग्रहणयोग्यबहिरिन्द्रियग्राह्यजातिमत्त्वात् स्पर्शवदित्यनुमानेन शब्दे विशेषगुणत्वसिद्धया स्वरूपासिद्धत्वाभावात्।

नच शब्दे द्रव्याश्रितत्वसिद्धया आकाशसाधकहेतोर्विशेष्यासिद्धत्वमिति वाच्यम्, शब्दो द्रव्यसमवेतः गुणत्वात् संयोगवदित्यनुमानेन द्रव्याश्रितत्वसिद्धौ विशेष्यासिद्धयभावात्।

ननु शब्दस्य वायुगुणत्वमेवास्त्वित्याशङ्क्य—नच वाय्ववयवेष्विति ॥ ४४ ॥

जन्यानां जनक इति। एतेन कालिकसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपितमधिकरणतया निमित्तत्वं काललक्षणं फलितम्। कालिकसम्बन्धावच्छिन्नेति निवेशाद्दिशि, अधिकरणतयेति दानाददृष्टेश्वरयोर्नातिव्याप्तिः।

नन्वेवमात्माश्रयः, कालिकपदस्य स्वरूपसम्बन्धविशेषपरत्वेनादोषात्।

ननु कार्यमात्रं प्रति कालस्य निमित्तकारणत्वे किम्मानमिति चेत्? तदुत्पत्त्यधिकरणस्य तदुत्पत्तिहेतुत्वं, तदुत्पत्तिहेतोश्च तद्धेतुत्वमिति नियम एवेति गृहाण। कालस्य कार्योत्पत्त्यधिकरणत्वं तु "अद्य घटो भविष्यति" "श्वः पटो भविता" इति प्रत्ययात्।

नच तत्तत्कार्यविशेषं प्रति तत्तत्कालविशेषस्य हेतुत्वसिद्धावपि कार्यसामान्ये न कालस्य हेतुत्वसिद्धिरिति वाच्यम्, "यद्विशेषयोस्तित्सामान्ययोरपीति" न्यायेन कार्यमात्रे कालस्य हेतुत्वसिद्धेः।

नच कार्यमात्रे कालस्य हेतुता न सम्भवति स्वसमवेतद्वित्वपृथक्त्वादिकं प्रति कालस्य समवायिकारणतया समवायिकारणभिन्नत्वघटितस्य निमित्तकारणत्वस्य कालेऽसत्त्वादिति वाच्यम्, कालस्य समवायसम्बन्धेन द्वित्वादिकं प्रति समवायिकारणत्वेऽपि कालिकस-

---

(१) यावद्द्रव्यस्थितिकालस्थितिकत्वं यावद्द्रव्यभावित्वम्। यथा पृथिव्यागन्धादिगुणाः। शब्दस्तु न तथा आश्रयस्याकाशस्य सत्त्वेऽपि नाशात्। अतः अयावद्द्रव्यभावित्व-

कालं निरूपयति—

जन्यानां जनकः कालो जगतामाश्रयो मतः ॥ ४५ ॥

तत्र प्रमाणं दर्शयितुमाह—जगतामिति तथाहि 'इदानीं घट' इत्यादिप्रतीतिः सूर्यपरिस्पन्दादिकं यदा विषयीकरोति, तदा सूर्यपरिस्पन्दादिना घटादेः सम्बन्धो वाच्यः। स च सम्बन्धः संयोगादिर्न सम्भवतीति काल एव तत्सम्बन्धघटकः कल्प्यते। इत्थं च तस्याश्रयत्वमपि सम्यक् ॥ ४५ ॥

प्रमाणान्तरं दर्शयति—

परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः।

परत्वापरत्वबुद्धेरसाधारणं निमित्तं काल एव। परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयो लाघवादतिरिक्तः काल एकः कल्प्यत इति भावः।

नन्वेकस्य कालस्य सिद्धौ क्षणदितमासवर्षादिसमयभेदो न स्यादत आह-

---

मुक्तावलीमयूखः।

म्बन्धेन निमित्तत्वानपायात् समवायिकारणत्वासमवायिकारणत्वभिन्नं कारणत्वं निमित्तकारणत्वमिति लक्षणात्।

ननु कालसद्भावे किंप्रमाणमत आह—जगतामाश्रय इति। कालः सर्वेषामिति प्रतीत्या जगदाश्रयत्वेन कालः सिद्ध्यतीति भावः।

ननु इयं प्रतीतिर्दिग्विषयिण्येवास्तु अतिरिक्तकालकल्पने मानाभावादिति चेत्? न, प्रत्यक्षान्तरेण कालसिद्धौ प्रकृतप्रतीतिबलेन कालस्य जगदाधारत्वं कल्प्यत इत्याशयात्। कालसाधकं प्रमाणान्तरं किमिति चेत्? "इदानीं घटः" इति प्रतीतिरेवेति गृहाण।

नच 'इदानीं घटः' इति प्रतीतिः सूर्यपरिस्पन्दमेव विषयीकरोति न कालमिति वाच्यम्, तावताऽपि सूर्यपरिस्पन्दस्य घटादिना सम्बन्धो वाच्यः स च संयोगो न सम्भवति 'द्रव्ययोरेव संयोग' इति नियमात्। नापि समवायः अन्यनिष्ठक्रियाया अन्यत्र समवायासम्भवात्। अपि तु स्वाश्रयतपनसंयोगिसंयोग एव। एवञ्च स्वं सूर्यक्रिया तदाश्रयः तपनः (सूर्यः) तत्संयोगी कालः तत्संयोगी घटे इति सम्बन्धघटकतया कालः सिध्यतीत्याशयात्।

नच सम्बन्धघटकसंयोगिपदेनाकाशादिकमेव गृह्यतां, तथाच नातिरिक्तकालसिद्धिरिति वाच्यम्, आकाशदिगात्मनां विनिगमनाविरहेणातिरिक्तैककालस्यैव संयोगिपदेन ग्रहणादित्यलम् ॥ ४५ ॥

परत्वापरत्वादिबुद्धेरिति। अयं भावः—कालिकपरत्वापरत्वे सासमवायिकारणके भावकार्यत्वात् घटादिवत्, इत्यनुमानेन कालिकपरत्वापरत्वयोरसमवायिकारणं कालपिण्डसंयोगः सिध्यति इति तादृशसंयोगाश्रयतया कालसिद्धिरिति।

नच पृथिवीपिण्डसंयोगस्यैव परत्वापरत्वयोरसमवायिकारणत्वं कल्प्यतां, तथा च न कालसिद्धिरिति वाच्यम्, पृथिव्यसंयुक्तपदार्थेऽपि कालिकपरत्वयोरुत्पादेन व्यभिचारात्।

ननु तथाप्याकाशदिगात्ममनोभिर्यः पिण्डसंयोगस्तस्यैव परत्वापरत्वयोरसमवायिकारणत्वमास्तां किं कालकल्पनयेत्यत आह—लाघवादिति।

क्षणादिरिति । कालस्त्वेकोऽप्युपाधिभेदात्क्षणादिव्यवहारविषयः । उपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म, पूर्वसंयोगावच्छिन्नविभागो वा, पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावो वा, उत्तरसंयोगावच्छिन्नं कर्म वा ।

नचोत्तरसंयोगानन्तरं क्षणव्यवहारो न स्यादिति वाच्यं, कर्मान्तरस्यापि सत्त्वादिति । महाप्रलये क्षणादिव्यवहारो यद्यस्ति तदानायत्या ध्वंसेनोपपादनीय इति दिनादिव्यवहारस्तु तत्तत्क्षणकूटैरेवेति ।

दिशं निरूपयति—

दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते ॥ ४६ ॥

दूरत्वमन्तिकत्वं च दैशिकं परत्वमपरत्वं बोध्यम् । तद्बुद्धेरसाधारणं बीजं दिगेव । दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया लाघवादेका दिक् सिध्यतीति भावः ॥ ४६ ॥

मुक्तावलीमयूखः ।

अयम्भावः । विनिगमनाविरहेण लाघवादतिरिक्त एकः कालः कल्प्यते इति ।

स्वजन्येति । इदमत्राकूतम् क्रिया, क्रियातो विभागः, विभागात्पूर्वसंयोगनाशः, तत उत्तरदेशसंयोगः, ततः क्रियानाश, इति । एवं च स्वं क्रिया तज्जन्यविभागप्रागभावविशिष्टकर्मण उपाधित्वाङ्गीकारेण क्रियोपलक्षितकालस्य प्रथमक्षणत्वम् ।

न च क्रियायाः क्षणचतुष्टयं स्थितिसम्भवात् तादृशकालस्यापि क्षणत्वापत्तिरिति-वाच्यम् । विभागाद्यधिकरणकालस्य क्रियाजन्यविभागप्रागभावानधिकरणत्वेनादोषात् । स्वजन्यविभागप्रागभावमात्रस्योपाधित्वाङ्गीकारे विभागप्राग्वर्तिक्षणेषु क्षणत्वापत्तिरतः क्रियेत्युक्तम् ।

पूर्वसंयोगेति । विभागमात्रस्योपाधित्वे विभागोत्तरकालेऽपि द्वितीयक्षणत्वापत्तिः । पूर्वसंयोगमात्रस्य तथात्वे च विभागपूर्वकालेऽपि द्वितीयक्षणत्वापत्तिः । उभयोपादाने तु । पूर्वसंयोगविभागयोरधिकरणीभूते काले एव द्वितीयक्षणत्वव्यवहार इति ।

पूर्वसंयोगनाशेति । पूर्वसंयोगनाशमात्रस्य तृतीयक्षणोपाधित्वे पूर्वसंयोगनाशोत्तरक्षणेऽपि तृतीयक्षणत्वापत्तिः । उत्तरसंयोगप्रागभावमात्रस्य तथात्वे च पूर्वसंयोगनाशाधिकालेऽपि क्षणत्वापत्तिरत उभयमुपात्तम् ।

उत्तरसंयोगेति । 'उत्तरसंयोगमात्रस्योपाधित्वे उत्तरसंयोगानन्तरकालेऽपि चतुर्थक्षणत्वं स्यात् । कर्ममात्रस्य तथात्वे च क्षणचतुष्टयेऽपि चतुर्थक्षणत्वं स्यादत उभयोपादानम् । उपाधित्वं च परिचायकत्वम् ।

अनायत्येति । अगत्येत्यर्थः । ध्वंसेनैवेति । स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकयावद्ध्वंसविशिष्टसमयस्यैव क्षणव्यवहारविषयत्वमिति भावः । स्वं प्रलयः तद्वृत्तिध्वंसप्रतियोगिनो ये घटपटादयो यावतां तेषां ध्वंसविशिष्टः समयः स एवेति समन्वयः ।

नन्वेकैव दिक् तदा प्राचीप्रतीच्यादिव्यवहारः कथमुपपद्यतामित्यत आह

उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक् ।

यत्पुरुषस्य उदयगिरिसन्निहिता या दिक् सा तस्य प्राची । एवमुदयगिरिव्यवहिता या दिक् सा प्रतीची । एवं यत्पुरुषस्य सुमेरुसन्निहिता या दिक् सोदीची । तद्व्यवहिता त्ववाची । "सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थितः" इति नियमात् ।

आत्मानं निरूपयति—

आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् ॥ ४७ ॥

आत्मत्वजातिस्तु सुखदुःखादिसमवायिकारणतावच्छेदकतया सिद्धय-

मुक्तावलीमयूखः ।

नुमानेन दैशिकपरत्वापरत्वयोरसमवायिकारणं दिक्पिण्डसंयोगः सिध्यति तदाश्रयत्वेन च दिक् सिध्यतीति तदाशय इति भावः ॥ ४६ ॥

यत्पुरुषेति । पुरुषपदं मूर्तपरम् । तथा च यन्मूर्तापेक्षया उदयगिरिसन्निहितं यन्मूर्तं तन्मूर्तावच्छिन्ना दिक् तन्मूर्तापेक्षया प्राची । एवं यन्मूर्तापेक्षया उदयगिरिव्यवहितं यन्मूर्तं तन्मूर्तावच्छिन्ना दिक् तन्मूर्तापेक्षया प्रतीचि । एवं यन्मूर्तापेक्षया सुमेरुगिरिसन्निहितं यन्मूर्तं तन्मूर्तापेक्षयोदीची । एवं यन्मूर्तापेक्षया सुमेरुगिरिव्यवहितं यन्मूर्तं तन्मूर्तावच्छिन्ना दिक् तन्मूर्तापेक्षया दक्षिणेति ।

वर्षाणां । देशानाम् ।

द्योधितिकारास्तु । दिक्कालौ नेश्वरादतिरिच्येते मानाभावाद तत्तत्कालोपाधिदिगुपाधिविशिष्टेश्वरादेव क्षणादिप्राच्यादिव्यवहारसम्भवादित्याहुः ।

ननु स्वात्मनि स्वरूपत आत्मत्वस्य मानसप्रत्यक्षविषयत्वेऽपि अन्यात्मनोऽप्रत्यक्षत्वेन सकलात्मसाधारणानुगतप्रत्यक्षासम्भव इति अनेकसमवेतत्ववटितजातित्वप्रहेऽनेकव्यक्तिग्रहहेतुतायाः सर्वसिद्धत्वादात्मत्वस्य स्वरूपतो ग्रहेऽपि तद्गतजातित्वं न प्रत्यक्षमत आत्मत्वस्य जातित्वेऽनुमानं प्रमाणयति—आत्मत्वजातिरित्यादि । समवायसम्बन्धावच्छिन्नसुखत्वावच्छिन्नकार्यतानिरूपिता या तादात्म्यसम्बन्धावच्छिन्नात्मनिष्ठा कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वादित्यनुमानेनात्मत्वजातिसिद्धिरिति भावः ।

नन्वीश्वरे सुखानुत्पादेन सुखसमवायिकारणत्वस्य तत्राभावादीश्वरसाधारणी आत्मत्वजातिर्नसिध्येदिति चेद् न; फलोपधायकतारूपकारणतायास्तत्राऽसत्त्वेऽपि स्वरूपयोग्यतारूपकारणतायास्सत्त्वेन तदवच्छेदकतया सिध्यन्त्या आत्मत्वजातेरीश्वरसाधारण्यात् ।

न च "नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भावनियमेन" ईश्वरे स्वरूपयोग्यतारूपसुखकारणतायाः सत्त्वे कदाचित्सुखोत्पादेन भवितव्यमिति कदाचिदपि सुखोत्पादाभावः स्वरूपयोग्यतारूपकारणतामपि ततो निवर्तयतीति वाच्यम् ।

जलपरमाणौ स्वरूपयोग्यतारूपकारणतायास्सत्त्वे स्नेहानुत्पादेन तादृशनियमस्याप्रयोजकत्वात् ।

ते। ईश्वरेऽपि सा जातिरस्त्येव। अदृष्टादिरूपकारणाभावाच्च सुखदुःखोत्पत्तिः, नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भाव इति नियमस्याप्रयोजकत्वात्।

परे त्वीश्वरे सा जातिर्नास्त्येव प्रमाणाभावात्। न च दशमद्रव्यत्वापत्तिः, ज्ञानवत्त्वेन विभजनादित्याहुः।

इन्द्रियादेति। इन्द्रियाणां शरीरस्य च परम्परया चैतन्यसम्पादकः।

यद्यप्यात्मनि "अहं जाने, अहं सुखी" इत्यादिप्रत्यक्षविषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्नस्तत्प्रतीतिगोचर इति प्रतिपादयितुं न शक्यत इत्यतः प्रमाणान्तरं दर्शयति-करणमिति। कुठारादीनां छिदादिकरणानां कर्तारमन्तरेण फलानुपधानं दृष्टम्। एवं चक्षुरादीनां ज्ञानकरणानां फलोपधानमपि कर्तारमन्तरेण नोपपद्यत इत्यतिरिक्तः कर्ता कल्प्यते ॥ ४७ ॥

ननु शरीरस्यैव कर्तृत्वमस्त्वत आह—

शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः।
तथात्वे चेदिन्द्रियाणामुपघाते कथं स्मृतिः ॥ ४८ ॥

ननु चैतन्यं ज्ञानादिकमेव, मुक्तात्मनां त्वन्मत इव मृतशरीराणामपि तदभावे का क्षतिः प्राणाभावेन ज्ञानाभावस्य सिद्धेरिति चेन्न शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थविरे स्मरणानुपपत्तेः, शरीराणामवयवोपचयापचयैरुत्पादविनाशशालित्वात्।

न च पूर्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरे संस्कार उत्पद्यत इति वाच्यम्, अनन्तसंस्कारकल्पने गौरवात्।

मुक्तावलीमयूखः।

नन्वीश्वरे स्वरूपयोग्यतारूपकारणसत्त्वे सुखं कुतो नोत्पद्यते इति चेद्—न मिथ्याज्ञानस्यादृष्टं प्रति हेतुता मुक्तात्मन्यदृष्टोत्पत्तिवारणायाङ्गीकर्तव्येति मिथ्याज्ञानस्येश्वरेऽभावेन सुखकारणीभूतादृष्टासत्त्वेन सुखोत्पादासम्भवात्।

इत्याहुरिति। अत्रार्थबीजं तु वेदस्यात्मपदस्य ज्ञानवति लक्षणापत्तिरेवेति बोध्यम्।

ननु "सति धर्मिणि धर्मी" इतिन्यायेन आत्मसद्भावे एव किम्मानमत आह—इन्द्रियाद्यधिष्ठातेति।

परम्परयेति। जनकता सम्बन्धेनेन्द्रियाणाम् अवच्छेदकता सम्बन्धेन शरीरस्य चैतन्यं (ज्ञानवत्त्वं) बोध्यम् ॥ ४७ ॥

त्वन्मत इवेति। यथा त्वन्मते (नैयायिकमते) मुक्तानां ज्ञानाभावेन ज्ञानाधिकरणत्वरूपं चैतन्यं नास्ति तथा मम (चार्वाकस्य) मतेऽपि मृतशरीरस्य न चैतन्यमिति भावः।

ननु नैयायिकमते मुक्तात्मना ज्ञानाभावे प्राणविशिष्टात्मनो विरह एव प्रयोजकः,

एवं शरीरस्य चैतन्ये बालकस्य स्तन्यपाने प्रवृत्तिर्न स्यात्, इष्टसाधनताज्ञानस्य तद्धेतुत्वात्तदानीमिष्टसाधनतास्मारकाभावात्। मन्मते तु जन्मान्तरानुभूतेष्टसाधनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः।

नच जन्मान्तरानुभूतमन्यदपि स्मर्यतामिति वाच्यम्, उद्बोधकाभावात्। अत्र त्वनायत्या जीवनादृष्टमेवोद्बोधकं कल्प्यते।

इत्थं च संसारस्यानादितया आत्मनोऽनादित्वसिद्धावनादिभावस्य नाशासम्भवान्नित्यत्वं सिद्ध्यतीति बोध्यम्।

ननु चक्षुरादीनामेव ज्ञानादिकं प्रति करणत्वं कर्तृत्वं चास्तु, विरोधे साधकाभावादत आह—तथात्वमिति। चैतन्यमित्यर्थः। उपघाते-नाशे सति अर्थाच्चक्षुरादीनामेव।

कथमिति। पूर्वं चक्षुषा साक्षात्कृतानां चक्षुषोऽभावे स्मरणं न स्यात्, अनुभवितुरभावात्। अन्यदृष्टस्यान्येन स्मरणासम्भवात्। अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावादिति भावः ॥ ४८ ॥

ननु चक्षुरादीनां चैतन्यं मास्तु मनसस्तु नित्यस्य चैतन्यं स्यादत आह-

मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत्।
धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः ॥ ४९ ॥

मनोपीति। न तथा न चेतनम्। ज्ञानादीति। मनसोऽणुत्वात्प्रत्यक्षे च महत्त्वस्य हेतुत्वान्मनसि ज्ञानसुखादिसत्त्वे तत्प्रत्यक्षानुपपत्तिरित्यर्थः। यथा मनसोऽणुत्वं तथा वक्ष्यते।

नन्वस्तु विज्ञानमेवात्मा तस्य स्वप्रकाशरूपत्वाच्चेतनत्वम्, ज्ञानसुखादिकं तु तस्यैवाकारविशेषः तस्यापि भावत्वादेव क्षणिकत्वं पूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञाने हेतुत्वात् सुषुप्तावप्यालयविज्ञानधारा निरावाधैव, मृगमदवासनावासितवसन इव पूर्वपूर्वविज्ञानजनितसंस्कारानुत्तरोत्तरविज्ञाने संक्रान्तत्वाच्चानुपपत्तिः स्मरणादेरिति चेद्—

मुक्तावलीमयूखः।

ति। त्वन्मतापेक्षया लाघवात् प्राणाभावस्यैव ज्ञानाभावे प्रयोजकत्वोपगमो मन्मते (चार्वाकमते) इति भावः ॥ ४८ ॥

वक्ष्यते इति। "अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते" इति ग्रन्थेनेति शेषः।

विज्ञानमेवेति। विज्ञानवादिमते वस्तुमात्रस्यैव विज्ञानरूपत्वाभ्युपगमेऽपि प्रस्तुतत्वादात्मेत्युक्तमिति नैतावता न्यूनत्वमाशङ्कनीयम्। द्विविधं हि विज्ञानं प्रवृत्तिविज्ञानमालयविज्ञानं च 'अयं घटः' इत्यादिप्रवृत्तिविज्ञानम्। अहमित्याकारकं ज्ञानम् आलयविज्ञानम्। तदुक्तम्—

"तत्स्यादालयविज्ञानं यद्भवेदहमास्पदम्।
तत्स्यात्प्रवृत्तिविज्ञानं नीलपीतादिके भवेत्" ॥ इति ॥

न, तस्य जगद्विषयकत्वे सर्वज्ञत्वापत्तिः । यत्किञ्चिद्विषयकत्वे विनिगमनाविरहः । सुषुप्तावपि विषयावभासप्रसङ्गाच्च । ज्ञानस्य सविषयत्वात् । तदानीं निराकारा चित्सन्ततिरनुवर्तत इति चेन्न, तस्याः स्वप्रकाशत्वे प्रमाणाभावात् । अन्यथा घटादीनामपि ज्ञानत्वापत्तिः ।

न चेष्टापत्तिर्विज्ञानव्यतिरिक्तवस्तुनोऽभावादिति वाच्यं, घटादेरनुभूयमानस्यापलपितुमशक्यत्वात् ।

आकारविशेष एवायं विज्ञानस्येति चेत्, किमयमाकारोऽतिरिच्यते विज्ञानात्तर्हि समायातं विज्ञानव्यतिरिक्तेन । नातिरिच्यते चेत्तर्हि समूहालम्बने नीलाकारोऽपि पीताकारः स्यात् । स्वरूपतो विज्ञानस्याविशेषात् ।

अपोहरूपो नीलत्वादिर्विज्ञानधर्म इति चेन्न, नीलत्वादीनां विरुद्धानामेकस्मिन्नसमावेशात् । इतरथा विरोधावधारणस्यैव दुरुपपादत्वात् । न वा वासनासङ्क्रमः सम्भवति, मातृपुत्रयोरपि वासनासङ्क्रमप्रसङ्गात् ।

न चोपादानोपादेयभावो नियामक इति वाच्यम् । वासनायाः सङ्क्रमासम्भवात् ।

मुक्तावलीमयूखः ।

क्षणिकविज्ञानात्मवादिमतखण्डनम् ।

ननु—विज्ञानमेवात्माऽस्तु किं ज्ञानाश्रयस्यात्मनः स्वीकारेण तस्य स्वप्रकाशरूपत्वाच्चेतनत्वम् ज्ञानसुखादिकं तु विज्ञानस्यैवाकारविशेषः विज्ञानं च भावः । एवञ्च भावाः क्षणिकाः भावत्वात् दीपशिखावत् इत्यनुमानेन तस्य क्षणिकत्वम् तथा च क्षणिकविज्ञानमात्मेति पर्यवसन्नम् ।

नच सुषुप्तावात्मा न सिध्येत् पूर्वोत्पन्नविज्ञानस्य क्षणिकत्वेन नष्टत्वात्तदानीं पुरीतद्देशावच्छेदेन मनः संयोगस्य सत्त्वेन ज्ञानकारणीभूतत्वङ्मनोयोगस्या सत्त्वेन विज्ञानान्तरस्योत्पत्तुमशक्यत्वादिति वाच्यम्, सुषुप्तौ घटः पट इति प्रवृत्तिविज्ञानस्यासत्त्वेऽपि अहमित्याकारकालयविज्ञानस्य सत्त्वेन विज्ञानरूपात्मसिद्धेः ।

ननु विज्ञानस्यात्मत्वे तस्य क्षणिकत्वेन तदाश्रितसंस्कारस्यापि क्षणिकत्वात् कालान्तरे स्मरणं न स्यादिति चेद् ? न मृगमदेन (कस्तूर्या) वासिते वसने कस्तूर्या अपनयनेऽपि यथा गन्ध उपलभ्यते तथा पूर्वपूर्वविज्ञानजनितसंस्काराणां पूर्वपूर्वविज्ञाननाशेऽपि उत्तरोत्तरविज्ञाने सङ्क्रमेण स्मरणोपपत्तेरिति चेद्, न विज्ञानस्यात्मत्वासम्भवात् । तथाहि, विज्ञानमात्मेति वदतस्तव जगद्विषयकं यत्किञ्चिद्विषयकं निर्विषयकं वा विज्ञानमात्मेत्यभिमतम् ।

नाद्यः, आत्मनां सर्वज्ञत्वापत्तेः ।

न द्वितीयः, विनिगमनाविरहेण किंविषयकं विज्ञानमात्मा किंविषयकं नेत्यनिर्णयापत्तेः सुषुप्तावपि विषयावभासप्रसङ्गाच्च ।

उत्तरस्मिन्नुत्पत्तिरेव सङ्क्रम इति चेन्न, तदुत्पादकाभावात्। चिता-मेवोत्पादकत्वे संस्कारानन्त्यप्रसङ्गः।

क्षणिकविज्ञानेऽतिशयविशेषः कल्प्यत इति चेन्न,

मानाभावात्कल्पनागौरवाच्च।

एतेन क्षणिकशरीरेष्वेव चैतन्यं प्रत्युक्तं गौरवादतिशये मानाभावाच्च। बीजादावपि सहकारिसमवधानासमवधानाभ्यामेवोपपत्तेः कुर्वद्रूपत्वा कल्पनात्।

अस्तु तर्हि क्षणिकविज्ञाने गौरवान्नित्यविज्ञानमेवात्मा, "अविनाशी वा-ऽरेऽयमात्मा सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिश्रुतेरिति चेद् ? न तस्य सविष-

मुक्तावलीमयूखः।

नामपि ज्ञातत्वं स्यात्। नचेष्टापत्तिस्तन्मते वस्तुमात्रस्यैव विज्ञानरूपत्वाभ्युपगमादिति वाच्यम्, विज्ञानव्यतिरिक्तत्वेनानुभूयमानस्य घटादेरपलपितुमशक्यत्वात्।

नन्वाकारविशेष एव विज्ञानस्य घटादिरिति चेदुच्यते आकारस्य विज्ञानातिरिक्तत्वे वस्तुमात्रस्य विज्ञानरूपत्वप्रतिज्ञाभङ्गः अनतिरिक्तत्वे नीलपीते इति समूहालम्बनस्थले नीलाकारोऽपि पीताकारः स्यात् स्वरूपतो विज्ञानस्याविशेषात्।

न च नीलत्वादिजातेस्तैरनुल्लेखेऽपि अपोह्यते इति अपोहः अतद्व्यावृत्तिः अर्थात् नीलेतराभावः तद्रूपं नीलत्वं स्वीक्रियते तदेव विज्ञानधर्म इति न दोष इति वाच्यम्, समूहालम्बनात्मकविज्ञाने विरुद्धयोर्नीलत्वपीतरत्वयोः समावेशासम्भवात्।

नच समूहालम्बनेन न नीलत्वं न वा पीतत्वमभ्युपगम्यते अपि तु चित्रत्वमेव तथा च न दोष इति वाच्यम्, एवमपि मात्राऽनुभूतस्य गर्भस्थेन स्मरणापत्तिभिया पूर्वविज्ञान-वासनासङ्क्रमस्योत्तरविज्ञाने उपपादयितुमशक्यत्वेन कालान्तरेऽनुभूतस्य कालान्तरे स्मरणस्योपपादयितुमशक्यत्वात्।

नचोपादानोपादेयभावो वासनासङ्क्रमे प्रयोजक इति वाच्यम् वासनायाः सङ्क्रमासंभवात्।

नच पूर्वविज्ञानेन उत्तरविज्ञानं वासनाविशिष्टमेवोत्पद्यते इति वाच्यम्। वासनाया उत्पादकाभावादिति क्षणिकविज्ञानं नात्मेति सिद्धम्॥

ननु क्षणिकशरीरमेवात्माऽस्तु इति चेद् न गौरवात् वासनासङ्क्रमासम्भवेन स्मर-णानुपपत्तेश्च।

ननु क्षेत्रस्थबीजादङ्कुरोत्पत्तिर्भवति कुसूलस्थबीजान्न भवति अतोऽङ्कुरत्वावच्छिन्नं प्रति कुर्वद्रूपत्वेन कारणता स्वीक्रियते। कुर्वद्रूपत्वं च अङ्कुरजनकतावच्छेदकतया सिद्धो जाति-विशेषः। तच्च फलोपधायके क्षेत्रस्थबीजे एव स्वीक्रियते न कुसूलस्थबीजे। एवं क्षणिक-विज्ञाने क्षणिकशरीरे वा कुर्वद्रूपत्वेनैव उत्तरविज्ञाने उत्तरशरीरे वा वासनोत्पादकत्वं वाच्य-मिति चेद् न, धरणिसलिलसंयोगादिरूपकारणसमवधानेऽङ्कुरोत्पादो न तदभाव इत्येव सिद्धे कुर्वद्रूपत्वेन कारणताङ्गीकारे मानाभावादित्यलम्।

नित्यविज्ञानात्मवादिवेदान्तिमतखण्डनम्।

ननु क्षणिकविज्ञानस्यात्मत्वे वासनासङ्क्रमासम्भवेन स्मरणानुपपत्तिरतोनित्यविज्ञान-

यत्वासम्भवस्य दर्शितत्वात् निर्विषयस्य ज्ञानत्वे मानाभावात्सविषयत्वस्याप्यननुभवात्। अतो ज्ञानादिभिन्नो नित्य आत्मेति सिद्धम्।

सत्यं ज्ञानमिति हि ब्रह्मपरं जीवेषु नोपयुज्यते। ज्ञानाज्ञानसुखित्वादिभिर्जीवानां भेदसिद्धौ सुतरामीश्वरभेदः। अन्यथा बन्धमोक्षव्यवस्थानुपपत्तिः। योऽपीश्वराभेदबोधको वेदः सोऽपि तदभेदेन तदीयत्वं प्रतिपादयन् स्तौति। अभेदभावनयैव यतितव्यमिति वदति। अत एव "सर्व एवात्मनि समर्पिताः" इति श्रूयते। मोक्षदशायामज्ञाननिवृत्तावभेदो जायत इत्यपि न, भेदस्य नित्यत्वेन नाशायोगात्। भेदनाशेऽपि व्यक्तिद्वयं स्थास्यत्येव। न च द्वित्वमपि नश्यतीति वाच्यं, तव निर्धर्मके ब्रह्मणि सत्यत्वाभावेऽपि सत्यस्वरूपं तदितिवद्द्वित्वाभावेऽपि व्यक्तिद्वयात्मकौ तावितिसुवचत्वात् मिथ्यात्वाभावोऽधिकरणात्मकस्तत्र सत्यत्वमिति चेदेकत्वाभावो व्यक्तिद्वयात्मको द्वित्वमित्युच्यताम्। प्रत्येकमेकत्वेऽपि पृथ्वीजलयोर्न गन्ध इतिवदुभयं नैकमित्यस्य सर्वजनसिद्धत्वात्। योऽपि तदानीमभेदप्रतिपादको वेदः सोऽपि निर्दुःखत्वादिना साम्यं प्रतिपादयति, सम्पदाधिक्ये 'पुरोहितोऽयं राजा संवृत्त' इतिवत् अतएव 'निरञ्जनः परमं साम्यमुपैति इति श्रूयते। ईश्वरोऽपि न ज्ञानसुखात्मा किन्तु ज्ञानाद्याश्रयः "नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादौ विज्ञानपदेन ज्ञानाश्रय एवोक्तः, "यः सर्वज्ञः स सर्ववित्" इत्याद्यनुरोधात्। आनन्दमित्यस्याप्यानन्दवदित्यर्थः। अर्शआदित्वान्मत्वर्थीयोऽच्प्रत्ययात्। अन्यथा पुल्लिङ्गत्वापत्तिः। आनन्दोऽपि दुःखाभावे उपचर्यते, भाराद्यपगमे सुखो संवृत्तोऽहमितिवत्, दुःखाभावेन सुखित्वप्रत्यवत्। अस्तु वा तस्मिन्नानन्दो न त्वसावानन्दः, "असुखम्" इति श्रुतेः। न विद्यते सुखं यस्येति कुतो नार्थ इति चेद्? न, क्लिष्टकल्पनापत्तेः, प्रकरणविरोधादानन्दमित्यत्र मत्वर्थीयाच्प्रत्ययविरोधाच्चेति सङ्क्षेपः।

मुक्तावलीमयूखः।

मेवात्मास्तु। न च ज्ञानस्य नित्यत्वे मानाभाव इति वाच्यम् "अविनाशी वा अरेऽयमात्मा सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतेरेव मानत्वादिति चेत्—

न, विज्ञानस्यात्मत्वासम्भवात्। तथाहि, जगद्विषयकं यत्किञ्चिद्विषयकं निर्विषयकं वा विज्ञानमात्मा? नाद्यः; जीवात्मनां सर्वज्ञत्वापत्तेः। न द्वितीयः विनिगमकाभावप्रसङ्गात्। न तृतीयः निर्विषयकस्य ज्ञानत्वे मानाभावात् आत्मनां ज्ञानरूपत्वे सविषयकत्वेनानुभवापत्तेश्च। तस्माज्ज्ञानादिभिन्नो नित्य आत्मेति सिद्धम्।

नच "सत्यं ज्ञानमनन्तं ब्रह्म" "नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादिश्रुतिभिर्ज्ञानरूपता आत्मनआस्थीयते इति 'वाच्यम्, 'यः सर्वज्ञः स सर्ववित्' 'आनन्दं ब्रह्मणो विद्वान्' इत्यादिश्रुत्यनुरोधेन 'नित्यं विज्ञानमानन्दम्' इत्यादिश्रुतौ ज्ञानादिपदानामर्शआद्यजन्तत्वाङ्गीकारेण आत्मनो ज्ञानसुखाद्याश्रयत्वस्य सिद्धावपि ज्ञानसुखादिरूपत्वासिद्धेरित्यलम्।

एतेन प्रकृतिः कर्त्री पुरुषस्तु पुष्करपलाशवन्निर्लेपः किंतु चेतनः कार्यकारणयोरभेदात् कार्यनाशे सति कार्यरूपतया(१)तन्नाशोपि न स्यादित्यकारणत्वं तस्य। बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्या तत्कल्पनम्। बुद्धिश्च प्रकृतेः परिणामः। सैव महत्तत्त्वम्, अन्तःकरणमित्युच्यते। तत्सत्त्वासत्त्वाभ्यां पुरुषस्य संसारापवर्गौ। तस्या एवेन्द्रियप्रणालिकया परिणतिर्शानरूपा घटादिना सम्बन्धः। पुरुषे कर्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्च भेदाग्रहात्। ममेदं कर्तव्यमिति मदंशः पुरुषोपरागो बुद्धेः स्वच्छतया तत्प्रतिबिम्बादात्त्विको दर्पणस्येव मुखोपरागः। इदमिति विषयोपरागः, इन्द्रियप्रणालिकया परिणतिभेदस्तात्त्विको निःश्वासाभिहतदर्पणस्येव मलिनि-

मुक्तावलीमयूखः।

एतेनेति। पूर्वोक्तयुक्त्याऽऽत्मनो ज्ञानवत्त्वसाधनेन वक्ष्यमाणयुक्त्या चेत्यर्थः।

सांख्यमतखण्डनम्।

ननु 'किन्तु चेतन' इत्युक्त्वा पुरुषस्य सांख्यमते ज्ञानवत्त्वाभ्युपगमात् आत्मनो ज्ञानवत्त्वसिद्धेर्न सांख्यमतप्रतिक्षेपकत्वमिति एतेनेत्यस्य पूर्वोक्तयुक्त्या ज्ञानवत्त्वसाधनेनेत्यर्थवर्णनमयुक्तमिति चेद् ?

न, चेतनस्य तन्मतेऽपि ज्ञानरूपत्वाभ्युपगमेन ज्ञानवत्त्वसिद्धेस्तन्मतप्रतिक्षेपकत्वात्। अन्यथा चेतनातिरिक्तज्ञानाभ्युपगमे तस्य—

"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्नविकृतिः पुरुषः" ॥

इति परिगणितपञ्चविंशतितत्त्वमध्येऽप्रविष्टतया तत्त्वाधिक्यापत्तेः। प्रकृतिः १ ततो महान् २ (बुद्धिः) ततोऽहङ्कारः ३ ततः पञ्चतन्मात्राणि (शब्द ४ स्पर्श ५ रूप ६ रस ७ गन्धाः ८) पञ्चतन्मात्रेभ्यः क्रमेण आकाश ९ वायु १० तेजो ११ जल १२ भूमयः १३ (पञ्च भूतानि) अहङ्कारादेव चक्षु १४ रसना १५ घ्राण १६ श्रोत्र १७ त्वगा १८ ख्यानि (ज्ञानेन्द्रियाणि) मुख १९ पाणि २० पाद २१ पायू २२ पस्था २३ ख्यानि (कर्मेन्द्रियाणि) मनः २४ (ज्ञानकर्मोभयेन्द्रियम्) जायन्ते पुरुषः २५ इति पञ्चविंशतिः तत्त्वानि सांख्यैरभ्युपगम्यन्ते।

ननु प्रकृतेर्गुणैः सत्त्वरजस्तमयोरूपैः क्रियमाणानि कर्माणि भवन्ति अहङ्कारोऽहं प्रत्ययस्तेन मूढः आत्माऽन्तः करणं तस्य स पुरुषः कर्ताहमिति मन्यते इत्यर्थकेन "प्रकृते क्रियमाणानि गुणैः, कर्माणि सर्वशः। अहङ्कारविमूढात्मा कर्ताहमिति मन्यते" इति भगवद्गीतावचनेन प्रकृतेरेव कर्तृत्वं प्रतीयते, न पुरुषस्य किन्तु पुष्करपलाशवन्निर्लेपः सः "असङ्गो ह्ययं पुरुषः" इति श्रुत्या तस्याऽकारणत्वावगमेन "पुरुषः कर्तृत्वाभाववान् कारणत्वाभावात्" इत्यनुमानेन च पुरुषेऽकर्तृत्वसिद्धेः।

युक्तं चैतत्, अन्यथा पुरुषस्य कारणत्वाभ्युपगमे कार्यकारणयोः सांख्यमतेऽभेदात् कार्यनाशे तस्याप्यः स्यात्।

नचैतादृशपुरुषस्यानङ्गीकार एव वरं प्रयोजनाभावादिति वाच्यम्, क्वचित्प्रसिद्धस्यैव-

(१) न स्यादिति सामूदित्यर्थः। तस्याशोऽपि स्यादिति पाठस्तु साधीयान्।

मा। कर्तव्यमितिव्यापरांशः। तेनांशत्रयवती बुद्धिस्तत्परिणामेन ज्ञानेन पुरुषस्यातात्त्विकः सम्बन्धो दर्पमलिनिम्नेव मुखस्योपलब्धिरुच्यते। ज्ञानवत्सुखदुःखेच्छाद्वेषधर्माधर्मा अपि बुद्धेरेव कृतिसामानाधिकरण्येन प्रतीतेः। न च बुद्धिश्चेतना परिणामित्वादिति मतमपास्तम्,

कृत्यदृष्टभोगानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेस्तद्धिन्ने मानाभावाच्च। चेतनोऽहं करोमीति प्रतीतिश्चैतन्यांशे भ्रम इति चेत्कृत्यंशे किं नेष्यते। अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावोऽनित्यत्वे तत्पूर्वमसंसारापत्तिः।

नन्वचेतनायाः प्रकृतेः कार्यत्वाद्बुद्धेरचैतन्यं कार्यकारणयोस्तादात्म्यादिति चेन्न, असिद्धेः। कर्तुर्जन्यत्वेमानाभावात्। वीतरागजन्मादर्शनादनादित्वम् अनादिभावस्य नाशासम्भवान्नित्यत्वम्। तर्कि प्रकृत्यादिकल्पनेन।

न च—"प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहङ्कारविमूढात्मा कर्ताहमिति मन्यते" इत्यनेन विरोध इति वाच्यम्, प्रकृतेरदृष्टस्य गुणैर-

---

मुक्तावलीमयूखः।

चैतन्यस्य बुद्धावारोपसम्भवेन बुद्धिगतचैतन्याभिमानोपपत्तये तत्कल्पनात्। बुद्धिरेव महत्त्वमिति साङ्ख्यैरुच्यते।

नच पुरुषस्याकर्तृत्वे तत्र धर्माधर्मयोरुत्पादासम्भवेन तदधीनसुखदुःखयोरपि तत्रानुत्पादात् दुःखध्वंसरूपो मोक्षः पुरुषस्य न स्यादिति मोक्षार्थं प्रकृतिपुरुषविवेकस्यापि नापेक्षेति तदर्थं क्रियमाणं साङ्ख्यशास्त्रमप्यनर्थकं स्यादिति वाच्यम्, बुद्धिसत्त्वे इन्द्रियद्वारा बुद्धिपरिणामेन घट इत्यादिज्ञानसम्बद्धो घटादिर्विषयः घटाद्याकारज्ञानपरिणामिबुद्धया सान्निध्यरूपदोषेण अगृहीतभेदत्वसम्बन्धेन पुरुषनिष्ठः पुरुषस्वरूपतिरोधायकः, पुरुषस्य संसारापादकः, बुद्धिनाशो तु तत्परिणामस्य ज्ञानस्याभावेन विषयावच्छेदकाभावात् कैवल्यावस्थानरूपो मोक्षः दुःखसम्बन्धतद्ध्वंसरूपौ संसारमोक्षौ बुद्धेरेव न पुंसः भेदाग्रहादेव अहं बद्धो मुक्तो वेत्यभिमन्यते इति प्रकृतिपुरुषविवेकार्थं शास्त्रस्य सार्थक्यात्। एवं च धार्मिकोऽहं करोमीत्यादिप्रतीत्या कृतिसमानाधिकरण्येन प्रतीयमाना धर्मादयो बुद्धेरेवेति चेन्न।

चेतनोऽहं करोमीति प्रतीत्या ज्ञानसामानाधिकरण्येन प्रतीयमानकृतेः पुरुषनिष्ठत्वौचित्येन कृतिसमानाधिकरण्येन प्रतीयमानधर्मादीनामपि पुरुषनिष्ठत्वौचित्यात्।

नचोक्तगीतावचनात् बुद्धेः कर्तृत्वसिद्धौ चेतनोऽहं करोमीतिप्रतीतिः चैतन्यांशे भ्रमो बुद्धेरचेतनप्रकृतिपरिणामित्वेनाचेतनत्वादिति वाच्यम् "प्रकृतेः क्रियमाणानि" इत्यस्य प्रकृतेरदृष्टस्य गुणैरदृष्टजन्यैरिच्छादिभिः कर्ताऽहमेवेत्यस्य तदर्थतया आत्मनः स्वतन्त्रकर्तृत्वनिरासे तात्पर्यात् तदुक्तं "तत्रैवं सति कर्तारमात्मानं केवलं तु यः" इत्यादिना भगवतेत्यलम्।

इति साङ्ख्यमतखण्डनम्।

अनादित्वमिति। अयमभावः स्तन्यपाने बालस्य प्रवृत्तिर्नेष्टसाधनताज्ञानमन्तरा तच्च नानुभवरूपं बाधादपि तु स्मरणं तच्चानुभवान्तरसापेक्षमिति पूर्वजन्मसत्त्वमिति तत्रापि प्रवृत्तिरेवमेवेति आत्मनोऽनादित्वमिति भावः।

दृष्टजन्यैरिच्छादिभिः कर्ताहमेवेत्यस्य तदर्थत्वात्। "तत्रैवं सति कर्तारमात्मानं केवलं तु यः" इत्यादि वदता भगवता प्रकटीकृतोऽयमुपरिष्टादाशय इति सङ्क्षेपः।

धर्माधर्माश्रय इति। आत्मेत्यनुषज्यते। शरीरस्य तदाश्रयत्वे देहान्तरकृतकर्मणां देहान्तरेण भोगानुपपत्तेः।

विशेषगुणयोगत इति। योग्यविशेषगुणस्य ज्ञानसुखादेः सम्बन्धेनात्मनः प्रत्यक्षत्वं सम्भवति न त्वन्यथा अहं जाने अहं करोमीत्यादिप्रतीतेः॥ ४९॥

प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः।
अहङ्कारस्याश्रयोऽयं मनोमात्रस्य गोचरः॥ ५०॥

अयमात्मा परदेहादौ प्रवृत्त्यादिनाऽनुमीयते। प्रवृत्तिरत्र चेष्टा ज्ञानेच्छाप्रयत्नादीनां देहेऽभावस्योक्तप्रायत्वाच्चेष्टायाश्च प्रयत्नसाध्यत्वाच्चेष्टया प्रयत्नवानात्मानुमीयत इति भावः।

अत्र दृष्टान्तमाह—रथेति। यद्यपि रथकर्म चेष्टा न भवति, तथापि तेन कर्मणा सारथिर्यथाऽनुमीयते तथा चेष्टात्मकेन कर्मणा परात्मानुमीयते इति भावः।

अहङ्कारस्येति। अहङ्कारोऽहमितिप्रत्ययस्तस्याश्रयो विषयः आत्मा न शरीरादिरिति भावः।

मन इति। मनोभिन्नेन्द्रियजन्यप्रत्यक्षाविषयो मानसप्रत्यक्षविषयश्चेत्यर्थः। रूपाद्यभावेनेन्द्रियान्तरायोग्यत्वात्॥ ५०॥

विभुर्बुद्ध्यादिगुणवान्बुद्धिस्तु द्विविधा मता।
अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा॥ ५१॥

विभुत्वं परममहत्त्ववत्त्वम्। तच्च पूर्वमुक्तमपि स्पष्टार्थमुक्तम्। बुद्ध्यादीति। बुद्धिसुखदुःखेच्छादयश्चतुर्दश गुणाः पूर्वमुक्ता वेदितव्याः। अत्रैव प्रस-

---

मुक्तावलीमयूखः।

अनादिभावस्येति। अनादेरपि प्रागभावस्य नाशदर्शनेन भावस्येयुक्तम्॥ ४९॥

परात्मानुमीयते इति। परदेहः आत्मवान् चेष्टावत्त्वाद्रथवदित्यनुमानेन परदेहादावात्मानुमीयते इति। न च दृष्टान्तासिद्धिः इष्टानिष्टप्राप्तिपरिहारानुकूलव्यापाररूपचेष्टाया रथेऽसत्त्वादिति वाच्यम्, चेष्टापदेन उत्तरसंयोगप्राप्तियोग्यक्रियया इव विवक्षणेनादोषात् तस्याश्च रथे सत्त्वेन दृष्टान्तासिद्ध्यभावात्। नचैवमपि जले व्यभिचारः चेष्टापदेन चेतनप्रयुक्तक्रियया एव विवक्षणेनादोषात् तस्याश्च रथे सत्त्वेन जले चासत्त्वेन दृष्टान्तासिद्धिव्यभिचारयोरभावात् "सोऽयमाद्वातः पवते" इति श्रुत्या जलादीनामपि चेतनाधिष्ठितत्वसत्त्वेन व्यभिचाराभावाच्चेति॥ ५०॥

पूर्वमुक्तमिति। 'बुद्ध्यादिषट्कंसङ्ख्यादिपञ्चकं भावना तथा। धर्माधर्मौ गुणा

ज्ञाद्बुद्धेः कतिपयं प्रपञ्चं दर्शयति। बुद्धिस्त्विति। द्वैविध्यं व्युत्पादयति। अनुभूतिरिति। अनुभूतिश्चतुर्विधेति। एतासां चतसृणां करणानि चत्वारि-प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रोक्तानि वेदितव्यानि ॥ ५१ ॥

प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे।
घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम् ॥ ५२ ॥

इन्द्रियजन्यं ज्ञानं प्रत्यक्षम्। यद्यपि मनोरूपेन्द्रियजन्यं सर्वमेव ज्ञानं, तथापीन्द्रियत्वेन रूपेणेन्द्रियाणां यत्र ज्ञाने कारणत्वं तत्प्रत्यक्षमिति विवक्षितम्। ईश्वरप्रत्यक्षं तु न लक्ष्यम्। इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति (गौतम) सूत्रे तथैवोक्तत्वात्।

अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्। अनुमितौ व्याप्तिज्ञानस्योपमितौ सादृश्यज्ञानस्य शाब्दबोधे पदज्ञानस्य स्मृतावनुभवस्य कारणत्वात्तत्र तत्र नातिव्याप्तिः। इदं लक्षणमीश्वरप्रत्यक्षसाधारणम्। परामर्शजन्यं ज्ञानमनुमितिः। यद्यपि परामर्शप्रत्यक्षादिकं परामर्शजन्यं तथापि परामर्शजन्यं

मुक्तावलीमयूखः।

एते आत्मनः स्युश्चतुर्दशः' इत्यनेन साधर्म्यप्रकरणे इति शेषः। (पृष्ठे ४२)

अनुभूतिश्चतुर्विधेति। अयमत्र संग्रहः, प्रत्यक्षमेवेतिचार्वाकः। अनुमितिरपि इति कणादबौद्धौ। उपमितिरपीति केचित्तार्किकाः। शब्दोऽपीति गौतमीयाः। अर्थापत्तिरपीति प्राभाकराः। अनुपलब्धिरपीति भाट्टा वेदान्तिनश्च। सम्भवैतिह्ये अपीति पौराणिकाः। तत्र प्रत्यक्षानुमित्युपमितिशाब्दभेदेनानुभवश्चतुर्विध इति सिद्धान्तिनः। अन्येषामन्तर्भावो मूलकृता व्यतिरेकिप्रन्थे कृतो मया च तत्रैव विवेच(१)यिष्यते ॥ ५१ ॥

इन्द्रियत्वेन रूपेणेति। इन्द्रियत्वावच्छिन्नजनकतानिरूपितजन्यतावत्त्वे सति ज्ञानत्वं प्रत्यक्षस्य लक्षणमितिभावः। अनुमित्यादौ च नेन्द्रियत्वावच्छिन्नजनकतानिरूपितजन्यता अपितु व्याप्तिज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यतेति नातिप्रसङ्गः।

ननु ईश्वरप्रत्यक्षस्य नित्यतया इदं लक्षणं तत्राव्याप्तमत आह—**ईश्वरप्रत्यक्षमिति इन्द्रियार्थेति।** अव्यभिचारीत्यस्य भ्रमभिन्नमित्यर्थः। तथाच इन्द्रियार्थसन्निकर्षोत्पन्नं भ्रमभिन्नं ज्ञानं प्रत्यक्षं तच्च द्विविधम् अव्यपदेश्यं व्यवसायात्मकं च इति सूत्रार्थः अव्यपदेश्यमित्यस्य निर्विकल्पकं व्यवसायात्मकमित्यस्य सविकल्पकमित्यर्थः।

ईश्वरप्रत्यक्षमपि लक्षणमित्यभिप्रेत्याह— **अथवेति।** घटादावतिव्याप्तिवारणाय विशेषणम्, अनुमित्यादावतिव्याप्तिवारणाय विशेषणम्। ननु ज्ञानाकरणकमित्यपहाय ज्ञानाजन्यमित्येवोच्यतामितिचेन्न विशिष्टज्ञानमात्रस्य विशेषणज्ञानजन्यत्वादतिव्याप्त्यापत्तेः॥ नच निदिध्यासनद्वारा मननादिज्ञानकरणके योगिप्रत्यक्षे इदं लक्षणमव्याप्तमिति वाच्यम् ज्ञानकरणकत्वाव्यभिचारिजातिशून्यज्ञानत्वस्यैव प्रत्यक्षत्वाभ्युपगमेनादोषात् तादृशी जातिरनुमितित्वादिरेव प्रत्यक्षत्वं ज्ञानकरणकत्वव्यभिचार्येवेति न दोषः।

परामर्शप्रत्यक्षेति। 'वह्निव्याप्यधूमवान् पर्वत इत्याकारकज्ञानवानहमि'ति परामर्श-

(१) अप्रकाशितेयं विवेचना सत्यवसेर प्रकाशयिष्यते।

हेत्वविषयकं यज्ज्ञानं तदेवानुमितिः। न च कादाचित्कहेतुविषयकानुमितावव्याप्तिरिति वाच्यम्, तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्।

अथवा व्याप्तिज्ञानकरणकं ज्ञानमनुमितिः। एवं सादृश्यज्ञानकरणकं ज्ञानमुपमितिः। पदज्ञानकरणकं ज्ञानं शाब्दबोधः।

वस्तुतो यां कांश्चिदनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्तिप्रत्यक्षावृत्तिजातिमत्त्वमनुमितित्वम्। एवं यत्किञ्चित्प्रत्यक्षादिकमादाय तद्व्यक्तिवृत्त्यनुमित्यवृत्तिजातिमत्त्वं प्रत्यक्षत्वादिकं वाच्यमिति।

जन्यप्रत्यक्षं विभजते घ्राणजादीति। घ्राणजं रासनं चाक्षुषं त्वाचं श्रौत्रं मानसमिति षड्विधं प्रत्यक्षम्। नचेश्वरप्रत्यक्षस्यैवंविभजनान्न्यूनत्वम्, जन्यप्रत्यक्षस्यैव निरूपणीयत्वादुक्तसूत्रानुसारात्॥ ५२॥

घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः॥
तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुतेः॥ ५३॥

गोचर इति ग्राह्य इत्यर्थः। गन्धत्वादीति। आदिपदात् सुरभित्वादिपरिग्रहः। गन्धस्य प्रत्यक्षत्वात्तद्वृत्तिजातिरपि प्रत्यक्षा। गन्धाश्रयग्रहणे तु घ्राणस्य न सामर्थ्यमिति बोध्यम्। तथा रस इति। रसत्वादिसहित इत्यर्थः। तथा शब्दोऽपि। शब्दत्वादिसहितः। गन्धो रसश्च उद्भूतो बोध्यः॥ ५३॥

उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये।
विभागसंयोगपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तम्॥ ५४॥

मुक्तावलीमयूखः।

प्रत्यक्षे विषयविधया परामर्शस्य कारणत्वादिति भावः। कादाचित्केति। 'धूमवान् पर्वतो वह्निमान्' इत्यनुमितौ पक्षतावच्छेदकविधया धूमस्य भानादिति भावः। तथाच परामर्शजन्यं हेत्वविषयकं यज्ज्ञानं तद्वृत्त्यनुभवत्वव्याप्यजातिमत्त्वमनुमितित्वमिति लक्षणं निष्पन्नम्। परामर्शजन्यहेत्वविषयकं ज्ञानं "पर्वतो वह्निमान्" इति तद्वृत्तिरनुभवत्वव्याप्या जातिरनुमितित्वजातिस्तद्वत्त्वं "धूमवान् पर्वतो वह्निमान्" इति हेतुविषयकानुमितावितिलक्षणसमन्वयः। घटज्ञानेऽतिव्याप्तिवारणाय जन्यान्तं, परामर्शप्रत्यक्षेऽतिव्याप्तिवारणाय हेत्वविषयकमिति। परामर्शजन्येऽतिव्याप्तिवारणाय ज्ञानपदम्। स्मृतामादाय प्रत्यक्षादावतिव्याप्तिवारणाय अनुभवत्वव्याप्येति।

ननु परामर्शजन्यमित्यस्य व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यमित्यर्थस्तथा च पक्षधर्मतानिवेशे गौरवमिति लघुलक्षणमाह—अथवेति।

नन्वनुमितिं प्रति न व्याप्तिज्ञानत्वेन कारणता अपितु ज्ञानत्वेन मनस्त्वेन वा एवमुपमितिं प्रत्यपि बोध्यम्। सामग्रीवैलक्षण्यादेव ज्ञानवैलक्षण्योपपत्तिस्तथा चासम्भव इत्यरुचेराह—वस्तुतइति॥ ५२॥

उद्भूतरूपमिति। ओष्मोष्मादावनुद्भूतं रूपमिति न तत्प्रत्यक्षम्। तद्वन्ति उद्भूतरूपवन्ति ॥ ५४ ॥

क्रिया जातिर्योग्यवृत्तिः समवायश्च तादृशः।
गृह्णाति चक्षुः सम्बन्धादालोकोद्भूतरूपयोः ॥ ५५ ॥

योग्येति। पृथक्त्वादिकमपि योग्यव्यक्तिवृत्तितया बोध्यम्। तादृशः योग्यव्यक्तिवृत्तिरित्यर्थः। चक्षुर्योग्यत्वमेव कथं तदाह–गृह्णातीति। आलोकसंयोग उद्भूतरूपं च चाक्षुषप्रत्यक्षे कारणम्। तत्र द्रव्यचाक्षुषं प्रति तयोः समवायसम्बन्धेन कारणत्वम्। द्रव्यसमवेतरूपादिप्रत्यक्षे स्वाश्रयसमवायसम्बन्धेन। द्रव्यसमवेतसमवेतस्य रूपत्वादेः प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेनेति ॥ ५५ ॥

उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः।
रूपान्यचक्षुषो योग्यं रूपमत्रापि कारणम् ॥ ५६ ॥

द्रव्याध्यक्षे—

उद्भूतेति। उद्भूतस्पर्शवद्द्रव्यं त्वचो गोचरः। सोऽपि उद्भूतस्पर्शोऽपि स्पर्शत्वादिसहितः। रूपान्यदिति। रूपभिन्नं रूपत्वादिभिन्नं च यच्चक्षुषा योग्यं तत्त्वगिन्द्रियस्यापि ग्राह्यम्। तथा च पृथक्त्वसङ्ख्यादयो ये चक्षुर्ग्राह्या गुणा उक्ताः एवं क्रिया जातयो योग्यवृत्तयश्च ते त्वचो ग्राह्या इत्यर्थः।

अत्रापि त्वगिन्द्रियजन्यद्रव्यप्रत्यक्षेपि रूपं कारणम्। तथाच बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणम्।

नवीनास्तु बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे न रूपं न वा स्पर्शः कारणं प्रमाणाभावात् किन्तु चाक्षुषप्रत्यक्षे रूपं स्पार्शनप्रत्यक्षे स्पर्शः कारणमन्वयव्यतिरेकात्। बहिरिन्द्रियजन्ये द्रव्यप्रत्यक्षमात्रे किं कारणमिति चेत् न किञ्चित्, आत्मावृत्तिशब्दभिन्नविशेषगुणवत्त्वं वा प्रयोजकमस्तु। रूपस्य कारणत्वे लाघवमिति चेन्न, वायोस्त्वगिन्द्रियेणाग्रहणप्रसङ्गात्। इष्टा-

---

मुक्तावलीमयूखः।

स्वाश्रयसमवायसम्बन्धेनेति। स्वमुद्भूतरूपमालोकसंयोगश्च तदाश्रयो द्रव्यं तत्समवायो रूपे कार्यतावच्छेदकसम्बन्धश्च विषयता।

स्वाश्रयसमवेतसमवायसम्बन्धेनेति। स्वमुद्भूतरूपमालोकसंयोगश्च तदाश्रयो द्रव्यं तत्समवेतं रूपं तत्समवायो रूपत्वे इति। पिशाचादीनां प्रत्यक्षवारणाय उद्भूतरूपस्य, अन्धकारे घटादिप्रत्यक्षवारणाय आलोकसंयोगस्य कारणता चाक्षुषं प्रतीति मन्तव्यम्।

त्वगिन्द्रियजन्यद्रव्यप्रत्यक्षेऽपि रूपमिति। अयमभिप्रायः त्वगिन्द्रियजन्यद्रव्यप्रत्यक्षे स्पर्शस्य चक्षुरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपस्य कारणत्वे गौरवमतोलाघवात् बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपस्य कारणता स्वीक्रियते। नच वायोस्त्वाचप्रत्यक्षं न स्यादिति

पत्तिरिति चेद्भूतस्पर्श एव लाघवात्कारणमस्तु। प्रभाया अप्रत्यक्षत्वे त्विष्टापत्तिरेव किं नेष्यते। तस्मात् प्रभां पश्यामीतिवत् वायुं स्पृशामीति प्रत्यक्षस्य सम्भवाद्वायोरपि प्रत्यक्षं सम्भवत्येव। बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे न रूपस्य न वा स्पर्शस्य हेतुत्वम्। वायुप्रभयोरेकत्वं गृह्यत एव, क्वचिद्द्वित्वादिकमपि, क्वचित्सङ्ख्यापरिमाणाद्यग्रहो दोषादित्याहुः ॥ ५६ ॥

त्वचो योगो मनसा ज्ञानकारणम्।

त्वङ्मनःसंयोगो ज्ञानसामान्ये कारणमित्यर्थः। किं तत्र प्रमाणं, सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्तमानेन मनसा ज्ञानाजननमिति।

ननु सुषुप्तिकाले किं ज्ञानं भविष्यति अनुभवरूपं स्मरणरूपं वा। नाद्यः। अनुभवसामग्र्यभावात्। तथाहि प्रत्यक्षे चक्षुरादिना मनःसंयोगस्य हेतुत्वात्तदभावादेव न चाक्षुषादिप्रत्यक्षम्। ज्ञानादेरभावादेव न मानसं प्रत्यक्षम्। ज्ञानाद्यभावे चात्मनोऽपि न प्रत्यक्षमिति। एवं व्याप्तिज्ञानाभावादेव नानुमितिः। सादृश्यज्ञानाभावान्नोपमितिः। पदज्ञानाभावान्न शाब्दबोधः। इत्यनुभवसामग्र्यभावान्नानुभवः। उद्बोधकाभावाच्च न स्मरणम्। मैवम्। सुषुप्तिप्राक्कालोत्पन्नेच्छादिव्यक्तेस्तत्सम्बन्धेनात्मनश्च प्रत्यक्षत्वप्रसङ्गात्। तदतीन्द्रियत्वे मानाभावात्। सुषुप्तिप्राक्काले निर्विकल्पकमेव नियमेन जायत इत्यत्रापि प्रमाणाभावात्।

अथ ज्ञानमात्रे त्वङ्मनः संयोगस्य यदि कारणत्वं तदा रासनचाक्षुषादिप्रत्यक्षकाले त्वाचप्रत्यक्षं स्यात्। विषयत्वक्संयोगस्य त्वङ्मनः संयोगस्य च सत्त्वात्। परस्परप्रतिबन्धादेकमपि वा न स्यादिति।

अत्र केचित्-पूर्वोक्तयुक्त्या त्वङ्मनोयोगस्य ज्ञानहेतुत्वे सिद्धे चाक्षुषादिसामग्र्याः स्पार्शनादिप्रतिबन्धकत्वमनुभवानुरोधात्कल्प्यत इति।

अन्ये तु सुषुप्त्यनुरोधाच्चर्ममनः संयोगस्य ज्ञानहेतुत्वं कल्प्यते। चाक्षुषादिप्रत्यक्षकाले त्वङ्मनः संयोगाभावान्न स्पार्शनप्रत्यक्षमिति वदन्ति।

मुक्तावलीमयूखः।

वाच्यमिष्टापत्तेः। नच बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे स्पर्शस्यैव कारणताऽस्विति वाच्यम् प्रभायाश्चाक्षुषप्रत्यक्षानापत्तेरिति प्राचीनाः।

नव्यास्तु प्रभां पश्यामीतिवत् वायुं स्पृशामीति प्रत्ययस्यापि सद्भावात् वायुप्रभयोः प्रत्यक्षं भवत्येवेति चाक्षुषप्रत्यक्षे रूपस्य स्पार्शनप्रत्यक्षे स्पर्शस्य कारणताऽन्वयव्यतिरेकबलादास्थीयते बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे किं कारणमिति चेत्? आत्मातिरिक्तद्रव्यभिन्नविशेषगुणवत्त्वमेव कारणमिति गृहाण। न च वायोः स्पार्शनप्रत्यक्षाङ्गीकारे तद्गतसङ्ख्याया अपि प्रत्यक्षं स्यादिति वाच्यम् प्रमागतद्वित्वैकत्वयोरिव वायुगतद्वित्वैकत्वयोरपि प्रत्यक्षत्वेष्टत्वात् क्वचित्सजातीयसंबलनरूपदोषाच्च सङ्ख्यादीनां ग्रहणमित्याहुः।

स्पार्शनादिप्रतिबन्धकत्वमिति। ननु स्पार्शनसामग्र्या एव चाक्षुषादिप्रतिबन्ध-

मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः ॥ ५७ ॥

मनोग्राह्यमिति। मनोजन्यप्रत्यक्षविषय इत्यर्थः। मतिर्ज्ञानम्। कृतिः प्रयत्नः। एवं सुखत्वदुःखत्वादिकमपि मनोग्राह्यम्। एवमात्मापि मनोग्राह्यः किन्तु मनोमात्रस्य गोचर इत्यनेन पूर्वमुक्तत्वादत्र नोक्तः ॥ ५७ ॥

ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते।
महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम् ॥ ५८ ॥

चक्षुःसंयोगाद्यनन्तरं 'घट' इत्याकारकं घटत्वादिविशिष्टज्ञानं न सम्भवति पूर्वं विशेषणस्य घटत्वादेर्ज्ञानाभावात्। विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात्। तथा च प्रथमतो घटघटत्वयोर्वैशिष्ट्यानवगाह्येव ज्ञानं जायते। तदेव निर्विकल्पकम्। तच्च न प्रत्यक्षम्। तथाहि वैशिष्ट्यानवगाहिज्ञानस्य प्रत्यक्षं न भवति 'घटमहं जानामी'ति प्रत्ययात्। तत्रात्मनि ज्ञानं प्रकारीभूय भासते। ज्ञाने घटस्तत्र घटत्वम्। यः प्रकारः स एव विशेषणमित्युच्यते। विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकमित्युच्यते। विशेषणतावच्छेदकप्रकारकं ज्ञानं विशिष्टवैशिष्ट्यज्ञाने कारणम्। निर्विकल्पके च घटत्वादिकं न प्रकारस्तेन घटत्वादिविशिष्टघटादिवैशिष्ट्यभानं ज्ञाने न सम्भवति। घटत्वाद्यप्रकारकं च घटादिविशिष्टज्ञानं न सम्भवति। जात्यखण्डोपाध्यतिरिक्तपदार्थज्ञानस्य किञ्चिद्धर्मप्रकारकत्वनियमात्।

मुक्तावलीमयूखः।

द्रव्यं कुतो न कल्प्यत इति चेन्न तथा सति सर्वत्र स्पार्शनसामग्र्याः सत्त्वेन चाक्षुषप्रत्यक्षस्योच्छेदः स्यादित्याशयात् मनोजन्येति। मनोमात्रजन्येत्यर्थः। अन्यथा मनोजन्यप्रत्यक्षस्य रूपादावपि सत्त्वाद्व्यावर्तकमिदं स्यात्।

वैशिष्ट्यानवगाह्येवेति। वैशिष्ट्यं संसर्गः सांसर्गिकविषयतानवगाह्येवेति यावत्।

घटमहं जानामीति। घटविषयकज्ञानवानहमिति बोधः।

इदमत्र तत्त्वम् निर्विकल्पकं ज्ञानं हि घटघटत्वे इत्याकारकम्।

ननु विषयता प्रकारताख्या विशेष्यताख्या संसर्गताख्या चेति त्रिविधा तत्र निर्विकल्पके त्रिविधविषयताशून्यत्वसत्त्वेन निर्विषयत्वमेव स्यादिति चेन्न तुरीयविषयताया एव तत्राभ्युपगमेनादोषादिति। निर्विकल्पकत्वं च प्रकारताशून्यत्वे सति ज्ञानत्वं, संसर्गताशून्यत्वे सति ज्ञानत्वं, विशेष्यताशून्यत्वे सति ज्ञानत्वं वा।

न च निर्विकल्पकानुव्यवसायोऽस्तु तथा च निर्विकल्पकज्ञानस्य नातीन्द्रियत्वमिति वाच्यम्। रक्तः पटो, घटो द्रव्यम्, इति समूहालम्बनानन्तरं रक्तघटज्ञानवानहमित्यनुव्यवसायवारणाय विशिष्टवैशिष्ट्यावगाहिविषयताशून्यज्ञानस्य अनुव्यवसायानङ्गीकारेण निर्विकल्पकज्ञानानुव्यवसायाभावेनादोषात्। न चैवमपि 'घटघटत्वे' इति निर्विकल्पकानन्तरं घटत्वविशिष्टघटविषयकज्ञानवानहमित्यनुव्यवसायो मास्तु घटत्ववैशिष्ट्यस्य घटे निर्विकल्पकेनाविषयीकरणात् किन्तु घटत्वज्ञानवानह—मित्यनुव्यवसायोऽस्तु जात्यखण्डोपाध्यति

महत्त्वमिति। द्रव्यप्रत्यक्षे महत्त्वं समवायसम्बन्धेन कारणम्। द्रव्यसमवेतानां गुणकर्मसामान्यानां प्रत्यक्षे स्वाश्रयसमवायसम्बन्धेन कारणम्। द्रव्यसमवेतसमवेतानां गुणत्वकर्मत्वादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेन कारणमिति।

इन्द्रियमिति। अत्रापि षड्विध इत्यनुषज्यते।

इन्द्रियत्वं तु न जातिः पृथिवीत्वादिना साङ्कर्यप्रसङ्गात्। किन्तु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकरणमनः संयोगाश्रयत्वमिन्द्रियत्वम्। आत्मादिवारणाय सत्यन्तम्। शब्दभूतविशेषगुणस्य शब्दस्य श्रोत्रे सत्त्वाच्छब्देतरेति। विशेषगुणस्य रूपादेश्चक्षुरादावपि सत्त्वादुद्भूतेति। उद्भूतत्वं न जातिः शुक्लत्वादिना साङ्कर्यात्। न च शुक्लत्वादिव्याप्यं नानेनोद्भूतत्वमिति वाच्यम्, उद्भूतरूपत्वादिना चाक्षुषादौ जनकतानुपपत्तेः किन्तु शुक्लत्वादिव्याप्यं नानेनानुद्भूतत्वं तदभावकूटश्चोद्भूतत्वम् तच्च

मुक्तावलीमयूखः।

रिक्तस्य यत्किञ्चिद्धर्मप्रकारकत्वनियमात् घटत्वस्य स्वरूपतो विषयितासम्बन्धेन ज्ञाने प्रकारकत्वसम्भवादिति वाच्यम्। जातेः समवायेनैव स्वरूपतः प्रकारत्वम् न तु विषयितादिनाप्यित्यदोषात् अन्यथा कालो घटः ज्ञानं घट इति प्रतीतिः प्रमा स्यात् कालिकेन काले विषयितया च ज्ञाने स्वरूपतो घटत्वस्य प्रकारत्वात्।

महत्त्वं षड्विध इति। ननु श्रावणे महत्त्वस्य हेतुत्वे प्रयोजनाभाव इतिचेन्न—

द्रव्यसमवेतप्रत्यक्षत्वावच्छिन्नं प्रति महत्त्वं कारणमित्येवं कारणतास्वीकारे लाघवत्येव प्रयोजनत्वात्। अन्यथा श्रावणान्यद्रव्यसमवेतप्रत्यक्षत्वस्य कार्यतावच्छेदकत्वास्वीकारे गौरवं स्यादिति तत्त्वम्।

स्वाश्रयसमवायेति। स्वं महत्त्वं तदाश्रयो द्रव्यं तत्समवायो रूपादौ कारणतावच्छेदकसम्बन्धश्च विषयता। स्वाश्रयसमवेतेति। स्वं महत्त्वं तदाश्रयो द्रव्यं तत्समवेतं रूपं तत्समवायो रूपत्वे इति।

साङ्कर्यादिति। पृथिवीत्वाभाववति जलीये रसनेन्द्रिये इन्द्रियत्वम् इन्द्रियत्वाभाववति घटादौ पृथिवीत्वं घ्राणेन्द्रिये पृथिवीत्वेन्द्रियत्वयोः समावेशेन साङ्कर्यमिति भावः।

आत्मादिवारणायेति। आत्मादौ योऽतिव्याप्तिरूपो दोषस्तद्वारणायेत्यर्थः। सत्यन्तदाने च शब्दादितरे ये विशेषगुणा ज्ञानादयस्तदाश्रयत्वस्यैवात्मनि सत्त्वादतिव्याप्तिरिति भावः। ननु आत्मभिन्नत्वे सति ज्ञानकारणमनः संयोगाश्रयत्वमिन्द्रियत्वमित्येव लक्षणमस्तु इति चेन्न धर्ममनः संयोगस्य मिथ्यादिमते ज्ञानकारणत्वात्तत्प्रतिव्याप्तिवारणाय मूलोक्तसत्यन्तत्वावश्यकत्वात्।

शुक्लत्वादिना साङ्कर्यादिति। उद्भूतत्वाभाववति चक्षुरिन्द्रियरूपे शुक्लत्वाभाववति गन्धादावुद्भूता 'अन्त्यादिरूपे उद्भूतत्वशुक्लत्वयोः समावेशात्साङ्कर्यमिति भावः।

उद्भूतरूपत्वादिनेति। चाक्षुषं प्रति उद्भूतरूपत्वेन, कारणता स्वीक्रियते तेदानीं न सिद्ध्यति शुक्लत्वादिव्याप्योद्भूतत्वविशिष्टरूपत्वस्य पीतत्वव्याप्योद्भूतत्वविशिष्टरूपत्वस्य चान्यतया सप्तविधरूपसाधारणोद्भूतत्वस्याभावेनैकरूपेण कारणत्वासम्भवादिति भावः।

संयोगादावप्यस्ति तथा च शब्देतरोद्भूतगुणः संयोगादिश्चक्षुरादेरप्यस्त्यतो वैशेषेति । कालादिवारणाय विशेष्यदलम् । इन्द्रियावयवविषयसंयोगस्यापि प्राचां मते प्रत्यक्षजनकत्वादिन्द्रियावयवव्यवारणाय, नवीनमते कालादौ रूपाभावप्रत्यक्षे सन्निकर्षघटकतया करणीभूतचक्षुःसंयोगाश्रयस्य कालादेश्च वारणाय मनः पदम् । ज्ञानकारणमित्यपि तद्वारणाय। करणमिति । असाधारणं कारणं करणम् । असाधारणत्वं व्यापारवत्त्वम् ॥ ५८ ॥

विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः ।
द्रव्यग्रहस्तु संयोगात्संयुक्तसमवायतः ॥ ५९ ॥
द्रव्येषु समवेतानां तथा तत्समवायतः ।
तत्रापि समवेतानां शब्दस्य समवायतः ॥ ६० ॥
तद्वृत्तीनां समवेतसमवायेन तु ग्रहः ।
प्रत्यक्षे समवायस्य विशेषणतया भवेत् ॥ ६१ ॥
विशेषणतया तद्वदभावानां ग्रहो भवेत् ।
यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते ॥ ६२ ॥

विषयेन्द्रियेति । व्यापारः सन्निकर्षः । षड्विधं सन्निकर्षमुदाहरणद्वारा प्रदर्शयति । द्रव्यग्रह इति । द्रव्यप्रत्यक्षमिन्द्रियसंयोगजन्यम् । द्रव्यसमवेतप्रत्यक्षमिन्द्रियसंयुक्तसमवायजन्यम् । एवमग्रेऽपि ।

वस्तुतस्तु द्रव्यचाक्षुषं प्रति चक्षुः संयोगः कारणम् । द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः कारणम् । द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुः संयुक्तसमवेतसमवायः कारणम् । एवमन्यत्रापि विशिष्यैव कार्यकारणभावः ।

परन्तु पृथिवीपरमाणुनीले नीलत्वं पृथ्वीपरमाणौ पृथिवीत्वं च चक्षुषा कथं न गृह्यते तत्र परंपरयोद्भूतरूपसम्बन्धस्य महत्त्वसम्बन्धस्य च सत्त्वा-

---

मुक्तावलीमयूखः ।

शुक्लत्वादिव्याप्यं नानेति । यथा पृथिवीत्वादिना घटत्वस्य साङ्कर्यमाशङ्क्य घटत्वं नाना तद्वच्छुक्लत्वादिव्याप्यमुद्भूतत्वमपि नानेत्यभिप्रायः तथा हि पृथिवीत्वाभाववति तैजस (स्वर्ण) घटे घटत्वं घटत्वाभाववति मृत्पिण्डादौ पृथिवीत्वं मृद्घटे पृथिवीत्वघटत्वयोः समावेशात्साङ्कर्यं स्यादतः पृथिवीत्वव्याप्यं घटत्वमन्यत् तेजस्त्वव्याप्यं घटत्वमन्यदिति ।

ननु तज्जन्यत्वे सति तज्जन्यजनकत्वरूपस्य व्यापारत्वस्य श्रोत्रशब्दसम्बन्धे समवायेऽसम्भवः समवायस्याजन्यत्वादित्यत आह—व्यापारः सन्निकर्ष इति ।

ननु द्रव्यप्रत्यक्षे इन्द्रियसम्बन्धत्वेन हेतुत्वे स्वकप्रभासंयोगाच्चाक्षुषापत्तिः अन्धकारे घटचक्षुःसंयोगाभावप्रत्यक्षापत्तिश्चेत्यरुचेराह—यस्तुतस्त्विति ।

परम्परयेति । स्वाश्रयसमवेतसमवेतत्वसम्बन्धेनेत्यर्थः । स्वमुद्भूतरूपं तदाश्रयो

त्। तथाहि-नीले नीलत्वं जातिरेकैव घटनीले परमाणुनीले च वर्तते। तथाच महत्त्वसम्बन्धो घटनीलमादाय वर्तते। उद्भूतरूपसम्बन्धस्तूभयमादायैव वर्तते। एवं पृथिवीत्वेऽपि घटादिकमादाय महत्त्वसम्बन्धो बोध्यः।

एवं वायौ तदीयस्पर्शादौ च सत्तायाश्चाक्षुषप्रत्यक्षं स्यात्।

तस्मादुद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्य द्रव्यसमवेतचाक्षुषप्रत्यक्षे, तादृशचक्षुः संयुक्तसमवेतसमवायस्य द्रव्यसमवेतचाक्षुषप्रत्यक्षे कारणत्वं वाच्यम्। इत्थं च परमाणुनीलादौ न नीलत्वादिग्रहः, परमाणौचक्षुः संयोगस्य महत्त्वावच्छिन्नत्वाभावात्। एवं वाय्वादौ न सत्तादिचाक्षुषं तत्र चक्षुःसंयोगस्य रूपावच्छिन्नत्वाभावात्।

एवं यत्र घटस्य मध्यावच्छेदेनालोकसंयोगः चक्षुः संयोगस्तु बाह्यावच्छेदेन तत्र घटप्रत्यक्षाभावादालोकसंयोगावच्छिन्नत्वं चक्षुः संयोगे विशेषणं देयम्।

एवं द्रव्यस्पार्शनप्रत्यक्षेत्वक्संयोगः कारणम्। द्रव्यसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवायः, कारणम्। द्रव्यसमवेतसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवेतसमवायः कारणम्।

अत्रापि महत्त्वावच्छिन्नत्वमुद्भूतस्पर्शावच्छिन्नत्वं च पूर्ववदेव बोध्यम्।

एवं गन्धप्रत्यक्षे घ्राणसंयुक्तसमवायः गन्धसमवेतस्य घ्राणजन्यप्रत्यक्षे घ्राणसंयुक्तसमवेतसमवायः कारणम्।

एवं रसप्रत्यक्षे रसनासंयुक्तसमवायः रससमवेतरासनप्रत्यक्षे रसना संयुक्तसमवेतसमवायः कारणम्।

शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः कारणम्। शब्दसमवेतश्रावणप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः कारणम्।

अत्र सर्वं प्रत्यक्षं लौकिकं बोध्यम्। वक्ष्यमाणमलौकिकप्रत्यक्षमिन्द्रियसंयोगादिकं विनापि भवति। एवमात्मनः प्रत्यक्षे मनःसंयोगः, आत्मसमवेतमानसप्रत्यक्षे मनः संयुक्तसमवायः, आत्मसमवेत समवेत मानसप्रत्यक्षे-

---

मुक्तावलीमयूखः।

घटः तत्समवेतं नीलरूपं तत्समवायो नीलत्वे। एवं स्वमुद्भूतरूपं तदाश्रयः कपालं तत्समवेतो घटः तत्समवायः पृथिवीत्वे। एवं स्वं महत्त्वं तदाश्रयो घटस्तत्समवेतं नीलरूपं तत्समवायो नीलत्वे।

उद्भूतरूपावच्छिन्नेति। इदं महत्त्वावच्छिन्नेति च चक्षुःसंयोगे विशेषणम्। अर्थात् यत्र चक्षुःसंयोगः, समवायेन वर्तते तत्रैव महत्त्वोद्भूतरूपयोरपि समवायेन स्थितिरपेक्ष्यत इति तथा च परमाणौ चक्षुःसंयोगस्तत्रोद्भूतरूपसत्त्वेऽपि महत्त्वाभावात् वायौ महत्त्वसत्त्वेऽपि उद्भूतरूपाभावान्न परमाण्वादौ पृथिवीत्वादिकं न वा वायौ सत्तायाश्चाक्षुषं प्रत्यक्षमिति। गन्धसमवेतस्येति। गन्धत्वादेरित्यर्थः। घ्राणेति। घ्राणसंयुक्तो घटादिस्तत्समवेतो गन्धस्तत्समवायो गन्धत्वे इति।

नः संयुक्तसमवेतसमवायः कारणम्। अभावप्रत्यक्षे समवायप्रत्यक्षे चेन्द्रिय-सम्बद्धविशेषणता हेतुः। वैशेषिकमते तु समवायो न प्रत्यक्षः।

अत्र यद्यपि विशेषणता नानाविधा-तथाहि भूतलादौ घटाद्यभावः स्वसंयुक्तविशेषणतया गृह्यते, सङ्ख्यादौ रूपाद्यभावा स्वसंयुक्त समवेतविशेषणतया, सङ्ख्यात्वादौ रूपाद्यभावः स्वसंयुक्तसमवेतसमवेतविशेषणतया, शब्दाभावःकेवलश्रोत्रावच्छिन्नविशेषणतया, कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया, एवं कत्वाद्यवच्छिन्नाभावगत्वाभावादिकं श्रोत्रावच्छिन्नविशेषणविशेषणतया, एवं घटाभावादौ पटाभावः चक्षुःसंयुक्तविशेषणविशेषणतया, एवमन्यदप्यूह्यम्। तथापि विशेषणतात्वरूपेणैव सा गण्यते। अन्यथा षोढा सन्निकर्ष इति प्राचां प्रवादा व्याहन्येतेति।

यदि(१) स्यादुपलभ्येति। अत्राभावप्रत्यक्षे योग्यानुपलब्धिः कारणम्। तथाहि। भूतलादौ घटादिज्ञाने जाते घटाभावादिकं न ज्ञायते। तेनाभावोपलम्भे प्रतियोग्युपलम्भाभावः कारणम्। तत्र योग्यताप्यपेक्षिता सा च प्रतियोगिसत्त्वप्रसञ्जन(२)प्रसञ्जितप्रतियोगिकत्वरूपा। तदर्थञ्च प्रतियोगिनो घटादेः सत्त्वप्रसक्त्या प्रसञ्जित उपलम्भरूपः प्रतियोगी यस्य सोऽभावप्रत्यक्षे हेतुः। तथाहि। यत्रालोकसंयोगादिकं वर्तते तत्र यद्यत्र घटः स्यात्तर्हि उपलभ्येतत्यापादयितुं शक्यते। तत्र घटाभावादिप्रत्यक्षं भवति। अन्धकारे तु नापादयितुं शक्यते। तेन घटाभावादेरन्धकारे न चाक्षुषप्रत्यक्षम्, स्पार्शनप्रत्यक्षं तु भवत्येव, आलोकसंयोगं विनापि स्पार्शनप्रत्यक्षस्यापादयितुं शक्यत्वात्। गुरुत्वादिकं यदयोग्यं तदभावस्तु न प्रत्यक्षस्तत्र गुरुत्वादिप्र-

मुक्तावलीमयूखः।

समवायो न प्रत्यक्ष इति। घटाकाशसंयोगस्य प्रत्यक्षवारणाय सम्बन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुतेति तेषामभिप्रायः। नैयायिकास्तु संयोगप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुतेति स्वीकारेणोक्तदोषवारणसम्भवात् समवायस्य प्रत्यक्षत्वमेवाभ्युपगच्छन्ति।

स्वसंयुक्तविशेषणतयेति। विशेषणता च स्वरूपसम्बन्धविशेषः। स्वं चक्षुः तत्संयुक्तं भूतलं तद्विशेषणता घटाभावे घटाभाववद्भूतलमिति ज्ञाने घटाभावस्य विशेषणत्वात्।

स्वसंयुक्तसमवेतविशेषणतयेति। स्वं चक्षुः तत्संयुक्तो घटः तत्समवेता सङ्ख्या तद् विशेषणता रूपाभावे। स्वसंयुक्तसमवेतसमवेतविशेषणतयेति। स्वं चक्षुः तत्संयुक्तोघटस्तत्समवेता एकत्वादिसंख्या तत्समवेतं संख्यात्वादिकं तद्विशेषणता रूपाभावे।

योग्यानुपलब्धिरिति। योग्या चासौ अनुपलब्धिरिति विग्रहः।

(१) मीमांसकाः अभावो न प्रत्यक्षमिति स्वीकृत्य अनुपलब्धिप्रमाणजन्यानुपलम्भात्मकप्रमिति विषय एवेति वदन्ति तन्मतं दूषयति-यदिस्यादिति—

(२) प्रतियोगिनः घटादेः सत्तायाः प्रसञ्जनं आरोपः इति प्रतियोगिसत्वप्रसञ्जनं 'यद्यत्रघटः स्याद्' इत्याकारकस्तेन प्रसञ्जितः आरोपितः प्रतियोगी 'तर्हि उपलभ्येत' इत्यापादविषयो घटोपालम्भः घटप्रत्यक्षं तदेव प्रतियोगी यस्य तत्त्वमित्यर्थः।

इति नव्य-व्याकरण-सहित्याचार्य श्रीरामगोविन्दशुक्लरचितटिप्पणी समाप्ता।

त्यक्तस्यापादयितुमशक्यत्वात्। घ्राणे रूपाभावः। पाणौ सौरभाभावः। गुदे तिक्ताभावः। श्रोत्रे शब्दाभावः। आत्मनि सुखाभावः। एवमादायस्तत्त दिन्द्रियैर्गृह्यन्ते तत्तत्प्रत्यक्षस्यापादयितुं शक्यत्वात्। संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता। अन्योन्याभावप्रत्यक्षे त्वधिकरणयोग्यताऽपेक्षिता। अतः स्तम्भादौ पिशाचादिभेदोऽपि चक्षुषा गृह्यत एव ॥ ५६ ॥ ६० ॥ ६१ ॥ ६२ ॥

एवं प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधम्। तत्र लौकिकप्रत्यक्षे षोढा सन्निकर्षो वर्णितः। अलौकिकसन्निकर्षस्त्विदानीमुच्यते—

अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥ ६३ ॥

अलौकिकस्त्विति। व्यापारः सन्निकर्षः। सामान्यलक्षण इति सामान्यं लक्षणं यस्येत्यर्थः ॥ ६३ ॥

अत्र लक्षणपदेन यदि स्वरूपमुच्यते तदा सामान्यस्वरूपा प्रत्यासत्तिरित्यर्थो लभ्यते। तच्चेन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतं बोध्यम्। तथाहि यत्रेन्द्रियसंयुक्तो धूमादिस्तद्विशेष्यकं धूम इति ज्ञानं यत्र जातं तत्र ज्ञाने धूमत्वं प्रकारः तत्र धूमत्वेन सन्निकर्षेण धूमा इत्येवंरूपं सकलधूमविषयकं ज्ञानं जायते। अत्र यदीन्द्रियसम्बद्धमित्येवोच्यते तदा धूलीपटले धूमत्वभ्रमानन्तरं सकलधूमविषयकं ज्ञानं न स्यात् तत्र धूमत्वेन सहइन्द्रियसम्बन्धाभावात्। मन्मते तु इन्द्रियसम्बद्धं धूलीपटलं तद्विशेष्यकं धूम इति ज्ञानम्, तत्र प्रकारीभूतं धूमत्वं प्रत्यासत्तिः। इन्द्रियसम्बन्धश्च लौकिको ग्राह्यः। इदं च बहिरिन्द्रियस्थले। मानसस्थले तु ज्ञानप्रकारीभूतं सामान्यमात्रं प्रत्यासत्तिः॥

परन्तु समानानां भावः सामान्यम्। तच्च क्वचिन्नित्यं धूमत्वादि, क्वचिदनित्यं घटादि। यत्रैको घटः संयोगेन भूतले, समवायेन कपाले ज्ञातस्तदनन्तरं सर्वेषामेव तद्घटवतां भूतलादीनां कपालादीनां वा ज्ञानं भवति।

मुक्तावलीमयूखः।

गुरुत्वादिकमिति। नन्विदमयुक्तं पिशाचत्वादिजातेरयोग्यत्वेऽपि तदभावस्य स्तम्भादौ प्रत्यक्षत्वाङ्गीकारादिति चेन्न। गुरुत्वादिकमित्यादिपदस्य तादात्म्येन प्रत्यक्षप्रतिबन्धकजातिभिन्नसामान्याभावपरतयाऽदोषात्। पिशाचत्वजातिः स्वप्रत्यक्षं प्रति तादात्म्येन न प्रतिबन्धिका पिशाचत्वस्य क्रियाजातिर्योग्यवृत्तिरित्यादिना अयोग्यवृत्तित्वेन अयोग्यत्वस्य पूर्वमुक्तत्वा तत्प्रत्यक्षस्यापादानासम्भवेन तस्य प्रत्यक्षप्रतिबन्धकत्वकल्पने बीजाभावात्। पिशाचादिभेदेति। पिशाचे स्तम्भभेदस्य च न प्रत्यक्षत्वं पिशाचस्वरूपस्य भेदाधिकरणस्यायोग्यत्वादिति बोध्यम्।

तत्र लक्षणपदेनेति। ननु सामान्यं लक्षणं स्वरूपं यस्य स सामान्यलक्षणो व्यापार इति स्वीकारे सामान्यरूपा प्रत्यासत्तिरिति लभ्यते सामान्यं चेन्द्रियसम्बद्धविशेष्यकज्ञा-

तत्रेदं बोध्यम्। परन्तु सामान्यं येन सम्बन्धेन ज्ञायते तेन सम्बन्धेनाधिकरणानां प्रत्यासत्तिः। किं तु यत्र तद्घटनाशानन्तरं तद्घटवतः स्मरणं जातं तत्र सामान्यलक्षणया सर्वेषां तद्घटवतां भानं न स्यात् सामान्यस्य तदानीमभावात्। किंचेन्द्रियसम्बद्धविशेष्यकं घट इति ज्ञानं यत्र जातं तत्र परदिने इन्द्रियं संबन्धं विनापि तादृशज्ञानप्रकारीभूतसामान्यस्य सत्त्वात्तादृशज्ञानं कुतो न जायते, तस्मात्सामान्यविषयकं ज्ञानं प्रत्यासत्तिर्न तु सामान्यमित्याह-

आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते।

आसत्तिः प्रत्यासत्तिरित्यर्थः। तथाच सामान्यलक्षण इत्यत्र लक्षणशब्दस्य विषयोऽर्थः। तेन सामान्यविषयकं ज्ञानं प्रत्यासत्तिरित्यर्थो लभ्यते।

ननु चक्षुःसंयोगादिकं विनापि सामान्यज्ञानं यत्र वर्तते तत्र सकलघटादीनां चाक्षुषादिप्रत्यक्षं स्यादत आह—

तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते ॥ ६४ ॥

तदिति। अस्यार्थः—यदा बहिरिन्द्रियेण सामान्यलक्षणया ज्ञानं जननीयं तदा यत्किंचिद्धर्मिणि तत्सामान्यस्य तदिन्द्रियजन्यज्ञानस्य सामग्र्यपेक्षिता। सा च सामग्री चक्षुःसंयोगालोकसंयोगादिकम्। तेनान्धकारादौ चक्षुरादिना तादृशज्ञानं न जायते ॥ ६४ ॥

ननु ज्ञानलक्षणा प्रत्यासत्तियदि ज्ञानरूपा सामान्यलक्षणापि ज्ञानरूपा तदा तयोर्भेदो न स्यादत आह—

विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः।

सामान्यलक्षणा प्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जनयति। ज्ञानलक्षणा प्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिरिति।

अत्रायमर्थः। प्रत्यक्षे सन्निकर्षं विना भानं न सम्भवति। तथा च सामान्यलक्षणां विना धूमत्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनां च भानं कथं भवेत्तदर्थं सामान्यलक्षणा स्वीक्रियते।

न च सकलवह्निधूमभानाभावे का क्षतिरिति वाच्यं, प्रत्यक्षधूमेवह्निस-

---

मुक्तावलीमयूखः।

न प्रकारीभूतं बोध्यम् तथाच यत्रेन्द्रियसंयुक्तो धूमस्तद्विशेष्यकं ज्ञानं धूम इति तत्र ज्ञानेप्रकारीभूतं धूमत्वं तेन सन्निकर्षेण सकलधूमविषयकं ज्ञानं जायते इति अत्र सामान्यपदेन समानानां भावः सामान्यमिति व्युत्पत्त्या धर्ममात्रं गृह्यते न तु जातिमात्रम् एवं च यत्र तद्घटनाशानन्तरं तद्घटवतः स्मरणं जातं तत्र सामान्यलक्षणसन्निकर्षेण सर्वेषां तद्घटवतां स्मरणं न स्यात् घटरूपसामान्यस्य तदानीमभावादिति चेन्न सामान्यं लक्षणं विषयो यस्य स सामन्यलक्षण इति स्वीकारेण सामान्यज्ञानस्वरूपप्रत्यासत्तेर्लाभेन घटरूपसामान्यस्याभावेपि तज्ज्ञानरूपप्रत्यासत्तेः सत्त्वेनादोषादिति सङ्क्षेपः।

ननु यदि सामान्यलक्षणाप्रत्यासत्तिर्ज्ञानरूपा ज्ञानलक्षणापि ज्ञानरूपा तदा तयोर्भेदो न स्यादिति चेत्र सामान्यलक्षणाप्रत्यासत्तिर्हि सामान्याश्रयस्य ज्ञानं जनयति ज्ञानलक्षणा तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिरिति तयोर्भेदात्।

म्बन्धस्य गृहीतत्वादन्यधूमस्य चानुपस्थितत्वाद्धूमो वह्निव्याप्यो न वेति संशयानुपपत्तेः। मन्मते तु सामान्यलक्षणया सकलधूमोपस्थितौ कालान्तरीयदेशान्तरीयधूमे वह्निव्याप्यत्वसन्देहः सम्भवति।

न च सामान्यलक्षणस्वीकारे प्रमेयत्वेन सकलप्रमेयज्ञाने जाते सार्वज्ञापत्तिरिति वाच्यं, प्रमेयत्वेन सकलप्रमेयज्ञाने जातेऽपि विशिष्य सकलपदार्थानामज्ञातत्वेन सार्वज्ञ्याभावात्।

एवं ज्ञानलक्षणाया अस्वीकारे सुरभि चन्दनमिति ज्ञाने सौरभस्य भानं कथं स्यात्। यद्यपि सामान्यलक्षणयापि सौरभभानं सम्भवति तथापि सौरभत्वस्य भानं ज्ञानलक्षणया। एवं यत्र धूमत्वेन धूलीपटलं ज्ञातं तत्र धूलीपटलस्यानुव्यवसाये भानं ज्ञानलक्षणया।

योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः।

योगज इति। योगाभ्यासजनितो धर्मविशेषः श्रुतिस्मृतिपुराणादिप्रतिपाद्य इत्यर्थः। युक्तयुञ्जानभेदत इति। युक्तयुञ्जानरूपयोगिद्वैविध्याद्धर्मस्य द्वैविध्यमिति भावः ॥ ६५ ॥

युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः।

युक्तस्य तावद्योगजधर्मसहायेन मनसा आकाशपरमाण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति। द्वितीयस्य चिन्ताविशेषोऽपि सहकारीति।

इति श्रीविश्वनाथपञ्चाननमहाचार्यविरचितायां सिद्धान्तमुक्तावल्यां प्रत्यक्षखण्डम्।

मुक्तावलीमयूखः।

ननु सामान्यलक्षणा प्रत्यासत्तिः किमर्थमङ्गीक्रियत इति चेच्छ्रूयताम् यदि सामान्यलक्षणा प्रत्यासत्तिर्न स्यात् तदा प्रत्यक्षधूमे वह्निव्याप्यत्वस्य गृहीतत्वात् धूमान्तरस्य चानुपस्थितत्वात् धूमो वह्निव्याप्यो न वेति संदेहो न स्यात् मम तु सामान्यलक्षणया धूमत्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनां च ज्ञाने जाते कालान्तरीयदेशान्तरीयधूमे वह्निव्याप्यत्वसंदेहः सम्भवतीति।

ननु ज्ञानलक्षणाप्रत्यासत्तेः किं प्रयोजनमिति चेदुच्यते ज्ञानलक्षणाया अस्वीकारे सुरभि चन्दनमिति ज्ञाने सौरभस्य भानं न स्यात् चक्षुषश्चन्दनेन सन्निकर्षस्य सत्वेऽपि सौरभेण सन्निकर्षाभावात्। नच चक्षुषश्चन्दनेन संयोगसन्निकर्षसत्त्वे सौरभेणापि स्वसंयुक्तसमवायसन्निकर्षोऽस्त्येवेति कथमेतदिति वाच्यम् योग्यचक्षुः सन्निकर्षाभावेन सौरभस्य चाक्षुषं न स्यादित्यलं पल्लवितेन।

यद्यपि सौरभस्य भानं सामान्यलक्षणयापि सम्भवति तथापि सौरभत्वस्य भानं ज्ञानलक्षणयैव एवं च सौरभांशे चक्षुषोऽलौकिकसन्निकर्षः चन्दनांशे च लौकिकः सन्निकर्ष इति बोध्यम्। ज्ञानलक्षणासन्निकर्षश्च स्वसंयुक्तमनः संयुक्तात्मसमवेतज्ञानविषयत्वरूपः। स्वं चक्षुः तत्संयुक्तं मनः तत्संयुक्त आत्मा तत्समवेतं सौरभज्ञानं तद्विषयत्वं सौरभ इति तत्त्वम्।

रामेश्वरतनूजन्मसूर्यनारायणोदिते। मुक्तावलिमयूखेऽस्मिन् प्रत्यक्षं पूर्णतामगात् ॥


इति न्यायव्याकरणाचार्य सूर्यनारायणशुक्लविरचिते मुक्तावलीमयूखे प्रत्यक्षखण्डं संपूर्णम्।

* श्रीगणेशाय नमः *

मयूखसहितमुक्तावलीसमेता

कारिकावली

अनुमानखण्डः



न्यायसिद्धान्तमुक्तावली।

व्यापारस्तु परामर्शः, करणं व्याप्तिधीर्भवेत् ॥ ६६ ॥
अनुमायां, ज्ञायमानं लिङ्गं तु करणं न हि।
अनागतादिलिङ्गेन न स्यादनुमितिस्तदा ॥ ६७ ॥

अनुमितिं व्युत्पादयति । व्यापारस्त्विति । अनुमितौ व्याप्तिज्ञानं करणं, परामर्शो व्यापारः ।

तथा हि—येन पुरुषेण महानसादौ धूमे वह्नेर्व्याप्तिर्गृहीता, पश्चात् स एव पुरुषः क्वचित् पर्वतादावविच्छिन्नमूलां धूमरेखां पश्यति, तदनन्तरं 'धूमो वह्निव्याप्य' इत्येवंरूपं व्याप्तिस्मरणं तस्य भवति, पश्चाच्च वह्निव्याप्यधूमवानयमिति ज्ञानम्, स एव परामर्श इत्युच्यते । तदनन्तरं पर्वतो वह्निमानित्यनुमितिर्जायते ।

अत्र प्राचीनास्तु व्याप्यत्वेन ज्ञायमानं लिङ्गमनुमितिकरणमिति वदन्ति, तदु दूषयति। ज्ञायमानमिति। लिङ्गस्याऽनुमित्यकरणत्वे युक्तिमाह। अनागतादेति। यद्यनुमितौ लिङ्गं करणं स्यात्, तदाऽनागतेन लिङ्गेन, विनष्टेन, चाऽनुमितिर्न स्यात्, अनुमितिकरणस्य तदानीमभावादिति ॥ ६६ ॥ ६७ ॥

मुक्तावलीमयूखः ।

व्यापार इति । तज्जन्यत्वे सति तज्जन्यजनकत्वं व्यापारत्वम् परामर्शो हि व्याप्तिज्ञानजन्यः व्याप्तिज्ञानजन्यानुमितिजनकश्चेति भवति तस्य व्याप्तिज्ञानव्यापारत्वमिति ।

अनागतेनेति। तथा च इयं शाला भाविवह्निमती भाविधूमात्, इयं शाला अतीतवह्निमती अतीतधूमात्, इति अनागतविनष्टाभ्यां लिङ्गाभ्यामनुमितिर्न स्यात् तदानी लिङ्गस्य धूमस्याभावात्। मम तु धूमस्याभावेऽपि धूमज्ञानस्य सत्त्वान्न दोष इति भावः ॥ ६६ ॥ ६७ ॥

व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते ।

व्याप्यस्येति । व्याप्तिविशिष्टस्य पदेन सह वैशिष्ट्यावगाहिज्ञानमनुमितौ जनकं, तच्च 'पक्षे व्याप्य' इति ज्ञानं, 'पक्षो व्याप्यवान्' इति ज्ञानं वा, अनुमितिस्तु 'पक्षे व्याप्य' इति ज्ञानात् 'पक्षे साध्यम्' इत्याकारिका, 'पक्षो व्याप्यवान्' इति ज्ञानात् 'पक्षः साध्यवान्' इत्याकारिका ।

मुक्तावलीमयूखः ।

अनुमितिस्त्विति । अयं भावः द्विविधादपि परामर्शात् 'पक्षः साध्यवान्' इत्येवमाकारानुमितिस्वीकारे यदा व्याप्यप्रकारकपक्षविशेष्यकपरामर्शादनुमितिर्जाता तदा पक्षप्रकारकव्याप्यविशेष्यकः परामर्शो नास्ति यदा च पक्षप्रकारकव्याप्यविशेष्यकपरामर्शादनुमितिर्जाता तदा व्याप्यप्रकारकपक्षविशेष्यकः परामर्शो नास्तीति कारणाभावे कार्योत्पादरूपव्यतिरेकव्यभिचारसत्त्वात् कस्यापि परामर्शस्य कारणत्वं न स्यात् अतः 'पक्षो व्याप्यवान्' इत्याकारकपक्षविशेष्यकपरामर्शात् पक्षविशेषिका 'पक्षः साध्यवान्, इत्याकारिका, 'पक्षे व्याप्य' इति व्याप्यविशेष्यकपरामर्शात् साध्यविशेषिका 'पक्षे साध्यम्' इत्याकारिकाऽनुमितिः स्वीक्रियते एवं च एकधर्मावच्छिन्नकार्यं प्रति यदानेकधर्मावच्छिन्नस्य कारणता तदा व्यतिरेकव्यभिचारः प्रकृते च साध्यप्रकारकपक्षविशेष्यकानुमितित्वावच्छिन्नं प्रति व्याप्यप्रकारकपक्षविशेष्यकपरामर्शत्वावच्छिन्नस्य ; पक्षप्रकारकसाध्यविशेष्यकानुमितित्वावच्छिन्नं प्रति च पक्षप्रकारकव्याप्यविशेष्यकपरामर्शत्वावच्छिन्नस्य कारणतया एकधर्मावच्छिन्नकार्यं प्रति अनेकधर्मावच्छिन्नस्य कारणस्याभावान्न व्यतिरेकव्यभिचारः ।

एतदुक्तं भवति—'वह्निव्याप्यधूमवान् पर्वतः' इति परामर्शात् 'पर्वतो वह्निमान्' इत्याकारानुमितिः 'पर्वते वह्निव्याप्यो धूमः' इति परामर्शात् पर्वते वह्निः' इत्याकारानुमितिर्जायते इति ।

ननु परामर्शस्य व्याप्यप्रकारकपक्षविशेष्यकपक्षप्रकारकव्याप्यविशेष्यकान्यतरपरामर्शत्वेन पक्षसाध्यवानित्याकारानुमितिं प्रति कारणतास्वीकारेण अन्यतरपरामर्शत्वावच्छिन्नकारणस्य सत्त्वान्न व्यतिरेकव्यभिचारः कारणतावच्छेदकावच्छिन्नप्रतियोगिताककारणाभावे कार्यतावच्छेदकावच्छिन्नकार्योत्पादस्यैव व्यतिरेकव्यभिचाररूपत्वादिति चेन्न-तद्भिन्नत्वे सति तद्भेदवान् यः तत्प्रतियोगिकभेदवत्त्वम् अन्यतरत्वम् यथा घटभिन्नत्वे सति पटभेदवद् एतद्द्वयातिरिक्तं जगन्मात्रं तद्भिन्नत्वमेतद्द्वये इति इदमेव घटपटान्यतरत्वं नाम एवं पक्षविशेष्यकपरामर्शभिन्नत्वे सति व्याप्यविशेष्यकपरामर्शभिन्नं एतद्द्वयातिरिक्तं जगन्मात्रं तद्भिन्नत्वं द्विविधपरामर्शे इति इदमेव पक्षविशेष्यकव्याप्यविशेष्यकपरामर्शान्यतरत्वमिति एवं चान्यतरत्वरूपकारणतावच्छेदककुक्षौ जगतः प्रवेशेन विशेष्यविशेषणभावव्यत्यासेन व्याप्यविशेष्यकपरामर्शभिन्नत्वे सति पक्षविशेष्यकपरामर्शभिन्नो यः तद्भिन्नत्वरूपस्य पक्षविशेष्यकपरामर्शभिन्नत्वे सति व्याप्यविशेष्यकपरामर्शभिन्नो यः तत्प्रतियोगिकभेदवत्त्वरूपस्य च अन्यतरत्वस्य विनिगमनाविरहेण कारणतावच्छेदकत्वेन च गौरवेणान्यतरत्वेन कारणतायाः स्वीकर्तुमयोग्यत्वादिति ।

द्विविधादपि परामर्शात् पक्षः साध्यवानित्येवाऽनुमितिरित्यन्ये।

ननु 'वह्निव्याप्यधूमवान् पर्वत' इति ज्ञानं विनाऽपि यत्र पर्वतो धूमवानिति प्रत्यक्षं, ततो 'वह्निव्याप्यो धूम' इति व्याप्तिस्मरणं, तत्र ज्ञानद्वयादेवाऽनुमितेर्दर्शनात् व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं न सर्वत्र कारणं,

---

मुक्तावलीमयूखः।

द्विविधादपीति। ननु द्विविधादपि परामर्शादेकविधानुमितिस्वीकारे व्यतिरेकव्यभिचार इति चेन्न—व्याप्यप्रकारकपक्षविशेष्यकपरामर्शाव्यवहितोत्तरक्षणजायमानपक्षः साध्यवानित्याकारकानुमितित्वावच्छिन्नं प्रति व्याप्यप्रकारकवह्निविशेष्यकपरामर्शस्य कारणता एवं पक्षप्रकारकव्याप्यविशेष्यकपरामर्शाव्यवहितोत्तरक्षणजायमान 'पक्षः साध्यवान्' इत्याकारकानुमितित्वावच्छिन्नं प्रति पक्षप्रकारकव्याप्यविशेष्यकपरामर्शस्य कारणता इति स्वीकारेण व्यतिरेकव्यभिचाराभावात्।

वस्तुतस्तु एतदपेक्षयापि लाघवात् पक्षनिष्ठविषयतानिरूपितव्याप्यनिष्ठविषयताकपरामर्शत्वेन द्विविधपरामर्शस्य 'पक्षः साध्यवान्' इत्याकारानुमितिं प्रति कारणतास्वीकारात् व्यतिरेकव्यभिचारवारणं बोध्यम्, द्विविधपरामर्शात् पक्षविशेष्यकसाध्यविशेष्यकानुमितिद्वयस्वीकारस्तु नोचितः अनुभवविरोधादिति भावः।

केचित्तु अनुभवानुरोधेन पक्षविशेष्यकादेव परामर्शादनुमितिर्जायते न तु व्याप्यविशेष्यकात् अत एव वह्निव्याप्यधूमवांश्चायमित्याकारकः पक्षविशेष्यक एवोपनय इति वदन्ति।

मीमांसकः शङ्कते नन्विति। इदं हि तेषां मतम् यन्महानसादौ वह्निसहचरितधूमदर्शनेन 'धूमो वह्निव्याप्य' इति व्याप्तिग्रहे जाते पश्चाद् 'पर्वतो धूमवान्' इति पक्षधर्मताज्ञानात् 'पर्वतो वह्निमान्' इत्यनुमितिर्जायते व्याप्त्यनुभवस्यानुमिति प्रति कारणता तु संस्कारद्वारा। न च संस्कारजन्यत्वेन अनुमितेः स्मृतित्वापत्तिरिति वाच्यम् संस्कारजन्यत्वस्य संस्कारध्वंससाधारण्येन स्मृतित्वाप्रयोजकत्वादिति। न्यायमते तु महानसादौ वह्निसहचरितधूमदर्शनेन 'धूमो वह्निव्याप्य' इति व्याप्त्यनुभवः ततः 'पर्वतो धूमवान्' इति पक्षधर्मताज्ञानं ततः व्याप्तिस्मरणं ततः परामर्शः ततोऽनुमितिरिति।

व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानमिति। ज्ञानाकारश्च 'वह्निव्याप्यधूमवान् पर्वत' इत्येवंरूपः। वह्नेर्निरूपितत्वसम्बन्धेन व्याप्तौ तस्याश्च स्वरूपसम्बन्धेनाश्रये तस्य चाभेदेन धूमे तस्य च संयोगेन मतुबर्थोऽश्रये तस्य चाभेदेन पर्वतेऽन्वयः समानाधिकरणप्रकारताविशेष्यतयोरवच्छेद्यावच्छेदकभाव इत्येकं मतम् तयोरभेद इत्यपरं मतम्। आद्ये वह्नित्वावच्छिन्ननिरूपितत्वसम्बन्धावच्छिन्नप्रकारतानिरूपिता या व्याप्तित्वावच्छिन्ना विशेष्यता तादृशविशेष्यत्वावच्छिन्नस्वरूपसम्बन्धावच्छिन्नप्रकारतानिरूपिता या आश्रयत्वावच्छिन्ना विशेष्यता तादृशविशेष्यावच्छिन्नाभेदसम्बन्धावच्छिन्नप्रकारतानिरूपिता या धूमत्वावच्छिन्ना विशेष्यता तादृशविशेष्यत्वावच्छिन्नसंयोगसम्बन्धावच्छिन्नप्रकारतानिरूपिता या आश्रयत्वावच्छिन्ना विशेष्यता तादृशविशेष्यत्वावच्छिन्नाभेदसम्बन्धावच्छिन्नप्रकारतानिरूपिता या पर्वतत्वावच्छिन्ना विशेष्यता तादृशविशेष्यताशाली बोधः,

किन्तु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन कारणत्वस्याऽऽवश्यकत्वात् तत्र विशिष्टज्ञानकल्पने गौरवाच्चेति चेन्न—

व्याप्यतावच्छेदकाज्ञानेऽपि वह्निव्याप्यवानिति ज्ञानादनुमित्युत्पत्तेः लाघवाच्च व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन हेतुत्वम्।

किं च 'धूमवान् पर्वत' इति ज्ञानादनुमित्यापत्तिः, व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकस्य पक्षधर्मताज्ञानस्य सत्त्वात्।

न च गृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वान्नदोष इति वाच्यम्। चैत्रस्य व्याप्तिग्रहे मैत्रस्य पक्षधर्मताज्ञानादनुमित्यापत्तेः।

यदि तत्पुरुषीयगृह्यमाणव्याप्यतावच्छेदकप्रकारकं तत्पुरुषीयपक्षधर्म-

---

मुक्तावलीमयूखः।

द्वितीये तु वह्नित्वावच्छिन्ननिरूपितत्वसम्बन्धावच्छिन्नप्रकारकारतानिरूपिता या व्याप्तित्वावच्छिन्ना विशेष्यता तादृशविशेष्यत्वाभिन्नस्वरूपसम्बन्धावच्छिन्नप्रकारतानिरूपिता या आश्रयत्वावच्छिन्ना विशेष्यता तादृशविशेष्यत्वाभिन्नाभेदसम्बन्धावच्छिन्नप्रकारतानिरूपिता या धूमत्वावच्छिन्ना विशेष्यता तादृशविशेष्यत्वाभिन्नसंयोगसम्बन्धावच्छिन्नप्रकारतानिरूपिता या आश्रयत्वावच्छिन्ना विशेष्यता तादृशविशेष्यत्वाभिन्नाभेदसम्बन्धावच्छिन्नप्रकारतानिरूपिता या पर्वतत्वावच्छिन्ना विशेष्यता तादृशविशेष्यताशाली बोधः।

व्याप्तिविशिष्टवैशिष्ट्यावगाहित्वेनेत्यस्य—व्याप्तिप्रकारतानिरूपितहेतुविशेष्यत्वावच्छिन्नप्रकारतानिरूपितपक्षविशेष्यताशालिनिश्चयत्वेनेति व्याप्तिप्रकारतानिरूपितहेतुप्रकारतानिरूपितपक्षविशेष्यताशालिनिश्चयत्वेनेति वार्थः। आद्यं तयोर्भेदमप्रीकृत्यावच्छेद्यावच्छेदकभाववादिमताभिप्रायेण, द्वितीयं समानाधिकरणप्रकारताविशेष्यतयोरभेदवादिमताभिप्रायेणेति ध्येयम्।

अनुमित्युत्पत्तेरिति। अयं भावः, व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्याभावेऽपि अनुमितिदर्शनेन व्यतिरेकव्यभिचारान्नानुमितौ व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य कारणत्वसम्भव इति।

ननु तत्रानुमितिरूपकार्यदर्शनेन कारणानुमानात् व्याप्यतावच्छेदकप्रकारकं 'पर्वतो धूमवान्' इति ज्ञानं कल्पनीयमिति न व्यभिचार इत्यत आह—लाघवाच्चेति—व्याप्यतावच्छेदकप्रकारकत्वापेक्षया व्याप्तिप्रकारकत्वस्य लघुत्वादित्यर्थः।

ननु तत्रावच्छेदकलाघवं मीमांसकानां तु पूर्वोक्तकल्पनालाघवमित्युभयोः साम्यमित्यत आह—किंचेति।

तत्पुरुषसमवेतज्ञानविषयीभूता या व्याप्यता तदवच्छेदकप्रकारकं पक्षधर्मताज्ञानं तत्पुरुषसमवेतानुमितौ हेतुः, इति कार्यकारणभावस्वरूपमिति भावः। न च तत्पुरुषसमवेतमेव भिन्नकालीनं व्याप्तिज्ञानं पक्षधर्मताज्ञानं वादामानुमितिप्रसङ्गः, मम तु भिन्नकालीनज्ञानाभ्यामनुमितिकरणीभूतस्य विशिष्टज्ञानस्यानुदयाच्चायं दोष इति वाच्यम्, ज्ञानस्य वर्तमानकालीनत्वस्य बोधनेन भङ्गे तत्कालानत्वस्यापि लाभेनादोषात्।

ताज्ञानं तत्पुरुषीयानुमितौ हेतुरित्युच्यते, तदाऽनन्तकार्यकारणभावः। मन्मते तु समवायसम्बन्धेन व्याप्तिप्रकारकपक्षधर्मताज्ञानं समवायसम्बन्धेनाऽनुमितिं जनयतीति नाऽनन्तकार्यकारणभावः।

यदि तु व्याप्तिप्रकारकज्ञानं पक्षधर्मताज्ञानं च स्वतन्त्रं कारणमित्युच्यते—तदा कार्यकारणभावद्वयं, 'वह्निव्याप्यो धूम मालोकवांश्च पर्वत' इति ज्ञानादप्यनुमितिश्च स्यात्। इत्थं च यत्र ज्ञानद्वयं, तत्राऽपि विशिष्टज्ञानं कल्पनीयं, फलमुखगौरवस्यादोषत्वात्।

मुक्तावलीमयूखः।

कार्यकारणभावद्वयमिति। ननु व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन पक्षधर्मताविषयकव्याप्तिप्रकारकज्ञानत्वेन वा हेतुतेत्यत्र विनिगमनाविरहेण हेतुताद्वयं तवापि।

न च व्याप्तिप्रकारकहेतुविशेष्यकनिश्चयत्वेन हेतुविशेष्यकव्याप्तिप्रकारकनिश्चयत्वेन *व्याप्तिप्रकारकज्ञानस्य, व्याप्यतावच्छेदकप्रकारकपक्षविशेष्यकनिश्चयत्वेन पक्षविशेष्यकव्याप्यतावच्छेदकप्रकारकनिश्चयत्वेन* पक्षधर्मताज्ञानस्य, कारणत्वेन मीमांसकस्य कार्यकारणभावचतुष्टयमिति, नैयायिकमते द्वयमेवेति तदपेक्षया लाघवमेवेति वाच्यम्। नैयायिकमते व्याप्तिप्रकारत्वहेतुप्रकारत्वपक्षविशेष्यतानां त्रयाणां विशेष्यविशेषणभावे विनिगमनाविरहेण गुरुभूतकार्यकारणभावत्रयसत्त्वेन मीमांसकापेक्षया गौरवात् तथा हि—व्याप्तिप्रकारतानिरूपितहेतुप्रकारतानिरूपितपक्षविशेष्यताशालिनिश्चयत्वेन, पक्षविशेष्यतानिरूपितहेतुप्रकारतानिरूपितव्याप्तिप्रकारताशालिनिश्चयत्वेन, व्याप्तिप्रकारतानिरूपिता या पक्षविशेष्यतानिरूपिता हेतुप्रकारता तादृशप्रकारताशालिनिश्चयत्वेन, इति विनिगमनाविरहेण परामर्शकारणत्वमिति कार्यकारणभावत्रयमित्यपरितोषादाह—वह्निव्याप्यो धूम इति।

ननु व्याप्यतावच्छेदकानां धूमत्वादीनां कारणतावच्छेदककुक्षौ निवेशेन नायं दोष, इति चेत्—'वह्निव्याप्यधूमवान्पर्वतः' 'वह्निव्याप्यालोकवान् पर्वतः', 'वह्निव्याप्यवान्पर्वतः' इति ज्ञानत्रयसाधारणकारणत्वानुरोधेन वह्न्यभाववन्निरूपितवृत्तित्वाभावप्रकारतानिरूपितपक्षविशेष्यताशालिनिश्चयत्वेन कारणतायास्तार्किकैः स्वीकारेण हेतुतावच्छेदकभेदेन कारणभेदाभावेन लाघवात्। मीमांसकस्य तु-व्याप्यतावच्छेदकधूमत्वादीनां निवेशे व्याप्यतावच्छेदकभेदेनानेककार्यकारणभावोत्पत्तेरेव दोषत्वादिति।

ननु ज्ञानद्वयस्थले विशिष्टज्ञानकल्पने कल्पनागौरवं तार्किकाणामित्यत आह-इत्थं चेति फलमुखेति। फलं कार्यकारणभावमहत्तन्मुखं तदधीनं गौरवं गौरवज्ञानमित्यर्थः। कार्यकारणभावग्रहोत्तरमुत्पन्नस्य गौरवज्ञानस्य कारणतानिश्चयप्रतिबन्धकत्वसम्भव इति भावः। एतदुक्तं भवति गौरवं नाम कार्यलिङ्गकानुमानातिरिक्तप्रमाणासिद्धतत्तदनुमित्यव्यवहितपूर्ववर्तिस्वाश्रयकत्वम्। स्वं गौरवम्। अनुमित्यव्यवहितपूर्ववर्ती स्वाश्रयः परामर्शः तद्वृत्तित्वं गौरवे। स्वाश्रयकत्वमित्यस्य स्वाश्रयवृत्तित्वमर्थः। विशिष्टज्ञानत्वेन कारणतानिश्चये सति कार्यलिङ्गेन तत्तदनुमित्यव्यवहितपूर्ववर्तिपरामर्शनिश्चयः, ततः तादृशगौरवज्ञानमिति।

व्याप्यो नाम व्याप्यवाश्रयः, तत्र व्याप्तिः केत्यत आह—व्याप्तिरिति।

व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः ॥ ६८ ॥

वह्निमान् धूमादित्यादौ साध्यो वह्निः, साध्यवान् महानसादिः, तदन्यो जलह्रदादिः, तदवृत्तित्वं धूमस्येति लक्षणसमन्वयः। धूमवान् वह्नेरित्यादौ साध्यवदन्यस्मिंस्तप्तायःपिण्डादौ वह्नेः सत्त्वाच्चाऽतिव्याप्तिः।

अत्र येन सम्बन्धेन साध्यं, तेनैव सम्बन्धेन साध्यवान् बोध्यः, अन्यथा समवायसम्बन्धेन वह्निमान् वह्नेरवयवः, तदन्यो महानसादिः, तत्र धूमस्य विद्यमानत्वादव्याप्तिप्रसङ्गात्।

साध्यवदन्यश्च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवान् बोध्यः, तेन यत्किञ्चिद्वह्निमतो महानसादेर्भिन्ने पर्वतादौ धूमस्य सत्त्वेऽपि न क्षतिः।

मुक्तावलीमयूखः।

परामर्शनिरूपणान्तरं व्याप्तिनिरूपणे उपोद्घातसङ्गतिं दर्शयति—व्याप्यो नामेति। उपपाद्योपपादकभावः उपोद्घातः। यदुक्तमिह षोढा—'सप्रसङ्ग उपोद्घातो हेतुतावत्तरस्तथा। निर्वाहैकैककार्यत्वे षोढा सङ्गतिरिष्यते' इत्यभियुक्तोक्तेः। तत्रेति। घटकत्वं सप्तम्यर्थः। एवं च व्याप्यघटकीभूता व्याप्तिः केत्यर्थः। घटकत्वं स्वविषयकप्रतीत्यविषयत्वम्।

साध्यवदन्यस्मिन्निति। साध्यवत्पदं लक्षणया साध्यवत्प्रतियोगिकपरं तस्य चाभेदसम्बन्धेन अन्यपदार्थैकदेशे भेदेऽन्वयः, न तु साध्यवत्पदार्थस्य प्रतियोगिता सम्बन्धेन भेदे नामार्थयोरभेदसम्बन्धेनान्वयस्याव्युत्पन्नत्वात् भेदवतश्च सप्तम्यर्थनिरूपितत्वसम्बन्धेन वृत्तित्वरूपे सम्बन्यपदार्थे तस्य च प्रतियोगितासम्बन्धेनाभावे। एवं च साध्यवत्प्रतियोगिकभेदवन्निरूपितवृत्तित्वाभावो व्याप्तिरिति तदर्थः।

अत्र येन सम्बन्धेनेति। अयं भावः साध्यतावच्छेदकसम्बन्धावच्छिन्ना या साध्यनिष्ठाऽवच्छेदकता तन्निरूपितावच्छेद्यतावती या प्रतियोगिता तन्निरूपकभेदवन्निरूपितवृत्तित्वाभावो व्याप्तिरित्यर्थः। एवं च समवायेन वह्निमान् इति प्रतीतिसाक्षिकभेदीयप्रतियोगितावच्छेदकता वह्निनिष्ठा सा च न साध्यतावच्छेदकसम्बन्धावच्छिन्ना या च साध्यतावच्छेदकसम्बन्धावच्छिन्ना संयोगेन वह्निमानिति भेदीया प्रतियोगितावच्छेदकता तन्निरूपकप्रतियोगिताकभेदश्च न पर्वत इति नाव्याप्तिरिति।

साध्यवत्त्वावच्छिन्नेति। अयं भावः साध्यतावच्छेदकसम्बन्धावच्छिन्ना साध्यतावच्छेदकमात्रा(१)वच्छिन्ना या साध्यनिष्ठावच्छेदकता तन्निरूपितावच्छेद्यतावती या प्रतियोगिता तन्निरूपकभेदवन्निरूपितवृत्तित्वाभावो व्याप्तिरित्यर्थः।

अयं भावः, पर्वतः संयोगेन महानसीयवह्निमानिति भेदीयप्रयोगितावच्छेदकता न साध्यतावच्छेदकमात्रावच्छिन्ना इति तादृशो भेदो धर्तुं न शक्यते यत्र तादृशः संयोगेन वह्निमानिति प्रतीतिसाक्षिकः स च न पर्वते इति नाव्याप्तिः।

---

(१) 'वह्निमद् घट' पदयोरुभयत्रास्तीत्युभयाभावमादायाव्याप्तिवारणाय मात्र पदम्।

येन सम्बन्धेन हेतुता तेनैव सम्बन्धेन साध्यवदन्यवृत्तित्वं बोध्यं, तेन साध्यवदन्यस्मिन् धूमावयवे धूमस्य समवायसम्बन्धेन सत्त्वेऽपि न क्षतिः।

साध्यवदन्यावृत्तित्वं च साध्यवदन्यवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावः, तेन धूमवान् वह्नेरित्यत्र साध्यवदन्यजलह्रदादिवृत्तित्वाभावेऽपि नातिव्याप्तिः।

अत्र यद्यपि द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ विशिष्टसत्तायाः शुद्धसत्तायाश्चैक्यात् साध्यवदन्यस्मिन् गुणादाववृत्तित्वं नाऽस्ति, तथाऽपि हेतुतावच्छेदकरूपेणाऽवृत्तित्वं वाच्यं, हेतुतावच्छेदकं तादृशवृत्तितानवच्छेदकमिति फलितोऽर्थः ॥ ६८ ॥

ननु केवलान्वयिनि ज्ञेयत्वादौ साध्ये साध्यवदन्यस्याऽप्रसिद्धत्वादतिः, किञ्च सत्तावान् जातेरित्यादौ साध्यवदन्यस्मिन् सामान्यादौ हेतु-

---

मुक्तावलीमयूखः।

येन सम्बन्धेन हेतुतेति। अयं भावः साध्यतावच्छेदकसम्बन्धावच्छिन्ना साध्यतावच्छेदकमात्रावच्छिन्ना वा साध्यनिष्ठावच्छेदकता तन्निरूपितावच्छेद्यतावती या प्रतियोगिता तन्निरूपकभेदवन्निरूपिता या हेतुतावच्छेदकसम्बन्धावच्छिन्ना वृत्तिता तदभावो व्याप्तिरित्यर्थः। एवं च संयोगेन वह्निमानिति प्रतीतिसाक्षिभेदकभेदवद्धूमावयवनिरूपिता समवायसम्बन्धावच्छिन्ना वृत्तिता यद्यपि धूमे वर्तते तथापि साध्यवद्भिन्ननिरूपितहेतुतावच्छेदकसंयोगसम्बन्धावच्छिन्नवृत्तितायाः अभावो वर्तत एवेति नाव्याप्तिः।

साध्यवदन्यवृत्तित्वत्वावच्छिन्नेति। अयं भावः साध्यतावच्छेदकसम्बन्धावच्छिन्ना साध्यतावच्छेदकमात्रावच्छिन्ना या साध्यनिष्ठाऽवच्छेदकता तन्निरूपितावच्छेद्यतावती या प्रतियोगिता तन्निरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तितात्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावो व्याप्तिः। एवं च धूमवान् वह्नेरित्यत्र धूमवदन्यजलनिरूपितवृत्तित्वं वह्नौ नास्तीति प्रतीतिसाक्षिकाभावीया प्रतियोगिता वृत्तितात्वावच्छिन्ना यथा वर्तते तथा निरूपितत्वसम्बन्धेन जलावच्छिन्नाऽपि वर्तत इति तादृशाभावो धर्तुं न शक्यते किन्तु धूमवदन्यनिरूपितवृत्तित्वं नास्तीति एवंस्वरूपः स च न वह्नौ इति नातिव्याप्तिः। वृत्तितात्वनिष्ठावच्छेदकताकप्रतियोगिताकेत्यस्य वृत्तितात्वनिष्ठावच्छेदकताभिन्ना या स्वावच्छेदकता तदनिरूपिका सती वृत्तितात्वनिष्ठावच्छेदकता निरूपिका या प्रतियोगिता तन्निरूपकेत्यर्थः इति भावः।

हेतुतावच्छेदकमिति। साध्यतावच्छेदकसम्बन्धावच्छिन्ना साध्यतावच्छेदकमात्रावच्छिन्ना या साध्यनिष्ठाऽवच्छेदकता तन्निरूपितावच्छेद्यतावती या प्रतियोगिता तन्निरूपकभेदवन्निरूपिता या हेतुतावच्छेदकसम्बन्धावच्छिन्ना वृत्तिता तदनवच्छेदकं यद्धेतुतावच्छेदकं तद्वत्त्वं व्याप्तिरिति लक्षणं पर्यवसन्नम् ॥ ६८ ॥

अथवेत्यादिलक्षणमवतारयितुमावश्यकलक्षणे दोषमाह—नन्विति। अयं भावः, इदं ज्ञेयं वाच्यत्वादित्यादौ ज्ञेयत्वरूपसाध्यवद्भेदस्याप्रसिद्धेऽव्याप्तिः। एवं सत्तावान् जाते-

तावच्छेदकसम्बन्धेन समवायेन वृत्तेरप्रसिद्धत्वाद्व्याप्तिश्चात आह—

अथ वा हेतुमन्निष्ठाविरहाप्रतियोगिना ।
साध्येन हेतोरेकाधिकरण्यं व्याप्तिरुच्यते ॥ ६९ ॥

अथ वेति । हेतुमति निष्ठा—वृत्तिर्यस्य स तथा विरहः-अभावः, तथा च हेत्यधिकरणवृत्त्यभावस्तदप्रतियोगिना साध्येन सह हेतोः सामानाधिकरण्यं व्याप्तिरुच्यते ।

अत्र यद्यपि वह्निमान् धूमादित्यादौ हेत्यधिकरणपर्वतादिवृत्त्यभावप्रतियोगित्वं तत्तद्ह्रदादेरस्तीत्यव्याप्तिः ।

न च समानाधिकरणवह्निधूमयोरेव व्याप्तिरिति वाच्यम् । तत्तद्ह्रदादेरप्युभयाभावसत्त्वात्, एकसत्त्वेऽपि द्वयं नाऽस्तीति प्रतीतेः । गुणवान्

मुक्तावलीमयूखः ।

रित्यत्र सत्तावदन्यसामान्यादिनिरूपितहेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नवृत्तित्वाप्रसिद्धया तदभावाप्रसिद्धयाऽव्याप्तिरिति ।

ननु भेदप्रतियोगितानवच्छेदकत्वरूपकेवलान्वयित्वनिश्चयकाले पक्षताघटकसंशयाभावान्नानुमितिः तच्छून्यकाले च भ्रमात्मकव्याप्तिज्ञानादेवानुमितिः सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपपक्षतात्वोपगमेऽपि मीमांसकमते केवलान्वयिसाध्यकानुमित्यनङ्गीकारान्नेदं दूषणमित्यरुचेराह—किञ्चेति ।

हेतुमदिति । हेतुनिष्ठं हेत्यधिकरणनिष्ठात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः । पर्वतो वह्निमान्धूमादित्यत्र हेतुर्धूमस्तदधिकरणं पर्वतस्तन्निष्ठोऽत्यन्ताभावः घटो नास्तीति प्रतीतिसाक्षिकस्तत्प्रतियोगी घटः, अप्रतियोगी वह्निः स एव साध्यः तेन सामानाधिकरण्यं धूमे, इति लक्षणसमन्वयः ।

अत्रेति । वह्निमान् धूमादित्यत्र हेतुर्धूमस्तदधिकरणं पर्वतस्तन्निष्ठोऽत्यन्ताभावः महानसीयवह्निर्नास्तीति प्रतीतिसाक्षिकः एवं हेत्यधिकरणे महानसे पर्वतीयवह्निर्नास्तीति प्रतीतिसाक्षिकः तत्प्रतियोगी चालनीन्यायेन महानसीयवह्ह्रदादिरप्रतियोगी न कोऽपि वह्निरित्यव्याप्तिः ।

तत्तद्ह्रदादेरपीति । वह्निमान् धूमादित्यत्र हेत्यधिकरणे पर्वते पर्वतीयवह्निघटोभयं नास्तीति प्रतीतिसाक्षिकपर्वतीयवह्निघटोभयाभावस्य सत्त्वात् तत्प्रतियोगी पर्वतीयवह्निरिति समानाधिकरणवह्निधूमयोरेव व्याप्तिरित्युक्तावपि न निस्तार इति भावः । इदमुपलक्षणम् । विशिष्टाभावमादायाव्याप्तिरित्यपि बोध्यम् ।

न वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वेनाभावविशेषायाप्तायं दोष इत्यरुचेराह—गुणवानिति । अत्र हेतोरेकव्यक्तितया समानाधिकरणयोरेव व्याप्तिरित्युक्तावपि न निस्तारः । तथा हि गुणवान् द्रव्यत्वादित्यत्र द्रव्यत्वाधिकरणे जले गन्धो नास्ति हेत्यधिकरणे पृथिव्यां स्नेहो नास्ति तादृशे वायौ रूपं नास्तीति चालनीन्यायेन तत्तद्गुणानामभावसत्त्वात् प्रतियोगित्वमेव तत्तत्साध्ये इत्यव्याप्त्या सामानाधिकरण्ययोरेव व्याप्तिरित्यभ्युपगन्तुमशक्यमिति भावः ।

द्रव्यत्वादावव्याप्तिश्च। तथाऽपि प्रतियोगितानवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरिति वाच्यम्।

ननु रूपत्वव्याप्यजातिमत्त्वान् पृथिवीत्वादित्यादौ साध्यतावच्छेदिका रूपत्वव्याप्यजातयः, तासां च शुक्लत्वादिस्वरूपाणां नीलघटादिवृत्त्यभावप्रतियोगितावच्छेदकत्वमस्तीत्यव्याप्तिरिति चेन्न—

तत्र परम्परया रूपत्वव्याप्यजातित्वस्यैव साध्यतावच्छेदकत्वात्, न हि तादृशधर्मावच्छिन्नाभावः क्वाऽपि पृथिव्यामस्ति, रूपत्वव्याप्यजातिमान्नास्तीति बुद्ध्यापत्तेः।

एवं दण्डयादौ साध्ये परम्परासम्बद्धं दण्डत्वादिकमेव साध्यतावच्छे-

---

मुक्तावलीमयूखः।

वद्रूपवान् (१)तदसादित्यत्र लक्षणसमन्वयसम्भवेनासम्भवाभावादव्याप्त्यभिधानम्।

तथापीति। एवंच हेत्वधिकरणनिष्ठात्यन्ताभावीयप्रतियोगितावच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति लक्षणं निष्पन्नम्, तथा च गुणवान् द्रव्यत्वादित्यत्र द्रव्यत्वाधिकरणे गुणे नास्तीत्यभावो वक्तुं न शक्यते किन्तु रूपं नास्ति रसो नास्तीत्येवमादिरेव तदीया प्रतियोगिता रूपरसादिनिष्ठा प्रतियोगितावच्छेदकं रूपत्वादिकमनवच्छेदकं गुणत्वं तदेव साध्यतावच्छेदकं तदवच्छिन्नेन गुणेन द्रव्यत्वरूपहेतोः सामानाधिकरण्यसत्त्वात्समन्वयः।

नन्विति। रूपत्वव्याप्यजातिमत्त्वान् पृथिवीत्वादित्यत्र पृथिवीत्वाधिकरणे पीतघटे नीलो नास्ति, रक्तघटे पीतो नास्तीत्येवं चालनीन्यायेन सर्वेषामपि रूपाणामभावसत्त्वात्सर्वा अपि रूपत्वव्याप्या नीलत्वादिजातयः प्रतियोगितावच्छेदिकाः सम्पन्नास्ता एव च साध्यतावच्छेदिकाः इति हेत्वधिकरणनिष्ठात्यन्ताभावीयप्रतियोगितानवच्छेदिका न सम्पन्ना इत्यव्याप्तिः।

परम्परयेति। स्वाश्रयसमवायसम्बन्धेनेत्यर्थः। स्वं रूपत्वव्याप्यजातित्वं तदाश्रयः रूपत्वव्याप्यनीलत्वादिजातिः तत्समवायो रूपे एवं च पृथिवीत्वाधिकरणे स्वाश्रयसमवायसम्बन्धेन रूपत्वव्याप्यजातित्ववान्नास्तीत्यभावो वक्तुं न शक्यते पृथिवीत्वाधिकरणे स्वाश्रयसमवायसम्बन्धेन रूपत्वव्याप्यजातित्ववतो नीलरूपादेः प्रतियोगिनः सत्त्वादिति प्रतियोगितावच्छेदकं पूर्वोक्तरीत्या नीलत्वादिकमनवच्छेदकं रूपत्वव्याप्यजातित्वं तदेव साध्यतावच्छेदकमित्यदोषः।

एवमिति। मठो दण्डिमान् दण्डिसंयोगादियत्र दण्डिसंयोगाधिकरणमनुयोगितासम्बन्धेन मठः तन्निष्ठोऽभावः तद्दण्डी नास्तीति तदभावीया प्रतियोगिता तत्तद्दण्डिनिष्ठा प्रतियोगितावच्छेदको दण्डः स एव साध्यतावच्छेदक इत्यव्याप्तिः स्वाश्रयाश्रयत्वरूपपरम्परासम्बन्धेन दण्डत्वस्य साध्यतावच्छेदकत्वाङ्गीकारे तु—दण्डिसंयोगाधिकरणे स्वाश्रयाश्रयत्वसम्बन्धेन दण्डत्ववान्नास्तीति वक्तुं न शक्यते अपि तु घटोनास्तीत्येवमादिरिति नाव्याप्तिः।

---

(१) वद्रूपवानिति। हेत्वधिकरणे तद्द्रव्ये तद्रूपं नास्तीत्यभावोवक्तुं न शक्यते किन्तु घटाभावस्तत्प्रतियोगी घटः, अप्रतियोगी साध्यं तद्रूपं तेन समानाधिकरण्यं तद्रसे इति लक्षणसमन्वयादसम्भवो नोक्तः।

वकं तच्च प्रतियोगितानवच्छेदकमिति ।

साध्यादिभेदेन व्याप्तेर्भेदात् तादृशस्थले साध्यतावच्छेदकतावच्छेदकं प्रतियोगितावच्छेदकतानवच्छेदकमित्येव लक्षणघटकमित्यपि वदन्ति ।

हेत्वधिकरणं हेतुतावच्छेदकविशिष्टाधिकरणं वाच्यम्, तेन द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ शुद्धसत्ताधिकरणगुणादिनिष्ठाभावप्रतियोगित्वेऽपि द्रव्यत्वस्य नाऽव्याप्तिः ।

एवं हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणं वोध्यम्, तेन समवायेन धूमाधिकरणतदवयवनिष्ठाभावप्रतियोगित्वेऽपि वह्नेर्नाऽव्याप्तिः ।

अभावश्च प्रतियोगिव्यधिकरणो बोध्यः । तेन कपिसंयोग्येतद्वृक्ष-

मुक्तावलीमयूखः ।

साध्यादिभेदेनेति । तादृशस्थले लक्षणान्तरमेव कर्तव्यम् । हेत्वधिकरणनिष्ठात्यन्ताभावीयप्रतियोगितावच्छेदकतानवच्छेदकं यत्साध्यतावच्छेदकतावच्छेदकं तदाश्रयावच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति लक्षणमास्थेयमित्यर्थः ।

ननु द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ 'विशिष्टं शुद्धाद्व्यतिरिच्यते' इति न्यायाच्छुद्धसत्ताधिकरणे गुणवृत्तिनिष्ठाभावः 'द्रव्यत्वं नास्तीति' प्रतीतिसाक्षिकस्तदीयप्रतियोगितावच्छेदकं द्रव्यत्वं तदेव साध्यतावच्छेदकं प्रतियोगितावच्छेदकं न जातमित्यव्याप्तिरत आह—हेत्वधिकरणमिति । न च हेतुतावच्छेदकविशिष्टसत्तात्वविशिष्टसत्त्वस्य गुणे सत्त्वादेवं विवक्षायामप्यव्याप्तेरप्रतीकार इति वाच्यम्—हेतुतावच्छेदकावच्छिन्ननिरूपकतानिरूपिताधिकरणत्वविशिष्टस्य हेत्वधिकरणपदेन विवक्षणात्, एवं च विशिष्टसत्तात्वावच्छिन्ननिरूपकतानिरूपिताधिकरणत्वं द्रव्य एव न गुणे द्रव्यं विशिष्टसत्तावदिति प्रतीतेरित्यदोष इति भावः ।

नन्वेवमपि वह्निमान् धूमादित्यत्र समवायेन धूमाधिकरणं धूमावयवस्तन्निष्ठोऽभावः वह्निर्नास्तीतिप्रतीतिसाक्षिकः तत्प्रतियोगितावच्छेदकं वह्नित्वमित्यव्याप्तिरत आह—हेतुतावच्छेदकसम्बन्धेनेति । तथा च हेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्ननिरूपकतानिरूपिताधिकरणत्वविशिष्टनिष्ठाभावीयप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिः, इति लक्षणस्वरूपं निष्पन्नम् ।

ननु, कपिसंयोगी एतद्वृक्षत्वादित्यत्र एतद्वृक्षत्वाधिकरणमेतद्वृक्षः तन्निष्ठोऽभावः मूलावच्छेदेन कपिसंयोगो नास्तीति प्रतीतिसाक्षिकः तत्प्रतियोगितावच्छेदकं कपिसंयोगत्वमित्यव्याप्तिरत आह—अभावश्चेति । तथा च एतद्वृक्षे शाखावच्छेदेन कपिसंयोगस्य सत्त्वात् प्रतियोगिसमानाधिकरण एव कपिसंयोगाभावः न प्रतियोगिव्यधिकरणः किन्तु घटाभावादिरेव तथा तत्प्रतियोगितावच्छेदकं घटत्वमनवच्छेदकं कपिसंयोगत्वं तदवच्छिन्नसामानाधिकरण्यमेतद्वृक्षत्वे इत्यदोषः ।

ननु प्रतियोगिव्यधिकरण इत्यस्य प्रतियोग्यनधिकरणवृत्तीत्यर्थाङ्गीकारे कपिसंयोगी एतद्वृक्षत्वादित्यत्र प्रतियोगिनः कपिसंयोगस्य अनधिकरणं गुणादिकं तन्निष्ठोऽभावः कपिसंयोगाभावः प्रतियोगिव्यधिकरणः स एव वृक्षे अधिकरणभेदेनाभावभेदानभ्युपगमादिति

त्वादित्यादावेतद्वृक्षवृत्तिकपिसंयोगाभावप्रतियोगित्वेऽपि कपिसंयोगस्य नाऽव्याप्तिः।

न च प्रतियोगिव्यधिकरणत्वं यदि प्रतियोग्यनधिकरणवृत्तित्वं, तदा तयैवाऽव्याप्तिः, प्रतियोगिनः कपिसंयोगस्याऽनधिकरणे गुणादौ वर्तमानो योऽभावस्तस्यैव वृक्षे मूलावच्छेदेन सत्त्वात्। यदि तु प्रतियोग्यधिकरणावृत्तित्वं, तदा संयोगो सत्त्वादित्यादावतिव्याप्तिः-सत्ताधिकरणे गुणादौ यः संयोगाभावस्तस्य प्रतियोग्यधिकरणद्रव्यवृत्तित्वादिति वाच्यम्।

हेत्वधिकरणे प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य विवक्षितत्वात्, स्वप्रतियोग्यनधिकरणोभूतहेत्वधिकरणवृत्त्यभाव इति निष्कर्षः।

प्रतियोग्यनधिकरणत्वं च प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं

मुक्तावलीमयूखः।

तत्प्रतियोगितावच्छेदकं। कपिसंयोगत्वमित्यव्याप्तिः। न च प्रतियोगिव्यधिकरणेत्यस्य प्रतियोग्यधिकरणावृत्तीत्यर्थः, तथाच वृक्षवृत्तिकपिसंयोगाभावस्य प्रतियोग्यधिकरणवृत्तितया प्रतियोग्यधिकरणावृत्तिभिन्नत्वाभावान्नाव्याप्तिरिति वाच्यम्, एवमपि संयोगी सत्त्वादित्यत्र सत्त्वाधिकरणे गुणादौ वर्तमानो यः संयोगाभावः तस्य प्रतियोग्यधिकरणद्रव्यवृत्तित्वात्प्रतियोग्यधिकरणावृत्तित्वं नास्ति किन्तूदासीनस्यैव घटाभावादेः तत्प्रतियोगितावच्छेदकं घटत्वादिकमनवच्छेदकं संयोगत्वमित्यतिव्याप्तेर्दुर्वारत्वादित्यत आह—हेत्वधिकरणे इति। हेत्वधिकरणावच्छेदेन प्रतियोग्यनधिकरणवृत्तीत्यर्थः, तथा च कपिसंयोगी एतद्वृक्षत्वादित्यत्र कपिसंयोगाभावो न हेत्वधिकरणावच्छेदेन प्रतियोग्यनधिकरणवृत्तिः गुणस्य हेत्वधिकरणत्वाभावात् संयोगी सत्त्वादित्यत्र च संयोगाभावस्तया गुणस्य हेत्वधिकरणत्वादिति नाव्याप्त्यतिव्याप्ती इति भावः।

नन्वेवं हेतुसमानाधिकरणेत्यस्य वैयर्थ्यं सत्तावान् जातेरित्यत्र सत्ताभावस्य हेत्वधिकरणावच्छेदेन प्रतियोग्यवैयधिकरण्याभावादव्याप्यमानादित्यत आह—स्वप्रतियोगीति। स्वपदं लक्षणघटकाभावपरम्।

निष्कर्ष इति। प्रतियोग्यसमानाधिकरणाभावस्येत्यर्थः। तथा च हेतुसमानाधिकरणेति विशेषणादेव हेत्वधिकरणे इत्यावश्यकलाभ इति न हेतुसमानाधिकरणेत्यस्य वैयर्थ्यमिति भावः।

नन्वविशिष्टसत्तावान् जातेरित्यत्र जात्यधिकरणं गुणस्तद्विष्ठोऽभावः विशिष्टसत्ताभावः स च सत्तारूपप्रतियोगिसमानाधिकरण एव इत्युदासीन एवाभावो लक्षणघटको वाच्य इत्यतिव्याप्तिरत आह—प्रतियोग्यनधिकरणत्वमिति। प्रतियोगितावच्छेदकावच्छिन्ननिरूपकतानिरूपिताधिकरणतावैयर्थ्यं तदर्थः। तथा च विशिष्टसत्तात्वावच्छिन्ननिरूपकतानिरूपिताधिकरणत्वं न गुणे, इति तन्निष्ठोऽभावः विशिष्टसत्ताभावः प्रतियोगिव्यधिकरणः सत्तात इति नातिव्याप्तिरिति भावः।

एवं च स्वप्रतियोगितावच्छेदकावच्छिन्ननिरूपकतानिरूपिताधिकरणतावैयर्थ्यो हेतु-

वाच्यम्, तेन विशिष्टसत्तावान् जातेरित्यादौ जात्यधिकरणगुणादौ वि शिष्टसत्ताभावस्य प्रतियोगिसमानाधिकरणत्वेऽपि न क्षतिः।

अत्र साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वं बोध्यम्, तेन ज्ञानवान् सत्त्वादित्यादौ सत्ताधिकरणघटादेर्विषयतया ज्ञानाधिकरणत्वेऽपि न क्षतिः। इत्थं च वह्निमान् धूमादित्यादौ धूमाधिकरणे समवायेन वह्निविरहसत्त्वेऽपि न क्षतिः।

ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचित्प्रतियोगिनोऽन धिकरणत्वं, तत्सामान्यस्य वा, यत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्ना नधिकरणत्वं वा विवक्षितम्।

मुक्तावलीमयूखः।

तावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्ननिरूपकतानिरूपिताधिकरणतावान् य तन्निष्ठाभावप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्य व्याप्तिरिति लक्षणं निष्पन्नम्।

नन्वेवमपि ज्ञानवान् सत्त्वादित्यत्र सत्ताधिकरणं घटादिकं तन्निष्ठोऽभावः, समवायेन ज्ञानं नास्तीति प्रतीतिसाक्षिकः स च विषयतासम्बन्धेन ज्ञानरूपप्रतियोगिसमानाधि करणः, इति प्रतियोगिव्यधिकरणो न जातः किन्तूदासीन एव तथेत्यतिव्याप्तिरत आह- साध्यतावच्छेदकसम्बन्धेनेति। साध्यतावच्छेदकसम्बन्धश्च प्रकृते न विषयता किन्तु समवाय एव तेन च सम्बन्धेन घटे ज्ञानं न वर्तत इति प्रतियोगिव्यधिकरणो ज्ञानाभावः तत्प्रतियोगितावच्छेदकं ज्ञानत्वे, इति नातिव्याप्तिः।

एतेन वह्निमान् धूमादित्यत्र हेत्वधिकरणे पर्वते समवायेन वह्निर्नास्तीति प्रतीतिसा क्षिकाभावमादायाव्याप्तिमाशङ्क्य हेत्वधिकरणवृत्तिरभावः साध्यतावच्छेदकसम्बन्धावच्छि न्न प्रतियोगिताको ग्राह्य इति कस्यचिदुक्तिः परास्ता, पर्वतनिष्ठस्य समवायेन वह्नयभाव स्य प्रतियोगिनो वह्नेः संयोगेन पर्वतवृत्तितया प्रतियोगिवैयधिकरण्याभावेन लक्षणाघटक त्वात्। तथा च साध्यतावच्छेदकसम्बन्धावच्छिन्नस्वप्रतियोगितावच्छेदकावच्छिन्ननिरूप कतानिरूपिताधिकरणताशून्य इत्यादि लक्षणं निष्पन्नम्।

ननु प्रतियोगितावच्छेदकावच्छिन्नस्येति। विशिष्टसत्तावान् जातेरित्यत्रा व्याप्तिवारणाय प्रतियोग्यनधिकरणत्वं प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वरूपं वि वक्षितं तत्र प्रतियोगितावच्छेदकावच्छिन्नयत्किञ्चित्प्रतियोगिनोऽनधिकरणं विवक्षितम्, किं वा प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्यानधिकरणं विवक्षितम्, आहोस्वित् यत्किञ्चि त्प्रतियोगितावच्छेदकोयोधर्मस्तदवच्छिन्नानधिकरणत्वं विवक्षितम्, आद्ये वृक्षः कपि संयोगी एतद्वृक्षत्वादित्यत्राव्याप्तिः, एतद्वृक्षत्वाधिकरणनिष्ठो यो मूलावच्छेदेन कपिसंयोगो नास्तीत्यभावस्तत्प्रतियोगितावच्छेदकं कपिसंयोगत्वं तदवच्छिन्नो वृक्षावृत्तिकपिसंयोगोऽपि तदधिकरणं हेत्वधिकरणमेतद्वृक्षस्तन्निष्ठाऽभावीयप्रतियोगितावच्छेदकत्वमेव कपि संयोगत्वे, इति अव्याप्तिः तद्वारणार्थं यदि प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्यानधिकरणं विवक्ष्यते तदा 'वृक्षः कपिसंयोगी एतद्वृक्षत्वात्' इत्यत्र न दोषः तथा हि प्रति-

आद्ये कपिसंयोगो पतद्वृक्षत्वादित्यादौ तथवाव्याप्तिः—कपिसंयोगाभावप्रतियोगितावच्छेदकावच्छिन्नो वृक्षावृत्तिकपिसंयोगोऽपि भवति तदनधिकरणं वृक्ष इति।

द्वितीये तु प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः—सर्वस्यैवाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात्। नन्व वह्निमान् धूमादित्यादौ घटाभावादेःपूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं यद्यपि पर्वतादेः, तथापि साध्यतावच्छेदकसम्बन्धेन तत्प्रतियोग्यनधिकरणत्वमस्त्येवेति कथं प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति वाच्यम्। घटाभावे यो वह्न्यभावस्तस्य घटाभावात्मकतया घटाभावस्य वह्निरपि प्रतियोगी तदधिकरणं च पर्वतादिरित्येवंक्रमेण प्रतियोगिव्यधिकरणस्याप्रसिद्धत्वात्। यदि च घटाभावादौ वह्न्यभावादिभिन्न इयुच्यते, तदापि धूमाभाववान् वह्न्यभावादित्यादावव्याप्तिः—तत्र साध्यतावच्छेदकसम्बन्धः स्वरूपसम्बन्धः तेन सम्बन्धेन सर्वस्यैवाभावस्य पूर्व-

---

मुक्तावलीमयूखः।

योगितावच्छेदककपिसंयोगत्वावच्छिन्नसामान्यस्यानधिकरणीभूतं हेत्वधिकरणमेतद्वृक्षो नास्ति किन्तु प्रतियोगितावच्छेदकघटत्वावच्छिन्नस्यानधिकरणं हेत्वधिकरणमेतद्वृक्षः तदुभयाभावीयप्रतियोगितावच्छेदकं घटत्वम् अनवच्छेदकं कपिसंयोगत्वं तदेव साध्यतावच्छेदकमित्यव्याप्त्यभाव इति।

द्वितीये तु प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति। प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्यानधिकरणमिति विवक्षणे 'वह्निमान् धूमात्' इत्यत्र सद्धेतुमात्रे लक्षणस्यासम्भवः, तथा हि धूमाधिकरणे पर्वते वर्त्तमानो यः घटाभावः पूर्वक्षणवृत्तित्वविशिष्टः तस्यैव उत्तरक्षणावच्छेदेन अभावोऽपि वर्तते इति पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावः पर्वते इति 'विशिष्टं शुद्धान्नातिरिच्यते' इति विशिष्टघटाभावः शुद्धघटाभावस्वरूपोऽपि इति घटाभावस्य प्रतियोगी घटः घटाभावाभावश्च घटाभावस्य तृतीयाभावरूपत्वात् इति घटरूपप्रतियोगिनः पर्वतेऽसत्त्वेऽपि पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावरूपप्रतियोगिनः सत्त्वेन नायं प्रतियोगिव्यधिकरणोऽभावः, एवं घटाभावादिरपीति प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः।

न च ज्ञानवान् द्रव्यत्वादित्यज्ञातिव्याप्तिवारणाय साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वं विवक्षितम्, इति पूर्वक्षणवृत्तित्वावच्छिन्नघटाभावाभावरूपघटाभावप्रतियोगिनः स्वरूपेण पर्वते सत्त्वेऽपि साध्यतावच्छेदकसंयोगसम्बन्धेनासत्त्वात् प्रतियोगिवैयधिकरण्यमक्षतम्, इति न प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति वाच्यम्। एवमपि घटाभावे यो वह्न्यभावः स घटाभावस्वरूपः अभावाधिकरणकाभावस्याधिकरणस्वरूपत्वात् इति घटाभावस्य प्रतियोगी वह्निरपि स च साध्यतावच्छेदकसंयोगसम्बन्धेन पर्वते वर्तते इति प्रतियोगिव्यधिकरणाभावाप्रसिद्धितादवस्थ्यात्। यदि च "घटाभावे वह्न्यभावो भिन्न

क्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं हेत्वधिकरणस्येति ।

तृतीये तु कपिसंयोगाभाववान् आत्मत्ववादित्यादावव्याप्तिः—तत्रात्मावृत्तिकपिसंयोगाभावाभावः कपिसंयोगस्तस्य गुणत्वात् तत्प्रतियोगितावच्छेदकं गुणसामान्याभावत्वमपि तदवच्छिन्नानधिकरणत्वं हेत्वधिकरणस्यात्मन इति मैवम्—

यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात् ।

ननु कालो घटवान् कालपरिमाणादित्यत्र प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः—हेत्वधिकरणस्य महाकालस्य जगदाधारतया सर्वेषामेवाभावानां साध्यतावच्छेदकसम्बन्धेन कालिकविशेषणतया प्रतियोग्यधिकरणात् ।

अत्र केचित्—महाकालभेदविशिष्टघटाभावस्तत्र प्रतियोगिव्यधिकरणः—महाकालस्य घटाधारत्वेऽपि महाकालभेदविशिष्टघटानाधारत्वात्, महाकाले महाकालभेदाभावात् ।

मुक्तावलीमयूखः ।

एव न घटो भावस्वरूप" इत्युच्यते तदा वह्निमान् धूमादित्यत्र लक्षणसमन्वयेनासम्भवाभावेऽपि यत्र स्वरूपेण साध्यता ह्रदो धूमाभाववान् वह्न्यभावादिति तत्राव्याप्तिः ।

तृतीयेत्विति । तथा च घटाभावीययत्किञ्चित्प्रतियोगितावच्छेदकघटत्वावच्छिन्नानधिकरणत्वस्य हेत्वधिकरणे सत्त्वेन न प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति न वह्निमान् धूमादित्यादावव्याप्तिसम्भव इति भावः ।

कपिसंयोगाभाववानिति । अयं भावः । कपिसंयोगाभावाभावः कपिसंयोगः तत्र च गुणत्वं कपिसंयोगत्वं चेति धर्मद्वयं वर्तते, इति कपिसंयोगाभावाभावप्रतियोगितावच्छेदकं गुणसामान्याभावत्वं कपिसंयोगाभावत्वं च भवितुमर्हति ततश्च यत्किञ्चित्प्रतियोगितावच्छेदकपदेन गुणसामान्याभावत्वं धृतं तदवच्छिन्नानधिकरणत्वमात्मन इति तन्निष्ठोऽभावः कपिसंयोगाभावाभावः तत्प्रतियोगितावच्छेदकं कपिसंयोगाभावत्वं तदेव साध्यतावच्छेदकमित्यव्याप्तिरिति ।

यादृशेति । (१)तथा च प्रकृते हेत्वधिकरणस्यात्मनो यादृशप्रतियोगितावच्छेदकगुणसामान्याभावत्वावच्छिन्नानधिकरणत्वं तादृशप्रतियोगितानवच्छेदकत्वं कपिसंयोगाभावत्वस्य वर्तते एवेति नाव्याप्तिरिति ।

कालोघटवानिति । अयं भावः कालपरिमाणाधिकरणे महाकाले समवायसम्बन्धेन घटो नास्तीत्यभावो यद्यपि धर्तुं शक्यते तथापि सोऽभावः साध्यतावच्छेदककालिकसम्बन्धेन प्रतियोगिसमानाधिकरण एव जातः, इति कालिकसम्बन्धेन काले वस्तुमात्रस्य सत्त्वेन अभावान्तरमपि प्रतियोगिसमानाधिकरणमिति प्रतियोगिव्यधिकरणभावाप्रसिद्धिरिति ।

अत्र केचिदिति । स्वरूपसम्बन्धेन महाकालभेदः भूतले वर्तते तत्रैव घटोऽपि वर्तत इति महाकालभेदविशिष्टो घटो जातः, वैशिष्ट्यं च सामानाधिकरण्यसम्बन्धेन, इति महाकालभेदविशिष्टो घटो महाकाले न वर्तते तत्र स्वरूपसम्बन्धेन महाकालभेदाभावेन

---

(१) लक्षणाकारस्तु—यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरण हेत्वधिकरणवृत्त्यभावीयतादृश प्रतियोगितायां अनवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति ।

वस्तुतस्तु प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेन सम्बन्धेन तद्धर्मावच्छिन्नस्य तद्धेतुव्यापकत्वं वोध्यम्। व्यापकसामानाधिकरण्यं च व्याप्तिः। (यत्सम्बन्धः साध्यतावच्छेदकसम्बन्धः यद्धर्मः साध्यतावच्छेदकधर्मः। तत्र यदि यद्धर्मावच्छिन्नाभावमात्रमित्युच्यते यदा समवायेन यो वह्न्यभावस्तस्य प्रतियोगितावच्छेदकसम्बन्धः समवायस्तेन प्रतियोग्यधिकरणपर्वतादिवृत्तिः स एव, तत्प्रतियोगितावच्छेदकं वह्नित्वमित्यव्याप्तिः स्यात्। यदि च यत्सम्बन्धावच्छिन्नत्वाभावमात्रमित्युच्यते तदा तादृशस्य संयोगेन घटाभावस्य प्रतियोगितायां संयोगसम्बन्धावच्छिन्नत्वसत्त्वादव्याप्तिः स्यादत उभयमुपात्तम्)

इत्थं च कालो घटवान् कालपरिमाणादित्यादौ संयोगसम्बन्धेन घटाभावप्रतियोगिनोऽपि घटस्यानधिकरणे हेत्वधिकरणे महाकाले वर्तमानः स एव संयोगेन घटाभावः, तस्य प्रतियोगितायां कालिकसम्बन्धावच्छिन्नत्वघटत्वावच्छिन्नत्वोभयाभावसत्त्वान्नाव्याप्तिः।

ननु प्रमेयवह्निमान् धूमादित्यादौ प्रमेयवह्नित्वावच्छिन्नत्वमप्रसिद्धं (ऊर्ध्वमस्यानवच्छेदकत्वादिति चेद् न—

कम्बुग्रीवादिमान्नास्तीति प्रतीत्या कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगि-

---

मुक्तावलीमयूखः।

महाकालभेदविशिष्टघटस्याभावादिति महाकालभेदविशिष्टघटाभावः प्रतियोगिव्यधिकरणः तत्प्रतियोगितावच्छेदकं महाकालभेदविशिष्टघटत्वमनवच्छेदकं घटत्वं तदवच्छिन्नसामानाधिकरण्यं कालपरिमाणे इति समन्वयः।

वस्तुतस्त्विति। पर्वतो वह्निमान् धूमादित्यादौ प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्तिरभावः संयोगेन घटो नास्तीति प्रतीतिसाक्षिकः तदीयप्रतियोगितासामान्ये संयोगसम्बन्धावच्छिन्नत्ववह्नित्वावच्छिन्नत्वोभयाभावो वर्तते, 'एकस्त्वे' द्वयं नास्तीति प्रतीतेः, इति संयोगसम्बन्धेन वह्नित्वावच्छिन्नो धूमहेतोर्व्यापकः तत्सामानाधिकरण्यं च धूमे व्याप्तिलक्षणसमन्वयः, एवं कालो घटवान् कालपरिमाणादित्यत्र प्रतियोगितावच्छेदकसमवायसम्बन्धेन घटरूपप्रतियोग्यनधिकरणहेत्वधिकरणवृत्तिरभाव. समवायेन घटो नास्तीति प्रतीति साक्षिकः तदीयप्रतियोगितायां कालिकसम्बन्धावच्छिन्नघटत्वावच्छिन्नत्वोभयाभावसत्त्वात् कालिकसम्बन्धेन घटत्वावच्छिन्नः कालपरिमाणरूपहेतोर्व्यापक इति तत्सामानाधिकरण्यं कालपरिमाणे इति व्याप्तिलक्षणसमन्वयः।

प्रमेयवह्निमानिति। अयं भावः गुरुधर्मस्य प्रमेयवह्नित्वादेः प्रतियोगितानवच्छेदकत्वात् प्रतियोगितायां प्रमेयवह्नित्वावच्छिन्नत्वमप्रसिद्धम् एवं च धूमाधिकरणवृत्तिघटाभावीयप्रतियोगितायां प्रमेयवह्नित्वावच्छिन्नत्वस्याप्रसिद्धत्वेन तद्वृत्तेरुभयाभावाप्रसिद्धयाऽव्याप्तिरिति भावः।

कम्बुग्रीवादिमान्नास्तीति। अयं भावः कम्बुग्रीवादिमान्नास्तीति प्रतीतौ यदि

तादिपर्यीकरणेन गुरुधर्मस्याप्यवच्छेदकत्वस्वीकारादिति सङ्क्षेपः ॥ ६९

पक्षवृत्तित्वमित्यत्र पक्षत्वं किं तदाह—

सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते ।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत् ॥ ७० ॥

सिषाधयिषयेति । सिषाधयिषाविरहविशिष्टसिद्धयभावः पक्षता, तद्वान्पक्ष इत्यर्थः ।

सिषाधयिषामात्रं न पक्षता, विनापि सिषाधयिषां धनगर्जितेन मेघानुमानात् ।

अत एव साध्यसन्देहोऽपि न पक्षता विनापि सन्देहं तदनुमानात् ।

सिद्धौ सत्यामपि सिषाधयिषासत्त्वेऽनुमितिर्भवत्येव, अतः सिषाधयिषाविरहविशिष्टत्वं सिद्धौ विशेषणम् ।

तथाच यत्र सिद्धिर्नास्ति तत्र सिषाधयिषायां सत्यामसत्यामपि पक्षता,

---

मुक्तावलीमयूखः ।

कम्बुग्रीवादिमत्प्रतियोगिताकाभावो विषयः स्यात्तदा यत्किञ्चिद्घटवत्यपि भूतले कम्बुग्रीवादिमान्नास्तीति प्रतीतेः प्रमात्वं स्यादतः कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकाभावो विषयो वाच्यः, एवं च गुरुधर्मस्य प्रतियोगितावच्छेदकत्वमङ्गीकर्तव्यमिति न प्रतियोगितायां प्रमेयवह्नित्वावच्छिन्नत्वमप्रसिद्धमिति ।

ननु प्रतियोगितार्धमिकोभयाभावघटितलक्षणे गुरुधर्मावच्छिन्नसाध्यकस्थलेऽव्याप्तिशङ्कैव नोचिता गुरुधर्मे साध्यतावच्छेदकत्वस्यैवानङ्गीकारादिति चेन्न—स्वरूपसम्बन्धरूपावच्छेदकताया एव गुरुधर्मे प्राचीनैरनङ्गीकारेण विषयतावि शेषरूपायाः साध्यतावच्छेदकतायाः गुरुधर्मेऽप्यङ्गीकारसत्त्वेनादोषादित्यलम् ॥ ६९ ॥

व्याप्तिनिरूपणानन्तरं पक्षतानिरूपणे अनुमितिलक्षणैककार्योनुकूलत्वं सङ्गतिः । परामर्शनिरूपणानन्तरं पक्षतानिरूपणे तूपोद्घातसङ्गतिः तां तु ग्रन्थकृत्स्वयमाह—पक्षवृत्तित्वमित्यादिना ।

सिषाधयिषाविरहेति । अयं भावः 'पर्वतो वह्निमान्' इति निश्चयः सिद्धिरित्युच्यते । सा च 'पर्वतो वह्निमान्' इत्यनुमितौ प्रतिबन्धिका, प्रतिबन्धकत्वं च 'कारणीभूताभावप्रतियोगित्वम्' । प्रकृते च सिद्धयभावस्यानुमितिं प्रति कारणत्वात् तत्प्रतियोगित्वं सिद्धेरिति भवति तस्याः प्रतिबन्धकत्वम् । परन्तु सिद्धिसत्त्वे 'पर्वते वह्न्यनुमितिर्मे जायताम्' इतीच्छा सिषाधयिषा तस्यां सत्यामनुमितिर्जायते इति सिषाधयिषायां उत्तेजकत्वम् । उत्तेजकत्वं च 'प्रतिबन्धकसमानकालीनकार्यजनकत्वम्' । एवं च सिषाधयिषाविरहविशिष्टसिद्धिः अनुमितेः प्रतिबन्धिका, तदभावश्च पक्षता सा चानुमितौ कारणम् ।

मेघानुमानादिति । गगनं मेघवत् घनगर्जनादिति हि अनुमानस्वरूपम् ।

तथाचेति । यत्र सिषाधयिषासिद्धौ तत्र सिद्धिरूपविशेष्यसत्त्वेऽपि सिषाधयिषाविरहरूपविशेषणस्याभावात् विशेषणाभावप्रयुक्तो विशिष्टाभावः । यत्र सिषाधयिषा अस्ति

यत्र सिषाधयिषास्ति तत्र सिद्धौ सत्यामसत्यामपि पक्षता, यत्र सिद्धिरस्ति सिषाधयिषा च नास्ति तत्र न पक्षता, सिषाधयिषाविरहविशिष्टसिद्धेः सत्त्वात्।

ननु यत्र परामर्शानन्तरं सिद्धिस्ततः सिषाधयिषा तत्र सिषाधयिषाकाले परामर्शनाशान्नानुमितिः, यत्र सिद्धिपरामर्शसिषाधयिषाः क्रमेण भवन्ति तत्र सिषाधयिषाकाले सिद्धेर्नाशात्प्रतिबन्धकाभावादेवानुमितिः, यत्र सिषाधयिषासिद्धिपरामर्शाः सन्ति तत्र परामर्शकाले सिषाधयिषैव नास्ति, एवमन्यत्रापि सिद्धिकाले परामर्शकाले वा न सिषाधयिषा—योग्यविभुविशेषगुणानां यौगपद्यनिषेधात्, तत्कथं सिषाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणमिति चेद् न—

यत्र वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति प्रत्यक्षं स्मरणं वा ततः

मुक्तावलीभयूखः।

सिद्धिश्च नास्ति तत्र सिद्धिरूपविशेष्यस्य सिषाधयिषाविरहरूपविशेषणस्य चाभावादुभयाभावप्रयुक्तो विशिष्टाभावः। यत्र सिषाधयिषा नास्ति सिद्धिश्च नास्ति तत्र सिषाधयिषाविरहरूपविशेषणस्य सत्त्वेऽपि सिद्धिरूपविशेष्यस्याभावात् विशेष्याभावप्रयुक्तो विशिष्टाभावः। इति त्रिषु स्थलेषु अनुमितिर्भवति यत्र च सिषाधयिषा नास्ति सिद्धिरस्ति तत्र सिषाधयिषाविरहविशिष्टसिद्धेरसत्त्वात् सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपपक्षताया असत्त्वेन नानुमितिरिति।

सिषाधयिषाविरहविशिष्टं च सिद्धौ एककालावच्छेदेनैकशरीरावच्छेदेनैकात्मवृत्तित्वम् तेन सिषाधयिषाकालीनसिद्धेः कालैकसम्बन्धेन सिषाधयिषाविरहविशिष्टत्वेन, घटावच्छेदेनैकस्मिन्नात्मनि सिषाधयिषाविरहविशिष्टत्वेन, वा नानुमितिरिति एककालीनैकशरीरावच्छेदेनैकात्मवृत्तित्वस्याभावादिति।

परामर्शरूपकारणसत्त्वे सिद्धिरूपप्रतिबन्धकसत्त्वे यदि सिषाधयिषा स्यात्तदा सिषाधयिषाया उत्तेजकत्वं वाच्यं न चैतत्सम्भवतीत्याशयेनाशङ्कते ननु यत्रेति।

अयं भावः प्रथमं परामर्शस्तद्द्वितीयक्षणे सिद्धिः सिद्ध्युत्पत्तिद्वितीयक्षणे सिषाधयिषा तत्र सिषाधयिषाकाले परामर्शस्य नाशात् नानुमितिः, यत्र च क्रमेण सिषाधयिषासिद्धिपरामर्शस्तत्र परामर्शकाले सिषाधयिषाया नष्टत्वात् उत्तेजकाभावेन प्रतिबन्धकसद्भावान्नानुमितिः, यत्र च क्रमेण सिद्धिपरामर्शसिषाधयिषास्तत्र सिषाधयिषाकालेसिद्धेर्नाशेन प्रतिबन्धकाभावादेवानुमितिः, यत्र च परामर्शसिषाधयिषासिद्धयस्तत्र परामर्शनाशादेव नानुमितिः, यत्र च सिषाधयिषापरामर्शसिद्धयः तत्र उत्तेजकाभावात्प्रतिबन्धकसद्भावान्नानुमितिः, यत्र च सिद्धिसिषाधयिषापरामर्शाः तत्र प्रतिबन्धकाभावादेवानुमितिः, इति सिद्धिकाले परामर्शकाले च न सिषाधयिषा इति सिषाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणं व्यर्थमिति।

प्रत्यक्षमिति। ननु वह्निव्याप्यधूमवान्पर्वतो वह्निमानिति प्रत्यक्षानन्तरं सिषाधयिषैव नोदेति सिषाधयिषायामिष्टसाधनताज्ञानस्य कारणत्वात्तस्य च प्रकृतेऽभावात् तादृशप्रत्यक्षात्पूर्वमिष्टसाधनताज्ञानकल्पने च प्रत्यक्षमेव न स्यादिच्छासामग्र्याप्रतिबन्धात्

सिषाधयिषा तत्र पक्षतासम्पत्तये तद्विशेषणस्यावश्यकत्वात् ।

अत्रेदं बोध्यम् । यादृशयादृशसिषाधयिषासत्त्वे सिद्धिसत्त्वे यल्लिङ्गकानुमितिस्तादृशतादृश्यसिषाधयिषाविरहविशिष्टसिद्धयभावस्तल्लिङ्गकानुमितौ पक्षता । तेन सिद्धिपरामर्शसत्त्वेऽपि यत्किञ्चिज्ज्ञानं जायतामितीच्छायामपि नानुमितिः । वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति प्रत्यक्षसत्त्वे प्रत्यक्षातिरिक्तं ज्ञानं जायतामितीच्छायां तु भवत्येव । एवं धूमपरामर्शसत्त्वे आलोकेन वह्निमनुमिनुयामितीच्छामामपि नानुमितिः ।

सिषाधयिषाविरहकाले यादृशसिद्धिसत्त्वे नानुमितिस्तादृशी सिद्धिर्विशिष्यैव तत्तदनुमितौ प्रतिबन्धिका वक्तव्या, तेन 'पर्वतस्तेजस्वी पाषाणमयो वह्निमानिति' ज्ञानसत्त्वेऽप्यनुमितेर्न विरोधः ।

परन्तु पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेनानुमितिदर्शनात्पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिरेव प्रतिबन्धिका । पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्रति तु सिद्धिमात्रं विरोधि ।

इदं तु बोध्यम् । यन्नायं पुरुषो न वेति संशयानन्तरं पुरुषत्वव्याप्यकरादिमानयमिति ज्ञानं तन्नासत्यामनुमित्सायां पुरुषस्य प्रत्यक्षं भवति

मुक्तावलीमयूखः ।

प्रत्यक्षानन्तरमिष्टसाधनताज्ञानोपगमे च सिषाधयिषाकाले तादृशप्रत्यक्षस्य नाशादनुमितिरेव न स्यात्परामर्शरूपकारणाभावादिति चेन्न—प्रत्यक्षमित्यस्य अनुमितीष्टसाधनताविषयकमिति शेषः । एवं च 'वह्निव्याप्यधूमवान् पर्वतो वह्निमान्' अनुमितिरिष्टसाधनम् , इति समूहालम्बनात्मकज्ञानानन्तरं सिषाधयिषासद्भावेन परामर्शसद्भावेन चानुमितिरित्याशयात् ।

सिद्धिपरामर्शसत्त्वे इति । ननु यत्किञ्चिज्ज्ञानस्यैव सिद्धित्वेन तस्य पूर्वमेवसत्त्वेन सिषाधयिषाविषयसिद्धया सिषाधयिषायाः प्रतिबन्धात् सिषाधयिषैव न स्यादिति चेन्न, सिद्धिपरामर्शसत्त्वे 'एतदुत्तरकालीनं यत्किञ्चिज्ज्ञानं जायताम्' इतीच्छाविषयसिद्धेः पूर्वमसत्त्वेन एवं रूपायाः सिषाधयिषया उत्पत्तौ बाधकाभावादिति ।

नन्वनुमितित्वप्रकारिकेच्छैवोत्तेजिका, तेन च यत्किञ्चिज्ज्ञानं जायतामितीच्छामादाय नानुमितिः सम्भवति इति यादृशयादृशेत्यैवंरीत्या सिषाधयिषायाः परिचयं कृत्वा तत्तद्व्यक्तित्वेनोत्तेजकत्वकल्पनमफलमिति चेदत आह—प्रत्यक्षातिरिक्तमिति । एवं च अनुमितित्वप्रकारिकेच्छैव उत्तेजिकेति वक्तुमशक्यम् प्रत्यक्षातिरिक्तं ज्ञानं जायतामितीच्छाया अनुमितित्वाप्रकारकत्वेऽप्युत्तेजकत्वादिति भावः ।

भवत्येवेति । अनुमितिरिति शेषः ।

विशिष्यैवेति । वह्नित्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिश्चयः वह्नित्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकानुमितौ प्रतिबन्धक इति भावः ।

इदं त्विति । अयं पुरुषो नवेति संशयानन्तरं पुरुषत्वव्याप्यकरादिमानयमिति ज्ञाने

न त्वनुमितिरतोऽनुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्री कामिनीजिज्ञासादिवत्स्वातन्त्र्येण प्रतिबन्धिका।

एवं परामर्शानन्तरं विना प्रत्यक्षेच्छां पक्षादेः प्रत्यक्षानुत्पत्तेः, प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्री भिन्नविषयकप्रत्यक्षे प्रतिबन्धिका ॥ ७० ॥

हेतुप्रसङ्गाद्धेत्वाभासानभिभजते—

अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः।
कालात्ययापदिष्टश्च हेत्वाभासास्तु पञ्चधा ॥ ७१ ॥

अनैकान्त इति। तल्लक्षणं तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधि-

---

मुक्तावलीसमेतः।

जाते चक्षुःसंयोगादिरूपायां प्रत्यक्षसामग्र्यां च सत्यामनुमितिर्न भवति किं तु प्रत्यक्षं भवति, अतः प्रत्यक्षसामग्री अनुमितिप्रतिबन्धिका तत्रैवानुमित्सासत्त्वे तु अनुमितिर्भवति इति अनुमित्सायाः उत्तेजकत्वं बोध्यम्। तथा च अनुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्री अनुमितिप्रतिबन्धिकेति।

स्वातन्त्र्येणेति। यथा 'कामिनीजिज्ञासा ज्ञानमात्रे विरोधिनी' तथा अनुमित्साविरहविशिष्टप्रत्यक्षसामग्री अनुमितौ विरोधिनीति भावः। स्वातन्त्र्येण पक्षतावच्छेदकप्रविष्टत्वेनेत्यर्थः। अयं भावः—यथा सिद्धेः सिद्धयभावरूपानुमितिकारणीभूतपक्षतायाविघटनद्वारानुमितिप्रतिबन्धिका तथा नेयमिति। एतेन यत्पक्षतापक्षीयोक्ता सिषाधयिषाविरहविशिष्टसिद्धिप्रत्यक्षसामग्योरन्यतराभावरूपपक्षता नाभ्युपगन्तव्येति सूचितम्।

ननु प्रत्यक्षसामग्र्या अनुमितिप्रतिबन्धकत्वे भिन्नविषयकप्रत्यक्षसामग्रीसत्त्वेऽप्यनुमित्यनुदयप्रसङ्ग इत्याह—एवमिति। अयं भावः—वह्निव्याप्यधूमवान् पर्वत इति परामर्शानन्तरं यदि पर्वतप्रत्यक्षसामग्री चक्षुःसंयोगादिरूपा वर्तते तदाऽनुमितिरेव जायते न प्रत्यक्षमिति विभिन्नविषयकप्रत्यक्षस्य अनुमितिसामग्री प्रतिबन्धिका भवति यदि च प्रत्यक्षेच्छावर्तते तदा विभिन्नविषयकप्रत्यक्षं जायते इति प्रत्यक्षेच्छाया उत्तेजकत्वम्। एवं च प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्री विभिन्नविषयकप्रत्यक्षस्य प्रतिबन्धिकेति ॥ ७० ॥

हेतुप्रसङ्गादिति। स्मृतत्वे सति उपेक्षानर्हत्वं प्रसङ्गसङ्गतिः। विजयलक्षणैकफलकत्वादित्यपि प्रसङ्गतिर्बोध्या।

हेतोराभासा इति व्युत्पत्त्या हेत्वाभासपदस्य हेतुदोषपरत्वमभिप्रेत्य हेतुदोषलक्षणमाह—तल्लक्षणमिति।

यद्विषयकत्वेनेत्यत्र तृतीयार्थोऽवच्छेदकत्वं ज्ञानस्येत्यत्र षष्ठ्या निष्ठत्वमर्थः विरोधित्वं प्रतिबन्धकत्वम्। तथा च ज्ञानवृत्तित्वविशिष्टयद्विषयकत्वावच्छिन्नप्रकृतानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतातत्त्वम् हेत्वाभासत्वम्, 'ह्रदो वह्निमान्' इत्यनुमितौ "वह्नयभाववान् ह्रद" इति बाधनिश्चयः प्रतिबन्धकः। तथा च प्रकृतानुमितिः 'ह्रदो वह्निमान्' इत्याकारिका या च प्रतिबध्या, इति प्रतिबध्यता तन्निष्ठा तन्निरूपिता प्रतिबन्धकता 'वह्नयभाववान् ह्रदः' इति ज्ञाने तत्र च वह्नयभाववद्ह्रदविषयकत्वं वर्तते इति

त्वं तत्त्वम् । तथाहि—व्यभिचारादिविषयकत्वेन ज्ञानस्यानुमितिविरोधित्वात्ते दोषाः । यद्विषयकत्वं च यादृशविशिष्टविषयकत्वम्, तेन बाधभ्रमस्यानुमितिविरोधित्वेऽपि न क्षतिः । तत्र पर्वतो वह्नयभाववानिति विशिष्टस्याऽसिद्धत्वान्न हेतुदोषः ।

न च वह्नयभावव्याप्यपाषाणमयत्ववानितिपरामर्शकाले वह्निव्याप्यधूमस्याभासत्वं न स्यात्तत्र वह्नयभावव्याप्यवान्पक्ष इति विशिष्टस्याप्रसिद्धत्वादिति वाच्यम्,

---

मुक्तावलीमयूखः ।

भाववद्ह्रदविषयकत्वावच्छिन्ना तत्त्वं वह्नयभाववद्ह्रद इति तस्य दोषत्वम्, एवं पर्वतो धूमवान् वह्नेरित्यत्र धूमाभाववद्वृत्तिवह्नेर्दोषत्वम् । तथा हि—हेत्वाभासलक्षणेऽनुमितिपदमनुमितितत्करणान्यतरपरम् इति प्रकृतानुमितिकरणं धूमाभाववदवृत्तिर्वह्निरिति व्याप्तिज्ञानं तच्छिष्टप्रतिबध्यतानिरूपितप्रतिबन्धकता 'धूमाभाववद्वृत्तिर्वह्नि' इति निश्चये तदवच्छेदकं धूमाभाववद्वृत्तिवह्निविषयकत्वमिति धूमाभाववद्वृत्तिवह्निर्व्यभिचारदोष इति ।

नन्वत्रावच्छेदकतायदि स्वरूपसम्बन्धरूपा तदा ह्रदो वह्नयभाववान् इति ज्ञानीयवह्नयभावविषयकत्वे स्वरूपसम्बन्धरूपावच्छेदकत्वसत्त्वात् वह्नयभावे दोषलक्षणाव्याप्तिरतोऽनतिरिक्तवृत्तित्वरूपा विवक्षणीया । तथा च वह्नयभावविषयकत्वस्य ह्रदो वह्निमान् इत्यनुमित्यप्रतिबन्धके वह्नयभाव इति ज्ञाने सत्त्वेन अनुमितिप्रतिबन्धकतानिरूपितवृत्तितया अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वाभावेन वह्नयभावेऽतिव्याप्तिवारणेऽपि विशिष्टे शुद्धाषातिरिच्यत' इति न्यायेन वह्नयभाववद्ह्रदस्य ह्रदानतिरेकात् ह्रदविषयकत्वस्य ह्रदो वह्निमान् इत्यनुमित्यप्रतिबन्धके ह्रद इत्याकारके ज्ञाने सत्त्वेन ह्रदविषयकत्वस्य अनुमितिप्रतिबन्धकतानतिरिक्तवृत्तित्वे वह्नयभाववद्ह्रदविषयकत्वस्य प्रतिबन्धकत्वानतिरिक्तवृत्तित्वस्य दुर्वचतया वह्नयभाववद्ह्रदेऽव्याप्तेः । अतो यद्विषयकत्वमित्यस्यार्थमाह मूले—यादृशविशिष्टविषयकत्वमिति । तस्य यद्रूपावच्छिन्नविषयकत्वमिति, तत्त्वमित्यस्य च तद्रूपावच्छिन्नत्वमित्यर्थः । तेन पर्वतो वह्निमान् इत्यनुमितौ 'पर्वतो वह्नयभाववान्' इति बाधभ्रमस्यानुमितिप्रतिबन्धकत्वेऽपि सा प्रतिबन्धकता न वह्नयभाववत्पर्वतत्वावच्छिन्नविषयकत्वावच्छिन्ना वह्नयभाववत्पर्वतस्यैवाप्रसिद्धेः । तथा च ज्ञानवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयकत्वावच्छिन्नानुमितिप्रतिबन्धकता तद्रूपावच्छिन्नत्वं हेत्वाभासत्वमिति लभ्यते । एवं च ह्रदस्य वह्नयभाववद्ह्रदानतिरेकेऽपि ह्रदत्वावच्छिन्नविषयतातोवह्नयभाववद्ह्रदत्वावच्छिन्नविषयताया भेदेन वह्नयभाववद्ह्रदत्वावच्छिन्नविषयकत्वस्य प्रतिबन्धकतानतिरिक्तवृत्तितया नाव्याप्तिः ।

ननु ज्ञानवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयकत्वं प्रकृतानुमितिनिष्ठप्रतिबध्यतानिरूपित प्रतिबन्धकतानतिरिक्तवृत्तितद्रूपावच्छिन्नत्वस्य हेत्वाभासलक्षणत्वे ह्रदो वह्निमान् नवेति संशये भाविज्ञातमप्रमा इति अप्रामाण्यनिश्चयात्स्कन्दिते ह्रदो वह्नयभाववान् इति बाधनिश्चये वह्नयभाववान् ह्रदो वह्निमान् इति आहार्यनिश्चये च वह्नयभाववद्ह्रदत्वाव-

इष्टापत्तेः, अन्यथा बाधस्याप्यनित्यदोषत्वापत्तेः। तस्मात्तत्र वह्न्यभाव-व्याप्यपाषाणमयत्ववानितिपरामर्शकाले वह्निव्याप्यधूमस्य नाभासत्वम्, भ्रमादनुमितिप्रतिबन्धमात्रं, हेतुस्तु न दुष्टः।

इयं च साध्याभाववद्वृत्तिहेत्वादिकं दोषः। तद्वत्त्वं च हेतौ येन केनापि सम्बन्धेनेति नव्याः।

परे तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तद्वत्त्वं हेत्वाभासत्वम्, सत्प्रतिपक्षे विरोधिव्याप्त्यादिकमेव तथा, तद्वत्त्वं च हेतोर्ज्ञानरूपसम्बन्धेन। न चैवं वह्निमान् धूमादित्यादौ पक्षे बाधभ्रमस्य साध्याभाववद्विषयकत्वेनानुमितिविरोधित्वाज्ज्ञानरूपसम्बन्धेन तद्वत्त्वस्यापि सत्त्वात् सद्धेतोरपि बाधितत्वापत्तिरिति वाच्यम्, तत्र ज्ञानस्य सम्बन्धत्वाकल्पनात्, सत्र सत्प्रतिपक्षित इति व्यवहारेण तत्कल्पनात्, तत्र बाधित इति व्यवहाराभावादित्याहुः।

अनुमितिविरोधित्वं च अनुमितितत्करणान्यतरविरोधित्वम्। तेन

मुक्तावलीमयूखः।

ज्ञानविषयकत्वस्यसत्त्वात्। तत्रचानुमितिप्रतिबन्धकत्वस्यासत्त्वादसम्भव इति चेन्न—ज्ञानपदस्य अनाहार्यायथार्थज्ञानानास्कन्दितनिश्चयपरत्वेनादोषात्। प्रकृतलक्षणेऽवच्छेदकता च अनतिरिक्तवृत्तित्वरूपा गृह्यते एवं च अनाहार्यायथार्थज्ञानानास्कन्दितनिश्चयत्वतत्त्वविशिष्टयद्रूपावच्छिन्नविषयता प्रकृतानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकाऽनतिरिक्तवृत्तिः तद्रूपवत्त्वं लक्षणं पर्यवसन्नम्।

नचेति। 'वह्निव्याप्यधूमवान् पर्वत' इति परामर्शकाले वह्न्यभावव्याप्यपाषाणमयवान् पर्वत इति परामर्शे सति धूमहेतोस्सत्प्रतिपक्षत्वं न स्यात् वह्न्यभावव्याप्यपाषाणमयवत्त्ववत्त्वरूपविषयस्याप्रसिद्धेरिति भावः।

ननु वह्न्यभाववद्भ्रमरूपबाधस्य जलादिहेतावसत्त्वात्तस्य दुष्टत्वव्यवहारो न स्यादत आह—तद्वत्त्वं चेति। अयं भावः 'वह्न्यभाववान् ह्रदः जलं च' इति ज्ञाने एकज्ञानविषयकत्वहेतुतावच्छेदकत्वसम्बन्धेन वह्न्यभाववद्भ्रमरूपबाधो जलादिहेतौ वर्तते इति तत्र बाधितत्वव्यवहारे तात्पर्यमिति।

हेत्वाभासन्त इति व्युत्पत्त्या हेत्वाभासपदस्य तु हेतुपरत्वमभिप्रेत्य सत्प्रतिपक्षत्वादीनामप्युपगन्तॄणां मतमाह—परे त्विति। बाधभ्रमे बाधितत्वव्यवहारो न भवति सत्प्रतिपक्षभ्रमे तु सत्प्रतिपक्षित इति व्यवहारो भवति इति बाधितः सत्प्रतिपक्षित इति व्यवहारयोः स्वानुभवमात्रसाक्षिकत्वम् आहुरित्यस्वरसबीजम्।

ननु 'ह्रदो वह्निमान्' इत्यनुमितिविरोधित्वं ह्रदो वह्न्यभाववान् इति बाधबुद्धेरेव न तु 'वह्न्यभाववद्वृत्तिजलमिति व्यभिचारबुद्धेरिति व्यभिचारे हेत्वाभासलक्षणाव्याप्तिरत आह—अनुमितितत्करणेति। एवं च बाधबुद्धेरनुमितिविरोधित्वाद्व्यभिचारबुद्धेश्च अनुमितिकरणाव्याप्तिज्ञानविरोधित्वात् तयोर्लक्षणसमन्वय इति भावः।

ननु व्यभिचारबुद्धेरपि अनुमितिविरोधित्वमस्तु किमिति अनुमितिपदस्य अनुमिति-

व्यभिचारिणि नाव्याप्तिः। दोषज्ञानं च यद्धेतुविषयकं तद्धेतुकानुमितौ प्रतिबन्धकं तेनैकहेतौ व्यभिचारज्ञाने हेत्वन्तरेणानुमित्युत्पत्तेः, तदभावाघनवगाहित्वाच्च व्यभिचारज्ञानस्यानुमितिविरोधित्वाभावेऽपि न क्षतिरिति सङ्क्षेपः।

यादृशसाध्यपक्षहेतौ यावन्तो दोषास्तावदन्यान्यत्वं तत्र हेत्वाभासत्वम्। पञ्चत्वकथनन्तु तत्सम्भवस्थलाभिप्रायेण।

एवञ्च साधारणाद्यन्यतमत्वमनैकान्तिकत्वम्। साधारणः साध्यवदन्यवृत्तिः, तेन च व्याप्तिज्ञानप्रतिबन्धः क्रियते। असाधारणः साध्यसामानाधिकरण्यो हेतुः, तेन साध्यसामानाधिकरण्यग्रहः प्रतिबध्यते। (यथा शब्दो नित्यः शब्दत्वादित्यादावसाधारण्यं शब्दोऽनित्यः शब्दत्वादित्यादौ त्वसाधारण्यभ्रमः)।

अन्ये तु सपक्षावृत्तिरसाधारणः। सपक्षश्च निश्चितसाध्यवान्। इत्थञ्च

मुक्तावलीमयूखः।

तत्करणान्यतरपरत्वमास्थीयते इत्यत आह—दोषज्ञानं चेति। अयं भावः 'पर्वतो वह्निमान् द्रव्यत्वात्' इत्यत्र वह्न्यभाववद्वृत्तिद्रव्यत्वरूपव्यभिचारज्ञानेऽपि धूमहेतुका 'पर्वतो वह्निमान्' इत्यनुमितिर्भवति; किं च व्यभिचारबुद्धेः साध्याभावावगाहित्वाभावान्न साध्यवत्तावुद्धिप्रतिबन्धकत्वमिति न व्यभिचारबुद्धेरनुमितिप्रतिबन्धकत्वमतोऽनुमितिपदस्य अनुमितितत्करणान्यतरपरत्वोपवर्णनं युक्तमेवेति मन्तव्यम्।

ननु निर्वह्निपर्वतो वह्निमान् इत्यनुमितौ न कोऽपि हेत्वाभासः स्यात् 'निर्वह्नि पर्वतो वह्निमान्' इत्याद्यार्यानुमितेरप्रसिद्धया तन्निष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकत्वाय कुत्राप्यसत्त्वादत आह—यादृशसाध्यपक्षेति। तद्धर्मावच्छिन्नसाध्यपक्षकानुमितित्वेन किमुद्दिश्यन्यायप्रयोगे यद्धर्मावच्छिन्ने दोषव्यवहारः सम्प्रदायसिद्धस्तावदन्यान्यत्वं तत्रत्यदोषसामान्यलक्षणम्। एवं च निर्वह्निपर्वतो वह्निमान् धूमादित्यत्र अनुमितेरप्रसिद्धावपि अस्मिँल्लक्षणेऽनुमितेरप्रवेशान्न क्षतिः, प्रकृते च वह्निविशिष्टपर्वतरूपाश्रयासिद्धौ धर्माभावविशिष्टनिर्वह्निरूपस्वरूपासिद्धौ दोषव्यवहारः इष्ट इति। वायुर्गन्धवान् स्नेहादित्यत्र सर्वहेत्वाभाससम्भवः। स्वविरुद्धधर्मधर्मितावच्छेदकस्वप्रकारकज्ञानमाहार्यज्ञानम्।

तेन चेति। साध्यवदन्यावृत्तित्वरूपव्याप्तिज्ञानप्रतिबन्धः क्रियते इति।

साध्यसामानाधिकरण्यग्रह इति। हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यरूपव्याप्तिग्रहः प्रतिबध्यते इति भावः, अनुपसंहारी च साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिग्रहं प्रतिबध्नाति। एवं च साधारणासाधारणानुपसंहारिणां त्रयाणामपि अव्यभिचारग्रहप्रतिबन्धकतया एकरूपेण (अनैकान्तिकत्वेन) हेत्वाभासतेति ध्येयम्।

पक्षे साध्यसन्देहदशायामेव असाधारणस्य हेत्वाभासता न तु निश्चयदशायां तदानीं पक्षस्यैव निश्चितसाध्यवत्त्वेन सपक्षतया सपक्षव्यावृत्तत्वस्य हेतोरभावादित्यसाधारणस्यानिश्चयदोषतावादिमत आह—अन्ये त्विति। नीलपटावृत्तित्वज्ञानस्य पटवत्ताज्ञाने इव

शब्दोऽनित्यः शब्दत्वादित्यादौ यदा पक्षे साध्यनिश्चयस्तदा नासाधारण्यम्-तत्र हेतोर्निश्चयादिति वदन्ति।

अनुपसंहारो चात्यन्ताभावाप्रतियोगिसाध्यकादिः, अनेन व्यतिरेकव्याप्तिज्ञानप्रतिबन्धः क्रियते।

विरुद्धस्तु साध्यव्यापकीभूताभावप्रतियोगी, अयं साध्याभावग्रहसामग्रीत्वेन प्रतिबन्धकः। सत्प्रतिपक्षे तु प्रतिहेतुः साध्याभावसाधकः, अत्र तु हेतुरेवेति विशेषः। साध्याभावसाधक एव साध्यसाधकत्वेनोपन्यस्त इत्यशक्तिविशेषोपस्थापकत्वाच्च विशेषः।

सत्प्रतिपक्षः साध्याभावव्याप्यवान्पक्षः। अगृहीताप्रामाण्यकसाध्यव्याप्यवत्त्वोपस्थितिकालीनगृहीताप्रामाण्यकतदभावव्याप्यवत्त्वोपस्थितिविषयस्तथेत्यन्ये।

अत्र च परस्परभावव्याप्यवत्ताज्ञानात्परस्परानुमितिप्रतिबन्धः फलम्।

अत्र केचित्-यथा घटाभावव्याप्यवत्ताज्ञानेऽपि घटचक्षुःसंयोगे सति घटवत्ताज्ञानं जायते, यथा च शङ्खे सत्यपि पीतत्वाभावव्याप्यशङ्खत्ववत्ताज्ञाने सति पित्तादिदोषे पीतः शङ्ख इति धीर्जायते, एवं कोटिद्वयव्याप्यदर्शनेऽपिकोटिद्वयस्य प्रत्यक्षरूपः संशयो भवति, तथा सत्प्रतिपक्षस्थले संशयरूपानुमितिर्भवत्येव। यत्र चैककोटिव्याप्यदर्शनं तत्राधिकबलतया

मुक्तावलीमयूखः।

निश्चितसाध्यवदवृत्तित्वरूपासाधारण्यज्ञानस्य साध्यसमानाधिकरण्यग्रहे प्रतिबन्धकताविरहेण साधारणादित्रयाणामेकहेत्वाभासतानुपपत्तिरत्रास्तरसबीजं वदन्तीत्यनेन सूचितम्।

व्यतिरेकव्याप्तीति। साध्याभावव्यापकीभूताभावप्रतियोगित्वस्वरूपा व्यतिरेकव्याप्तिः। केवलान्वयिसाध्यकेऽन्वयव्याप्तिज्ञानादेवानुमितिरिति भावः। विरुद्धस्य साध्याभावग्रहसामग्रीत्वेन साध्याभावोत्पायकतया साध्यवत्ताग्रहविरोधित्वम्।

नन्वेवं सत्प्रतिपक्षविरुद्धयोरुभयोरपि साध्याभावसाध्यकतया भेदो न स्यादत आह—सत्प्रतिपक्षे त्विति।

रत्नकोशकारमतमुपपादयति—अत्रेति। सत्प्रतिपक्षस्य संशयजनकत्वं दूषकतावीजं, तत्वनुमितिप्रतिबन्धकत्वं तदभावव्याप्यवत्ताज्ञानस्यानुमितिप्रतिबन्धकत्वे मानाभावादिति तेषामाशयः।

अनुमितिर्भवत्येवेति। ननु यद्यपि तद्वत्ताज्ञाने तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वे मानाभावेन परस्परानुमितिप्रतिबन्धः सत्प्रतिपक्षस्थले न सम्भवति तथापि निश्चयोत्पादने क्लृप्तशक्तिकयोस्तद्व्याप्यवत्तातदभावव्याप्यवत्ताज्ञानयोर्मिलितयोः साध्यसंशयहेतुत्वं कल्पनीयमिति गौरवमिति चेन्न। तत्तत्परामर्शस्य तत्तद्विधेयकानुमितित्वमेव कार्यतावच्छेदकं न तु निश्चयत्वमपि तद्घटकं किन्तु एकैकपरामर्शसत्त्वे कोट्यन्तरभावकृतसामग्र्यभावाद् निश्चयात्मिकानुमितिर्भवति उभयपरामर्शसत्त्वे च कारणबलादुभयकोट्योर्विरोधितया भानेऽपि संशयरूपानुमितिर्भवतीति अधिककार्यकारणभावकल्पनाऽभावेन गौरवाभावादिति भावः।

द्वितीयकोटिभानप्रतिबन्धान्न संशयः । फलबलेन चाधिकसमबलभावः कल्प्यत इति वदन्ति ।

तत्र तदभावव्याप्यवत्ताज्ञाने सति तदुपनीतभानविशेषशाब्दबोधादेरनुदयाल्लौकिकसन्निकर्षजन्यदोषविशेषाजन्यज्ञानमात्रे तस्य प्रतिबन्धकता लाघवात्, न तूपनीतभानविशेषे शाब्दबोधे च पृथक्प्रतिबन्धकतागौरवात् । तथात्व प्रतिबन्धकसत्त्वात्कथमनुमितिः ? न हि लौकिकसन्निकर्षस्थले प्रत्यक्षमिव सत्प्रतिपक्षस्थले संशयाकारानुमितिः प्रामाणिकी येनानुमितिभिन्नत्वेनापि विशेषणीयम् । यत्र च कोटिद्वयव्याप्यवत्ताज्ञानं तत्रोभयत्राप्रामाण्यज्ञानात्संशयो नान्यथा अगृहीताप्रामाण्यकस्यैव विरोधिज्ञानस्य प्रतिबन्धकत्वादिति ।

असिद्धिस्त्वाश्रयासिद्धयाद्यन्यतमत्वम् । आश्रयासिद्धिः पक्षे पक्षतावच्छेदकस्याभावः । यत्र च 'काञ्चनमयः पर्वतो वह्निमानि'ति साध्यते तत्र 'पर्वतो न काञ्चनमय' इति ज्ञाने विद्यमाने काञ्चनमयपर्वते परामर्शप्रतिबन्धः फलम् ।

स्वरूपासिद्धिस्तु पक्षे व्याप्यत्वाभिमतस्याभावः । तत्र च ह्रदो द्रव्यं धूमादित्यादौ पक्षे व्याप्यत्वाभिमतस्य हेतोरभावे ज्ञाते पक्षे साध्यव्याप्यहेतुमत्ताज्ञानरूपस्य परामर्शस्य प्रतिबन्धः फलम् ।

साध्याप्रसिद्धयादयस्तु व्याप्यत्वासिद्धिमध्येऽन्तर्भूताः । साध्ये साध्यतावच्छेदकस्याभावः साध्याप्रसिद्धिः, एतज्ज्ञाने जाते 'काञ्चनमयवह्निमान्' इत्यादौ साध्यतावच्छेदकविशिष्टसाध्यव्याप्यवत्ताज्ञानरूपपरामर्शप्रतिबन्धः फलम् ।

एवं हेतौ हेतुतावच्छेदकस्याभावः साधनाप्रसिद्धिः, यथा काञ्चनमयधूमादित्यादौ अत्र हेतुतावच्छेदकविशिष्टहेतोर्ज्ञानाभावात्तद्धेतुकव्याप्तिज्ञानादेरभाव फलम् ।

एवं वह्निमान् नीलधूमादित्यादौ गुरुतया नीलधूमत्वस्य हेतुतानवच्छेदकत्वमपि व्याप्यत्वासिद्धिरित्यपि वदन्ति ।

मुक्तावलीमयूखः ।

ननु यद्युभयभासकसामग्रीसत्त्वे उभयभानं तदा पित्तादिदोषसत्त्वेऽपि पीतत्वशुक्लत्वोभयस्मृतावुभयोर्भानापत्तिरत आह—फलबलेनेति । तथा च तत्र पीतत्वसाक्षात्कारस्यैव आनुभविकत्वमिति शुक्लत्वग्रहेऽपि पित्तरूपदोषस्य प्रतिबन्धकत्वं कल्पयित्वा पीतत्वसाक्षात्कारसामग्र्या अधिकबलत्वं, दूरत्वदोषे च स्थाणुत्वपुरुषत्वयोः स्मृतौ संशयस्यैवोदयात्समबलत्वं कल्प्यते इति भावः ।

रत्नकोशकृन्मतं निरस्यति—तन्नेति । उपनीतभानविशेषः—ज्ञानलक्षणासन्निकर्षः ।

केषां चिन्मतमाह—एवं वह्निमानिति । वदन्तीत्यनेनास्वरसः सूचितः । तद्धीर्ज तु नीलधूमे व्याप्तिसत्त्वात्कथं व्याप्यत्वासिद्धिः ।

बाधस्तु पक्षे साध्याभावादिः। एतस्यानुमितिप्रतिबन्धः फलम्। तद्धर्मिकतदभावनिश्चयो लौकिकसन्निकर्षजन्यदोषविशेषाजन्यतद्धर्मिकतज्ज्ञानमात्रे विरोधीति।

न तु तत्र संशयसाधारणं पक्षे साध्यसंसृष्टत्वज्ञानमनुमितिकारणं तद्विरोधितया च बाधसत्प्रतिपक्षयोर्हेत्वाभासत्वमिति युक्तम्-अप्रसिद्धसाध्यकानुमित्यनापत्तेः, साध्यसंशयादिकं विनाप्यनुमित्युत्पत्तेश्च।

एवं साध्याभावज्ञाने प्रमात्वज्ञानमपि न प्रतिबन्धकं-मानाभावाद्गौर-

---

मुक्तावलीमयूखः।

न च तत्र व्याप्तिसत्त्वेऽपि नीलधूमत्वस्यानवच्छेदकतया तदवच्छेदेन व्याप्यत्वासिद्धिरेवेति वाच्यम्। अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य नीलधूमत्वेऽपि सत्त्वात्।

न च स्वरूपसम्बन्धरूपावच्छेदकत्वस्याभावाद्व्याप्यत्वासिद्धिरिति वाच्यम्, तथा सति 'पशुमान् शास्नादेरत' इत्यत्रापि व्याप्यत्वासिद्ध्यापत्तेः शास्नापेक्षया गोत्वस्य लघुत्वेन शास्नादेः स्वरूपसम्बन्धरूपावच्छेदकत्वाभावात्। तस्माद्वयर्थविशेषणस्थले न व्याप्यत्वसिद्धिर्हेत्वाभास', किन्त्वधिकोक्तिरूपनिग्रहस्थानेन पुरुषो निगृह्यते भाव.।

धूमाभाववद्ह्रदः स्वरूपासिद्धिः। काञ्चनमयत्वाभाववत्पर्वतः व्याप्यासिद्धिः। काञ्चनमयत्वाभाववद्वह्निः साध्याप्रसिद्धिः। काञ्चनमयत्वाभाववद्धूमः साधनाप्रसिद्धः। प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्पक्षः सत्प्रतिपक्षः, मतभेदेन साध्याभावव्याप्यवत्त्वम् सत्प्रतिपक्षः।

कश्चिन्मतं दूषयति नन्विति। श्रुत्यात्मनिश्चयवतोऽपि सिषाधयिषयाऽनुमित्युत्पादनाय संशयनिश्चयसाधारणसाध्यसंसर्गज्ञानत्वेन साध्यसंसर्गज्ञानमनुमितिकारणमिति तदाशयः।

नन्वेवं बाधनिश्चयकाले साध्यसंसर्गज्ञानाभावादेवानुमितिर्न भविष्यति इति बाधनिश्चयस्य नानुमितिविरोधित्वमिति बाधस्य हेत्वाभासत्वं न स्यादित्यत आह—**तद्विरोधितयेति**। अनुमितिकारणीभूतसाध्यसंसर्गज्ञानविरोधितयैव बाधसत्प्रतिपक्षयोर्हेत्वाभासत्वमनुमितिविरोधितयेति भावः।

अप्रसिद्धसाध्यकेति। पूर्वमगृहीतसाध्यविशेषकेत्यर्थः। 'पृथिवीतरत्वव्यापकाभावप्रतियोगिगन्धवती पृथिवी' इति व्यतिरेकपरामर्शजन्यायाः अप्रसिद्धेतरभेदरूपसाध्यविशेषिकायाः 'पृथिव्यामितरभेद' इत्यनुमितेरभावापत्तिरिति यावत्।

नन्वप्रसिद्धसाध्यिकाऽनुमितिः कुत्रापि न भवत्येवेत्यत आह—**साध्यसंशयेति**।

तथा च धनगर्जितेन मेघानुमितिस्थले संशयनिश्चययोर्द्वयोरप्यभावेन साध्यवत्ताज्ञानं नानुमितिहेतुरितिभावः।

पक्षविशेष्यकसाध्याभावज्ञाने प्रमात्वनिश्चयोऽनुमितिप्रतिबन्धकः तदभावोऽनुमितिकारणमिति तादृशप्रमात्वमेव बाध इति प्राचीनमतं दूषयति—**एवं साध्याभावेति**।

मानाभावादिति। प्रमाभावानवगाहिनः साध्याभावज्ञानधर्मिकप्रमात्वनिश्चयस्य विरोधित्वे मानाभावादित्यर्थः।

गौरवाच्चेति। पक्षविशेष्यकत्वापेक्षया पक्षविशेष्यकसाध्याभावज्ञानविशेष्यकस्य

वाच्य। अन्यथा सत्प्रतिपक्षादावपि तदभावव्याप्यवत्ताज्ञाने प्रमात्वविषयकत्वेन प्रतिबन्धकतापत्तेः, । किन्तु भ्रमत्वज्ञानानास्कन्दितबाधादिबुद्धेः प्रतिबन्धकता । तत्र भ्रमत्वशङ्काविघटनेन प्रामाण्यज्ञानं क्वचिदुपयुज्यते ।

न च बाधस्थले पक्षे हेतुसत्त्वे व्यभिचारः, पक्षे हेत्वभावे स्वरूपासिद्धिरेव दोष इति वाच्यम्, बाधज्ञानस्य व्यभिचारज्ञानादेर्भेदात् । किञ्च यत्र परामर्शानन्तरं बाधबुद्धिस्तत्र व्यभिचारज्ञानादेरकिञ्चित्करत्वाद्बाधस्यानुमितिप्रतिबन्धकत्वं वाच्यम्। एवं यत्रोत्पत्तिक्षणावच्छिन्ने घटादौ गन्धव्याप्यपृथिवीत्ववत्ताज्ञानं तत्र बाधस्यैव प्रतिबन्धकत्वं वाच्यम् ।

न च पक्षे घटे गन्धसत्त्वात्कथं बाध इति वाच्यम्, पक्षतावच्छेदकदेशकालावच्छेदेनानुमितेरनुभवसिद्धत्वादिति ।

बोधतद्व्याप्यभिन्ना ये हेत्वाभासास्तद्व्याप्या अपि तन्मध्य एवान्तर्भवन्ति । अन्यथा हेत्वाभासाधिक्यप्रसङ्गात् । बाधव्याप्यसत्प्रतिपक्षो भिन्न एव स्वतन्त्रेच्छेन मुनिना पृथगुपदेशात्। सत्प्रतिपक्षव्याप्यस्तु न प्रतिबन्धक इति ग्रन्थकृत्कार्थः ॥ ७१ ॥

आद्यः साधारणस्तु स्यादसाधारणकोऽपरः ।
तथैवानुपसंहारी त्रिधाऽनैकान्तिको भवेत् ॥ ७२ ॥
यः सपक्षे विपक्षे च भवेत्साधारणस्तु सः ।

मुक्तावलीमयूखः ।

साध्याभावनिश्चयत्वापेक्षया साध्याभाववतिसाध्याभावप्रकारकत्वरूप (प्रमात्व) निश्चयत्वस्यातिगुरुत्वादिति भावः ।

अकिञ्चित्करत्वादिति । व्यभिचारज्ञानं नानुमितौ साक्षात्प्रतिबन्धकं किन्तु परामर्शप्रतिबन्धद्वारा तथा च परामर्शोत्तरकालीनो व्यभिचारग्रहो नानुमितिं प्रतिरोद्धुं शक्नोति परामर्शस्य जातत्वात् किन्तु बाधबुद्धिरेव प्रतिबन्धिकेति भावः ।

व्यभिचाराद्विशङ्कीर्णमपि बाधं दर्शयति—एवमिति । उत्पत्तिकालावच्छिन्नो घटो गन्धवान् पृथिवीत्वादिति हि तादृशं स्थलम् । अत्र हि पक्षे हेतुसत्त्वात् स्वरूपासिद्धत्वस्य, प्रतियोगिव्यधिकरणसाध्याभाववद्वृत्तित्वरूपस्य व्यभिचारस्य, चाभावादिति भावः ।

बाधतद्व्याप्येति । बाधः साध्याभाववत्पक्षः तद्व्याप्यस्त्वयोंतेपक्षः तोद्भवाः व्यभिचारविरुद्धासिद्धाः । तद्व्याप्याः—व्यभिचारादिव्याप्याः, तत्रैव-व्यभिचारादिष्वेव अन्तर्भवन्ति इत्यर्थः, व्यभिचारादयो यथा व्याप्तिग्रहप्रतिबन्धकज्ञानविषयत्वेन हेत्वाभासास्तथा व्यभिचारादिव्याप्या अपीति तेषां पञ्चविधहेत्वाभासानन्तर्गतत्वे तेषामतिरिक्तहेत्वाभासत्वं स्यादिति भावः ।

सत्प्रतिपक्षव्याप्यस्त्विति । 'साध्याभावव्याप्यवान् पर्वत' इति बुद्धेः साध्यवत्ताज्ञानविरोधित्वेऽपि साध्याभावव्याप्यव्याप्यवानिति बुद्धेः साध्यवत्ताज्ञानविरोधित्वे मानाभावादिति भावः ॥ ७१ ॥

यः सपक्ष इति। सपक्षविपक्षवृत्तिः साधारण इत्यर्थः। सपक्षः—निश्चितसाध्यवान्। विपक्षः-साध्यवद्भिन्नः। विरुद्धवारणाय सपक्षवृत्तित्वमुक्तम्।

वस्तुतो विपक्षवृत्तित्वमेव वाच्यम्, विरुद्धस्य साधारणत्वेऽपि दूषकतावीजस्य भिन्नतया तस्य पार्थक्यात्।

यस्तूभयस्माद् व्यावृत्तः स चासाधारणो मतः ॥ ७३ ॥

यस्तूभयस्मादिति। सपक्षविपक्षव्यावृत्त इत्यर्थः। सपक्षः-साध्यवत्तया निश्चितः। विपक्षः-साध्यशून्यतया निश्चितः। शब्दोऽनित्यः शब्दत्वादित्यादौ यदा शब्देऽनित्यत्वस्य सन्देहस्तदा सपक्षत्वं विपक्षत्वं च घटादीनामेव तद्व्यावृत्तं च शब्दत्वमिति तदा तदसाधारणम्। यदा तु शब्देऽनित्यत्वनिश्चयस्तदा नासाधारणम्। इदं प्राचां मतम्। नवीनमते तु पूर्वमुक्तम् ॥ ७२ ॥ ७३ ॥

तथैवानुपसंहारी केवलान्वयिपक्षकः।
(पर्वतो वह्निमान् सत्त्वादिति तत्रादिमो भवेत् ॥
पृथ्वी नित्या गन्धवत्त्वादिति स्यादपरस्तथा।
सर्वं तुच्छं प्रमेयत्वादिति तत्रान्तिमो भवेत्।)

तथैवेति। सर्वमभिधेयं प्रमेयत्वादित्यादौ सर्वस्यैव पक्षत्वात्सामानाधिकरण्यग्रहस्थलान्तराभावान्नानुमितिः। इदं तु न सम्यक्—पक्षैकदेशे सहचारग्रहेऽपि तृतेरभावात्। अस्तु वा सहचारग्रहस्तावताप्यज्ञानरूपासिद्धिरेव, न तु हेत्वाभासत्वं तस्य, तथापि केवलान्वयिसाध्यकत्वं तत्त्वमित्युक्तम्।

यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः ॥ ७४ ॥
(गोत्वादिसाध्ये हेतुर्हि यत्राश्वत्वादिको भवेत् ॥)

यः साध्यवतीति। एवकारेण साध्यत्वावच्छेदेन हेत्वभावो बोधितः। तथा च साध्यव्यापकीभूताभावप्रतियोगित्वं तदर्थः ॥ ७४ ॥

मुक्तावलीमयूखः।

वस्तुत इति। ननु 'विपक्षवृत्तिः साधारण' स्वीकारे साध्यासामानाधिकरण्यो हेतुर्विरुद्ध इति लक्षणलक्षिते 'अयं गौः अश्वत्वात्' इतिविरुद्धेऽश्वत्वे साधारण्यापत्तिरिति चेन्न; इष्टापत्तेः। नन्वेवं तयोः पार्थक्यं किं निबन्धनमिति चेदुच्यते, साध्याभाववद्वृत्तित्वरूपसाधारणस्य साध्याभाववदवृत्तित्वरूपव्याप्तिज्ञाने, विरुद्धस्य च साध्यसामानाधिकरण्यरूपव्याप्तिग्रहेप्रतिबन्धकत्वेन तयोर्दूषकतावीजस्य पार्थक्येन तयोरपि पार्थक्यमिति भावः ॥ ७२-७३ ॥

असिद्धिं विभजते—

आश्रयासिद्धिराद्या स्यात्स्वरूपासिद्धिरप्यथ ।
व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा ॥ ७५ ॥

आश्रयासिद्धिरित्यादि ॥ ७५ ॥

पक्षासिद्धिर्यत्र पक्षो भवेन्माणिमयो गिरिः ।
ह्रदो द्रव्यं धूमवत्त्वादत्रासिद्धिरथापरा ॥ ७६ ॥

पक्षासिद्धिरिति । आश्रयासिद्धिरित्यर्थः । अपरेति । स्वरूपासिद्धिरित्यर्थः ॥ ७६ ॥

व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत् ।

नीलधूमादिक इति । नीलधूमत्वादिकं गुरुतया न हेतुतावच्छेदकं स्वसमानाधिकरण-व्याप्यतावच्छेदक-धर्मान्तराघटितस्यैव व्याप्यतावच्छेदकत्वात् । धूमप्रागभावत्वसंग्रहाय स्वसमानाधिकरणेति ॥

विरुद्धयोः परामर्शे हेत्वोः सत्प्रतिपक्षता ॥ ७७ ॥
(श्रावणत्वादितो नित्ये जन्यत्वहेतुभिः ॥)

विरुद्धयोरिति । कपिसंयोगतदभावव्याप्यवत्तापरामर्शेऽपि न सत्प्रतिपक्षितत्वमत उक्तं-विरुद्धयोरिति । तथाच (१) स्वसाध्यविरुद्धसाध्याभावव्याप्यवत्तापरामर्शकालीनसाध्यव्याप्यवत्तापरामर्शविषय इत्यर्थः ॥ ७७ ॥

साध्यशून्यो यत्र पक्षस्तत्रासौ चाध उदाहृतः ।
उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते ॥ ७८ ॥

साध्यशून्य इति । पक्षः—पक्षतावच्छेदकविशिष्ट इत्यर्थः । तेन घटे गन्धसत्त्वेऽपि न क्षतिः । एवं मूलावच्छिन्नो वृत्तिः कपिसंयोगोत्यत्रापि बोध्यम् ॥७८॥

इति श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचितायां
सिद्धान्तमुक्तावल्यामनुमानखण्डम् ॥

मुक्तावलीमयूखः ।

स्वसमानाधिकरणेति । स्वं नीलधूमत्वं तत्समानाधिकरणं प्रकृतसाध्यव्याप्यतावच्छेदकधर्मान्तरं धूमत्वं तद्घटितत्वं नीलधूमत्वस्येति न तस्य व्याप्यतावच्छेदकत्वमिति भावः । धूमत्वे धूमप्रागभावत्वसमानाधिकरण्याभावात् प्रकृतसाध्यव्याप्यतावच्छेदकधूमत्वघटितत्वेऽपि न व्याप्यतावच्छेदकत्वहानिर्धूमप्रागभावत्वस्येति बोध्यम् ॥ ७८ ॥

इति सूर्यनारायणशुक्लविरचिते मुक्तावलीमयूखेऽनुमानखण्डः सम्पूर्णः ।

---

(१) स्वसत्प्रतिपक्षत्वेनाभिमतो हेतुः तत्साध्यविरुद्धो यः साध्याभावस्तद्व्याप्यवत्तेति परामर्शकाले साध्यव्याप्यवत्तेतिपरामर्शविषयो हेतुः सत्प्रतिपक्षितः ।

इति नव्यव्याकरणसाहित्याचार्य श्रीरामगोविन्दशुक्लविरचितानुमानखण्डटिप्पणी समाप्ता ।

उपमितिं व्युत्पादयति—

ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम् ।
सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम् ॥ ७९ ॥
वाक्यर्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते ।
गवयादिपदानां तु शक्तिधीरुपमाफलम् ॥ ८० ॥

ग्रामीणस्येति। यत्रारण्यकेन केनचिद् ग्रामीणं प्रत्युक्तं 'गोसदृशो गवयपदवाच्य' इति। पश्चाच्च ग्रामीणेन क्वचिदरण्यादौ गवयो दृष्टस्तत्र गोसादृश्यदर्शनं यज्जातं तदुपमितिकरणम्। तदनन्तरं 'गोसदृशो गवयपदवाच्य' इत्यतिदेशवाक्यार्थस्मरणं यज्जायते तदेव व्यापारः। तदनन्तरं 'गवयो गवयपदवाच्य' इति ज्ञानं यज्जायते तदुपमितिः। न तु 'अयं गव-

मुक्तावलीसमूहः ।

अवसरसङ्गत्या उपमानं निरूपयितुमाह—उपमितिमिति। प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्त्याऽनन्तरवक्तव्यत्वमवसरः। प्रत्यक्षोपजीवकत्वं हि प्रत्यक्षनिरूपणानन्तरमनुमानोपमानयोर्निरूपणे सङ्गतिः। तत्र प्रत्यक्षनिरूपणानन्तरमनुमानमुपमानं वा निरूपणीयमिति सन्देहे अनुमानं बहुवादिसम्मतमतोनिरूपनीयाल्पवादिविप्रतिपत्तिकमतः सुगममिति अनुमानं प्राङ्निरूपणीयमिति शिष्यजिज्ञासा जायते सा च अनुमानात् प्रागुपमाननिरूपणे प्रतिबन्धिका, अनुमाननिरूपणे चकृते उपमाननिरूपणप्रतिबन्धिका पूर्वोक्ता शिष्यजिज्ञासा निवृत्ता इति उपमानमवश्यं निरूपणीयमिति अवसरसङ्गतिः।

तदुपमितिकरणमिति। इदमुपलक्षणं वैधर्म्यविशिष्टपिण्डदर्शनं करणं 'जलादिविधर्मगुणवती पृथिवी' इत्यतिदेशवाक्यार्थस्मरणं व्यापारः पृथिवीस्वावच्छेदेन पृथिवीपदवाच्यत्वप्रकारकज्ञानमुपमितिफलमित्यपि बोध्यम्।

गोसादृश्यदर्शनमिति। ननु यदि सादृश्यज्ञानमुपमितिकारणं तदा उपमानस्य प्रत्यक्षोपजीवकत्वं न सम्भवतीति चेत्, सादृश्यदर्शनपदस्य सादृश्यप्रत्यक्षपरत्वेन उपमानस्य प्रत्यक्षोपजीवकत्वात्।

यज्जायते इति। सादृश्यविशिष्टपिण्डदर्शनं 'गोसदृशो गवयपदवाच्य' इत्यतिदेशवाक्यार्थस्मरणे उद्बोधकमिति भावः।

व्यापार इति। अतिदेशवाक्यार्थस्मरणं हि सादृश्यविशिष्टपिण्डप्रत्यक्षजन्यं तादृशप्रत्यक्षजन्योपमितिजनकं चेति भवत्यतिदेशवाक्यार्थस्मरणस्य व्यापारत्वम्।

तदुपमितिरिति। 'गवयो गवयपदवाच्य' इति शक्तिग्रह एवोपमितिरिति भावः।

(१)यत्तु 'गोसदृशो गवयपदवाच्य' इत्यारण्यकवाक्याज्जायमानः शब्दबोध एवोपमितिर्न तु प्रमित्यन्तरमिति उपमानं नाम प्रमाणान्तरं नाङ्गीकर्तुमलमिति तन्न—

उक्तवाक्यार्थघटकगवयपदश्रवणेऽपि तदानीं गवयत्वजातेरप्रत्यक्षतया गवयत्वविशिष्टे शक्तिग्राहकप्रमाणाभावेन गवयपदजन्यगवयत्वावच्छिन्नोपस्थितेरभावेन गवयत्वावच्छिन्न-

१ सांख्यमतमाह—यत्तु—इत्यादिना।

यपदवाच्य' इत्युपमितिः गवयान्तरे शक्तिग्रहाभावप्रसङ्गात् ॥ ७९-८० ॥

इति श्रीविश्वनाथपञ्चाननभट्टाचार्य्यविरचितायां
सिद्धान्तमुक्तावल्यामुपमानखण्डम् ॥

मुक्तावलीमयूखः ।

र्मिकगोपदवाच्यत्वप्रकारकशब्दबोधासम्भवेन तादृशोपमितेः प्रमित्यन्तरत्वस्यावश्यकत्वे-नोपमानस्यापि प्रमाणान्तरत्वावश्यकत्वात् ।

न च तव मतेपि गवयत्वस्य गोसादृश्यस्य च प्रत्यक्षेणोपस्थितौ कथं गवयत्वावच्छे-देनैव गवयपदवाच्यत्वोपमितिर्न गोसादृश्यावच्छेदेनेति वाच्यम् । उपमितेस्तौल्येऽपि ग-वयत्वजात्यपेक्षया गोसादृश्ये गौरवज्ञानेन तदवच्छेदेन गवयपदवाच्यत्वप्रकारकोपमितेरनु-दयादित्यलमप्रस्तुतानल्पजल्पनेनेति !

ननु नोपमानं प्रमाणान्तरं प्रत्यक्षादिप्रमितिविजातीयप्रमितिकरणत्वाभावात् उप-मितेः प्रत्यक्षादिविजातीयत्वेमानाभावादिति चेन्न—

चक्षुरादिव्यापारविगमेऽप्युपमितेरुत्पादेन तस्याश्चाक्षुषत्वासम्भवः मानसोत्तरमुत्प-द्यमानाया उपमिनोमीति प्रतीतेर्विषयत्वाच्च मानसत्वम् । अत एव उपमित्यनन्तरं सा-क्षात्करोमीति अनुव्यवसायाभावः उपमिनोमीति अनुव्यवसायश्च एतेनाप्युपमितेः प्रत्यक्ष-त्वायोगः । व्याप्तिज्ञानमन्तरापि उदयाच्चानुमितित्वम् । 'नापि शाब्दत्वं पदज्ञानाजन्यत्वा-त् । नापि स्मृतित्वमननुभूतार्थस्य स्मरणायोगादिति उपमितेः प्रमित्यन्तरत्वेन तत्करण-तयोपमानस्य प्रमाणान्तरत्वसम्भवादिति शिवम् ॥ ७९-८० ॥

इति न्यायव्याकरणाचार्य श्रीसूर्यनारायणशुक्लविरचिते मुक्तावलीमयूखे
उपमानखण्डः सम्पूर्णः ।

श्रीगणेशाय नमः ।

मयूखसहितमुक्तावलीसमेता

कारिकावली

शब्दखण्डः ।

न्यायसिद्धान्तमुक्तावली ।

शाब्दबोधप्रकारं दर्शयति—

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥ ८१ ॥

पदज्ञानं त्विति । न तु श्रूयमाणं पदं करणं, पदाभावेऽपि मौनिदत्तोकादौ शाब्दबोधात् ॥

पदार्थधीरिति । पदजन्यपदार्थस्मरणं व्यापारः । अन्यथा पदज्ञानवतः प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबोधापत्तेः ।

तत्रापि वृत्त्या पदजन्यत्वं बोध्यम् । अन्यथा घटादिपदात्समवायसम्बन्धेनाऽऽकाशस्मरणे जाते आकाशस्यापि शाब्दबोधापत्तेः ।

वृत्तिश्च शक्तिलक्षणान्यतरः सम्बन्धः । अत्रैव शक्तिज्ञानस्योपयोगः । शक्तिग्रहाभावे पदज्ञानेऽपि तत्सम्बन्धेन स्मरणानुपपत्तेः । पदज्ञानस्य हि एकसम्बन्धिज्ञानविधयार्थस्मारकत्वम् ।

शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः । स चास्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपः । आधुनिके नाम्नि शक्तिरस्त्येव-'एकादशेऽहनि पिता नाम कुर्यात्' इतीश्वरेच्छायाः सत्त्वात् । आधुनिकसङ्केतिते तु न शक्तिरिति सम्प्रदायः ।

मुक्तावलीमयूखः ।

व्यापार इति । पदार्थस्मरणं हि पदज्ञानजन्यं पदज्ञानजन्यशाब्दबोधजनकं चेति भवति तस्य व्यापारत्वमिति भावः ।

आकाशस्मरणे इति । एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति रीत्येत्यादिः । अत्रैवेति । पदजन्यपदार्थोपस्थितावेवेत्यर्थः ।

अस्माच्छब्दादयमर्थो बोद्धव्य इति । इदंपदोत्तरषष्ठ्या अभेदोर्थः, शब्दपदोत्तरषष्ठ्या जन्यत्वमर्थः, बुधधात्वर्थो ज्ञानम् , तव्यप्रत्ययार्थः विषयताश्रयः । तत्र इदं पदार्थस्य षष्ठ्यर्थभेदे प्रतियोगित्वसम्बन्धेन, तस्य च षष्ठ्यर्थाभावे प्रतियोगित्वसम्ब-

नव्यास्तु ईश्वरेच्छा न शक्तिः किन्त्विच्छैव तेनाधुनिकसङ्केतितेऽपि शक्तितरस्यैवेत्याहुः ।

शक्तिग्रहस्तु व्याकरणादितः । तथाहि—

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सांनिध्यतः सिद्धपदस्य वृद्धाः ॥

धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति । क्वचित्सति बाधके त्यज्यते । यथा चैयाकरणैराख्यातस्य कर्तरि शक्तिरुच्यते । चैत्रः पचतीत्यादौ कर्त्रा सह चैत्रस्याभेदान्वयः । तच्च गौरवात्यज्यते । किन्तु कृतौ शक्तिग्रहो लाघवात् । कृतिश्चैत्रादौ प्रकारीभूय भासते ।

मुक्तावलीमयूखः ।

न्धेन, अभावस्य च स्वरूपसम्बन्धेन शब्दपदार्थे, तस्य च पञ्चम्यर्थजन्यत्वसम्बन्धेन बोधे, तस्य निरूपितत्वसम्बन्धेन विषयतायाम्, तस्याश्च स्वरूपेण आश्रये, तस्याभेदेन अर्थे अन्वयः । एवं च एतद्भिन्नशब्दनिष्ठजनकतानिरूपितजन्यतावद्बोधविषयीभूताभिन्नः एतद्भिन्नोऽर्थ इति बोध इति पदप्रकारिका अर्थविशेष्यिका इयमिच्छा ।

नन्वीश्वरेच्छाया नित्यत्वादेकत्वाच्च 'घटपदाद्घटो बोद्धव्यः' 'पटपदात्पटो बोद्धव्य' इति समूहालम्बनात्मकेश्वरेच्छाविषयतायाः पटेऽपि सत्त्वेन पटस्य घटपदवाच्यत्वापत्तिः ए ' गङ्गापदजन्यबोधविषयत्वप्रकारकेश्वरेच्छाधास्तीरेऽपि सत्त्वाच्छक्त्यैव तीरबोधे लक्षणाया उच्छेदापत्तिश्चेति चेत्—

तत्पदजन्यबोधविषयतावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन ईश्वरेच्छैव तत्पदशक्तिरिति स्वीकारेण 'तीरं बोधविषयो भवतु' 'बोधश्च गङ्गापदजन्यो भवतु' इति विभङ्गेश्वरेच्छाया लक्षणास्थले स्वीकारेण तीरनिष्ठविशेष्यतायां बोधविषयतावच्छिन्नप्रकारतानिरूपितत्वेऽपि गङ्गापदजन्यबोधविषयतावच्छिन्नप्रकारतानिरूपितत्वाभावान्न तादृशसम्बन्धेनेश्वरेच्छावत्त्वं तीरस्येति न लक्षणोच्छेदः 'घटो घटपदाद्बोद्धव्यः' "पटः पटपदाद्बोद्धव्य' ईदृश्या ईश्वरेच्छाया शक्तिस्थले स्वीकारेण .घटपदजन्यबोधविषयतावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेनेश्वरेच्छाया घटे एव सत्त्वेन पटे न घटपदवाच्यत्वव्यवहार इत्याशयात् ।

ननु आधुनिकपाणिन्यादिसङ्केतितनदीवृद्ध्यादिपदाद्बोधो न स्यादीश्वरेच्छारूपशक्तेरभावादित्यत्वरसादाह नव्यास्त्विति ।

अपभ्रंशगण्यर्थादिपदाद्बोधस्तु उभयमतेऽपि शक्तिभ्रमादेवेति मन्तव्यम् ।

व्याकरणादिति । भूसत्तायां, वर्तमानेलडित्यादिव्याकरणादित्यर्थः ।

चैयाकरणैरिति । फलव्यापारौ धात्वर्थः । कर्तृप्रत्यये कर्ता, कर्मप्रत्यये कर्म, प्रत्ययार्थः, । कालसंख्ये चोभयत्र प्रत्ययार्थः । तत्र देवदत्तादेरभेदेन एकत्वस्य च स्वरूपसम्बन्धेन प्रत्ययार्थ आश्रयेऽन्वयः तस्य कालस्य च वृत्तित्वसम्बन्धेन व्यापारे कर्मणश्च वृत्तित्वसम्बन्धेन फलेऽन्वयः । फलस्य च अनुकूलत्वसम्बन्धेन व्यापारेऽन्वयः ।

एवं च देवदत्ततण्डुलं पचतीत्यत्र देवदत्तानिष्ठैकत्वावच्छिन्नाश्रयवृत्ति तण्डुलनिष्ठ-

न च कर्तुरनभिधानाच्चैत्रादिपदानन्तरं तृतीया स्यादिति वाच्यम्, कर्तृसंख्यानभिधानस्य तत्र तन्त्रत्वात्।

संख्याभिधानयोग्यश्च कर्मत्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यः। कर्मत्वादीत्यस्येतरविशेषणत्वतात्पर्याविषयत्वमर्थः तेन चैत्र इव मैत्रो गच्छतीत्यादौ न चैत्रे संख्यान्वयः। यत्र कर्मादौ न विशेषणत्वे तात्पर्यं तद्वारणाय प्रथमान्तेति।

मुक्तावलीमयूखः।

विक्लित्यनुकूलो वर्तमानकालिको व्यापार इति बोधः, देवदत्तेन तण्डुलः पच्यते इत्यत्र देवदत्ताभिन्नकर्तृवृत्तिवर्तमानकालिकव्यापारजन्यतण्डुलाभिन्नैकत्वावच्छिन्नाश्रयवृत्तिर्विक्लित्तिरिति बोधः इति वैयाकरणाः।

कर्तरि कर्मणि च लस्य शक्तिस्वीकारे कर्तृत्वं कृतिमत्त्वं तच्च कृतिः कर्मत्वं फलवत्त्वं तच्च फलमेव शक्यतावच्छेदकं कृतौ फले च शक्तिस्वीकारे शक्यतावच्छेदकलाघवमतो नैयायिकैः कृतौ कर्मणि च शक्तिरुपयत इति। एतन्मते च देवदत्तस्तण्डुलं पचतीत्यत्र तण्डुलवृत्तिविक्लित्यनुकूलव्यापारानुकूलवर्तमानकालिककृतिमानेकत्वावच्छिन्नोदेवदत्त इति बोधः, देवदत्तेन तण्डुलः पच्यते इत्यत्र च देवदत्तवृत्तिकृतिजन्यव्यापारजन्यविक्लित्याश्रय एकत्वावच्छिन्नस्तण्डुल इति बोधः।

तत्र—तृतीयायाम्।

तन्त्रत्वादिति। प्रयोजकत्वादित्यर्थः। अयम्भावः अनभिहिते इत्यस्य कर्तृकरणयोस्तृतीये त्येतदेकवाक्यतापन्नद्व्येकयोर्द्विवचनैकवचने इति संख्यावाक्येनान्वयात्। कर्तृगतैकत्वेऽनभिहिते तृतीयैकवचनम्। एवं कर्मगतैकत्वेऽनभिहिते, द्वितीयैकवचनमित्यर्थः। न तु अनभिहिते कर्मणि कर्तरि वेत्यर्थः। एवं च कर्तृशब्दस्यानभिधानस्यैव तृतीयाप्रयोजकत्वमिति।

कर्मत्वाद्यनवरुद्ध इति। 'चैत्रः पचति तण्डुल' इत्यत्र कर्मत्वादिलाक्षणिकप्रथमान्तपदोपस्थाप्ये तण्डुलादौ संख्यान्वयवारणाय कर्मत्वाद्यनवरुद्ध इति दलम्।

ननु चैत्र इव मैत्रो गच्छतीत्यत्र चैत्रस्य इवार्थसादृश्ये प्रतियोगितासम्बन्धेन सादृश्यस्य च अनुयोगितासम्बन्धेन मैत्रेऽन्वयात् 'संयोगानुकूलव्यापारानुकूलकृतिमान् चैत्रसदृशो मैत्र' इति बोधस्तत्र तिबर्थैकत्वस्य चैत्रेऽन्वयः चैत्रस्य कर्मत्वानवरुद्धत्वात्प्रथमान्तपदोपस्थाप्यत्वाच्च। किं च पक्कमन्नं भुज्यते इत्यत्र पाककर्मत्वस्यान्नेऽन्वयेन प्रथमान्तपदोपस्थाप्यत्वेऽपि कर्मत्वावरुद्धत्वात् अन्ने संख्यानन्वयापत्तिरतः कर्मत्वाद्यनवरुद्ध इत्यस्यार्थमाह—इतरविशेषणत्वतात्पर्याविषयत्वमिति। चैत्र इव मैत्रो गच्छतीत्यत्र चैत्रस्य इवार्थविशेषणत्वेन तात्पर्यविषयत्वान्न तत्र संख्यान्वयः पक्कमन्नं भुज्यते इत्यत्र अन्नस्य इतरविशेषणत्वेन तात्पर्यविषयत्वाभावात्संख्यान्वय इति भावः विशेषणत्वतात्पर्याविषयत्वमित्येव सिद्धे इतरपदं व्यर्थमिति ध्येयम्।

ननु चैत्र एव पचतीत्यत्र 'चैत्रेतरावृत्तिपाककृतिमान् चैत्र' इति बोधात् चैत्रस्य विशेषणत्वेन तात्पर्यविषयत्वात् संख्यानन्वयापत्तिः। किं च चैत्रश्चैत्रम्पश्यतीत्यत्र चैत्रे संख्या-

यद्वा धात्वर्थातिरिक्तविशेषणत्वं प्रथमदलार्थः। तेन चैत्र इव मैत्रो गच्छतीत्यत्र चैत्रादेर्वारणम्। स्तोकं पचतीत्यादौ स्तोकादेर्वारणाय च द्वितीयदलम्। तस्य द्वितीयान्तपदोपस्थाप्यत्वाद्वारणमिति।

एवं व्यापारेऽपि न शक्तिर्गौरवात्। रथो गच्छतीत्यादौ तु व्यापारे आश्रयत्वे वा लक्षणा। जानातीत्यादौ आश्रयत्वे नश्यतीत्यादौ प्रतियोगित्वे निरूढलक्षणा।

उपमानाद्यथा शक्तिग्रहस्तथोक्तम्।

एवं कोशादपि शक्तिग्रहः। सति बाधके क्वचित्त्यज्यते। यथा नीलादिपदानां नीलरूपादौ नीलादिविशिष्टे च शक्तिः कोशेन व्युत्पादिता तथापि लाघवान्नीलादावेव शक्तिः। नीलादिविशिष्टे तु लक्षणेति।

एवमाप्तवाक्यादपि। यथा 'कोकिलः पिकपदवाच्य' इत्यादिशब्दात्पिकादिपदानां कोकिले शक्तिग्रहः।

एवं व्यवहारादपि। यथा प्रयोजकवृद्धेन घटमानयेत्युक्तम्, तच्छ्रुत्वा प्रयोज्यवृद्धेन घट आनीतः तदवधार्य पार्श्वस्थो बालो घटानयनरूपं कार्यं

मुक्तावलीमयूखः।

नन्वयापत्तिः 'चैत्रवृत्तिचक्षुः संयोगजन्यज्ञानाश्रयश्चैत्र' इति बोधे चैत्रस्य विशेषणत्वेन तात्पर्यविषयत्वादिति चेत्—

इतरविशेषणत्वमात्रेण तात्पर्याविषयत्वमित्यर्थात्। एवं च प्रकृते चैत्रे विशेष्यत्वस्यापि सत्त्वेन विशेषणत्वमुख्यविशेष्यत्वाभ्यां तात्पर्यविषयत्वात्। विशेषणत्वमात्रेण तात्पर्याविषयत्वात्संख्यान्वये बाधकाभावात्। एवं च तण्डुलं पचतीत्यादौ यत्र विशेषणत्वमुख्यविशेष्यत्वाभ्यां तण्डुलस्यैवान्वयो विवक्षितस्तत्र तण्डुले संख्यान्वयवारणाय प्रथमान्तेति दलम्। किं च चैत्रेण सुप्यत इत्यत्र धात्वर्थस्वापे संख्यान्वयवारणाय प्रथमान्तेति दलम्।

द्वितीयदलस्य प्रकारान्तरेण प्रयोजनं वक्तुमन्यथा प्रथमदलार्थमाह यद्वेति।

फलं धात्वर्थो व्यापारः प्रत्ययार्थ इति मीमांसकैकदेशिमण्डनमतं खण्डयितुमाह— एवं व्यापारेऽपीति।

गौरवादिति। व्यापारसमूहरूपक्रियाया वाच्यत्वे गौरवं कृतित्वापेक्षयेति भावः।

नन्वाख्यातस्य यत्नार्थकत्वं न सम्भवति रथोगच्छतीत्यत्र व्यभिचारादत आह— रथो गच्छतीति। व्यापारे लक्षणाभ्युपगमे 'संयोगानुकूलव्यापारवान् एकत्वान्विक्षो रथः' इति बोधः। यदि तु रथोगच्छतीत्यत्र गमनानुकूलव्यापारस्य न बोधः किन्तु गमनानुकूलाश्रयत्वस्यैवेति नवीनमतमाश्रित्य आश्रयत्वे लक्षणा तदा 'संयोगानुकूलव्यापाराश्रयतावान्' इति बोधः। कृते रथेऽन्वयानुपपत्तिरिह लक्षणा बीजम्।

कोशेनेति। 'गुणे शुक्लादयः पुंसि गुणि लिङ्गास्तु तद्वती'ति कोशेनोभयत्र शक्तिबोधनादिति भावः।

नीलादावेव शक्तिरिति। नीले शक्तौ नीलत्वं शक्यतावच्छेदकमिति लाघवम्, नीलवति शक्तौ नीलवत्वं शक्यतावच्छेदकं तत्र नील एवेति गौरवमिति भावः।

मानयेति शब्दप्रयोज्यमित्यवधार्यति। ततश्च घटं नय गामानयेत्यादिवाक्यादावापोद्धाराभ्यां घटादिपदानां कार्यान्वितघटादौ शक्तिं गृह्णाति। एवं च भूतले नीलो घट इत्यादिवाक्यान्न शाब्दबोधः। घटादिपदानां कार्यान्वितघटादिबोधे सामर्थ्यावधारणात् कार्यतायाश्च प्रति च लिङादीनां सामर्थ्याच्चदभावान्न शाब्दबोध इति केचित्।

तन्न; प्रथमतः कार्यान्वितघटादौ शक्त्यवधारणेऽपि लाघवेन पश्चात्तस्य परित्यागौचित्यात्। अत एव-चैत्र पुत्रस्ते जातः, कन्या ते गर्भिणी जाता-इत्यादौ मुखप्रसादमुखमालिन्याभ्यां सुखदुःखे अनुमाय तत्कारणत्वेन परिशेषाच्छाब्दबोधं निर्णीय तद्धेतुतया तं शब्दमवधारयति। तथाच व्यभिचारात्कार्यान्विते न शक्तिः। न च तत्र तं पश्येत्यादि शब्दान्तरमध्याहार्यं, मानाभावात्। चैत्र! पुत्रस्ते जातो मृतश्चेत्यादौ तदभावाच्च। एवञ्च लाघवान्वितघटेऽपि शक्तिं स्वीकृत्य घटपदस्य घटमात्रे शक्तिमवधारयति।

एवं वाक्यशेषादपि शक्तिग्रहः। यथा यवमयश्चरुर्भवतीत्यत्र यवपदस्य दीर्घशूकविशेषे आर्याणां प्रयोगः (१)कङ्कौ च म्लेच्छानाम्। तत्र हि 'यदान्या ओषधयो म्लायन्तेऽथैते मोदमानास्तिष्ठन्ति'।

वसन्ते सर्वसस्यानां जायते पक्वजातनम्।
मोदमानाश्च तिष्ठन्ति यवाः (२)कणिशशालिनः॥

इति वाक्यशेषाद्दीर्घशूके शक्तिर्निर्णीयते, कङ्कौ तु शक्तिग्रहात्प्रयोगो नानाशक्तिकल्पने गौरवात्। म्लायादिपदे तु विनिगमकाभावान्नानाशक्तिकल्पनम्।

एवं विवरणादपि शक्तिग्रहः। विवरणं तु तत्समानार्थकपदान्तरेण तदर्थकथनम्। यथा घटोऽस्तीत्यस्य कलशोऽस्तीत्यनेन विवरणाद्घटपदं कलशे शक्तिग्रहः। एवं पचतीत्यस्य पाकं करोतीत्यनेन विवरणादाख्यातस्य धात्वर्थकत्वं कल्प्यते।

मुक्तावलीमयूखः।

आवापोद्धाराभ्यामिति। आवापः कस्यचित्पदस्य प्रक्षेपः। उद्धारः कस्यचित्पदस्य निस्सारणम्।

सुखदुःखे इति। देवदत्तः सुखी मुखप्रसादवत्त्वात्, देवदत्तो दुःखी मुखमालिन्यवत्त्वात्, इत्यनुमानम्।

शाब्दबोधमिति। देवदत्तगतिं दुःखं सुखं वा शाब्दबोधजन्यं शाब्दबोधेतरकारणजन्यत्वे सति कार्यजन्यत्वादिति अनुमानाद्वा।

तद्धेतुतयेति। दुःखकारणीभूतः शाब्दबोधः प्रकृतवाक्यजन्यः अन्यपदविशिष्टपदत्वे सति प्रकृतवाक्यानन्तरभावित्वादिति।

यवमय इति। तदुक्तं न्यायमालाविस्तरे—

---

(१) कङ्कादिति-काकुना इति भावात्। (२) कणिशेति कीदृशा इत्यर्थः।

एवं प्रसिद्धपदस्य सान्निध्यादपि शक्तिग्रहः। यथा इह सहकारतरौ मधुरं पिको रौतीत्यादौ पिकपदस्य कोकिले शक्तिग्रह इति।

तत्र जातावेव शक्तिर्न तु व्यक्तौ-व्यभिचारादानन्त्याच्च। व्यक्तिं विना जातिभानस्यासम्भवाद्व्यक्तेरपि भानमिति केचित्। तन्न शक्तिं विना व्यक्तिभानानुपपत्तेः। न च व्यक्तौ लक्षणा, अनुपपत्तिप्रतिसन्धानं विनापि व्यक्तिबोधात्। न च व्यक्तिशक्तावानन्त्यम्, सकलव्यक्तावेकस्या एव शक्तेः स्वीकारात्। न चानुगमः, गोत्वादेरेवानुगमकत्वात्। किञ्च गौः शक्येति शक्तिग्रहो यदि तदा व्यक्तौ शक्तिः। यदि तु गोत्वं शक्यमिति श-

---

मुक्तावलीमयूखः।

यवादिशब्दाः किंद्वपर्याः, नोवार्यस्लेच्छसाम्यतः। दीर्घशूकप्रियंग्वाद्या, द्वयेप्यर्था विकल्पिताः यत्रान्या इति शास्त्रस्था, प्रसिद्धिस्तु बलीयसी। शास्त्रीयधर्मे तेनात्र, प्रियंग्वादिर्न गृह्यते॥

मीमांसकमतमाह—तत्र जातावितिं। जातिविशिष्टव्यक्तौ शक्तिस्वीकारे 'नागृहीतविशेषणा बुद्धिर्विशेष्यमधिगच्छति' इति न्यायाज्जातौ शक्तिग्रहस्यावश्यकतया जातावेव शक्तिर्लाघवात् न तु जातिविशिष्टव्यक्तौ तदुक्तं 'विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे' इति तेषामभिप्रायः।

ननु व्यक्तावेव शक्तिरस्तु। न जावितियत आह—न तु व्यक्ताविति। अयं भावः—व्यक्तिशक्तिपक्षे एकस्यां व्यक्तौ शक्तिरस्ति सर्वासु वा नाद्यः अगृहीतशक्तिकव्यक्तावपि विषयता सम्बन्धेन शाब्दबोधरूपकार्यस्य सत्त्वेन शक्तिग्रहरूपकारणस्याभावेन व्यतिरेकव्यभिचारात्। न द्वितीयः व्यक्तिभेदेन शक्तिभेदात् शक्यानन्त्यप्रसङ्गादिति जातिशक्तिपक्षे तु न व्यभिचारो न वा शक्त्यानन्त्यमिति।

जातिभानस्यासम्भवादिति। कुतो न सम्भव इति चेदुच्यते; व्यक्तिविशेष्यकजातिप्रकारकशाब्दबोधे जातिविषयकशक्तिज्ञानस्य हेतुता तेन जातिभानासम्भव इति।

व्यक्तिभानानुपपत्तेरिति। वृत्त्या पदजन्यपदार्थोपस्थितेः शाब्दबोधे हेतुतया व्यक्तौ शक्तिं विना व्यक्तेर्भानं न स्यादिति भावः। लक्षणेति तावतैव वृत्तिप्रयोज्यपदार्थोपस्थितेः सत्त्वेन व्यक्तिबोधसम्भवादिति भावः।

अनुपपत्तिप्रतिसन्धानमिति। गामानयेत्यादौ गोत्वे आनयनान्वयानुपपत्त्या गोपदस्य गोव्यक्तौ लक्षणासम्भवेऽपि गौरस्तीत्यत्र गोत्वेऽस्तित्वान्वयेऽनुपपत्त्यभावेन अन्वयानुपपत्तिरुपलक्षणाबीजस्यासत्त्वेन न लक्षणासम्भव इति भावः। मीमांसकाः हि अन्वयानुपपत्तिमेव लक्षणाबीजं वदन्ति न तात्पर्यानुपपत्तिं, तन्मते वेदस्यापौरुषेयतया इच्छाकृतात्पर्यस्याभावेन 'आदित्यो यूपः' इत्यत्र तात्पर्यानुपपत्त्यभावेन लक्षणाभावप्रसङ्गात्।

व्यक्तौ शक्तिरिति। गौः शक्येति विशिष्टज्ञानं प्रमात्मकमेव तव (प्रभाकरस्य) मतेऽन्यथाख्यात्यभावात् प्रमायाश्च वस्तुसाधकत्वादिति भावः।

ननु शक्तिं विनापि व्यक्तिभानं भविष्यति सर्वत्र पदजन्यपदार्थोपस्थितेः हेतुत्वे मानाभावात् कथमन्यथा शाब्दबोधे संसर्गभानम्। नचैवं पदानुपस्थितघटादेरपि शाब्दबोधे

किंग्रहस्तदा गोत्वप्रकारकपदार्थस्मरणं शाब्दबोधश्च न स्यात् समानप्रकारकत्वेन शक्तिज्ञानस्य पदार्थस्मरणं शाब्दबोधं प्रति च हेतुत्वात्। किञ्च गोत्वे यदि शक्तिस्तदा गोत्वत्वं शक्यतावच्छेदकं वाच्यम्, गोत्वत्वं तु गवेतरासमवेतत्वे सति सकलगोसमवेतत्वम्, तथाच गोव्यक्तीनां शक्यतावच्छेदकेऽनुप्रवेशात्तत्रैव गौरत्वम्। तस्मात्तत्तज्जात्याकृतिविशिष्टतत्तद्व्यक्तिबोधानुपपत्त्या कल्प्यमाना शक्तिर्जात्याकृतिविशिष्टव्यक्तौ विश्राम्यतीति।

शक्तं पदम्, तच्चतुर्विधम्-क्वचिद्यौगिकं, क्वचिद्रूढं, क्वचिद्योगरूढं, क्वचिद्यौगिकरूढम्, तथाहि—

यत्रावयवार्थ एव बुध्यते तद्यौगिकम्, यथा पाचकादिपदम्।

मुक्तावलीमयूखः।

भानापत्तिरिति वाच्यम्। गोविशेष्यकगोत्वप्रकारकशाब्दबोधं प्रति गोत्वशक्तिज्ञानत्वेन हेतुत्वस्याङ्गीकारेणादोषादित्यपरितोषादाह किञ्चेति।

समानप्रकारकत्वेनेति। गोत्वप्रकारकपदार्थस्मरणं, गोत्वप्रकारकशाब्दबोधं च प्रति गोत्वप्रकारकशक्तिज्ञानस्य हेतुत्वादिति भावः।

अत एवापूर्वत्वादेऽपूर्वस्य पूर्वमनुपस्थितत्वात् कथं तत्र शक्तिग्रह इत्याशङ्क्य कार्यत्वेन घटादिषु शक्तिग्रहात् कार्यतया शाब्दबोधेऽपूर्वभानमित्युक्तम्।

* ननु कार्यत्वाद्युपाधिप्रकारकशाब्दबोधस्थले समानप्रकारकशक्तिज्ञानस्य हेतुत्वेऽपि जातिप्रकारकशाब्दबोधस्थले समानप्रकारकशक्तिज्ञानस्य न हेतुतेति नायं दोष इत्यरुचेराह किं चेति।

तच्छब्दस्य वक्तृबुद्धिविषयतावच्छेदकीभूतघटत्वाद्यवच्छिन्ने शक्तिः।

ननु तत्पदे घटत्वादिनां शक्यतावच्छेदकत्वे शक्यतावच्छेदकभेदाच्छक्तिभेदापत्तिः न च शक्यतावच्छेदकानां भिन्नत्वेऽपि शक्यतावच्छेदकतावच्छेदकस्य बुद्धिविषयतावच्छेदकस्यैक्यान्न शक्तिभेद इति वाच्यम् तस्य शक्यतावच्छेदकतावच्छेदकत्वे शाब्दबोधे तद्भानापत्तेरिति चेन्न-बुद्धिविषयतावच्छेदकत्वस्योपलक्षणतया शक्यतानवच्छेदकत्वात् उपलक्षणस्य शाब्दबोधे भानानङ्गीकारात्।

विशेषणत्वं च तत्पदजन्यबोधविषयत्वेन शक्तिविषयत्वम्।

उपलक्षणत्वं च तत्पदजन्यबोधविषयत्वेन शक्त्यविषयत्वमिति।

इदमः प्रत्यक्षगतं समीपतरवर्ति चैतदोरूपम्। अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्॥

इत्यभियुक्तोक्तेः—इदमः प्रत्यक्षबुद्धिविषये शक्तिः।

एतदः समीपतरप्रत्यक्षबुद्धिविषये शक्तिः। अदसः विप्रकृष्टप्रत्यक्षविषये शक्तिः।

तदः परोक्षबुद्धिविषये शक्तिः। किंपदस्य जिज्ञासाविषयत्वविशिष्टे शक्तिः।

सर्वपदस्य व्यापकत्वविशिष्टे शक्तिः 'सर्वे घटा रूपवन्तः' इत्यत्र घटत्वव्यापकं रूपवत्त्वमिति बोधात्।

क्वचिदिति। किंचिदित्यर्थः एवमग्रेऽपि।

यत्रावयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेण बुध्यते तद्रूढम्, यथा गोमण्डलादिपदम् ।

यत्र तु अवयवशक्तिविषये समुदायशक्तिरप्यस्ति तद्योगरूढम्, यथा पङ्कजादिपदम् । तथाहि—पङ्कजपदमवयवशक्त्या पङ्कजनिकर्तृरूपमर्थं बोधयति, समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बाधयति । न च केवलयाऽवयवशक्त्या कुमुदे प्रयोगः स्यादिति वाच्यम्, रूढिज्ञानस्य केवलयौगिकार्थज्ञाने प्रतिबन्धकत्वादिति प्राञ्चः ।

वस्तुतस्तु समुदायशक्त्युपस्थितपद्मेऽवयवार्थपङ्कजनिकर्तुरन्वयो भवति सानिध्यात् ।

यत्र तु रूढ्यर्थस्य बाधः प्रतिसन्धीयते तत्र लक्षणया कुमुदादेर्बोधः । यत्र तु कुमुदत्वेन रूपेण बोधे न तात्पर्यज्ञानं पद्मत्वस्य च बाधस्तत्रावयवशक्तिमात्रेण निर्वाह इत्यप्याहुः ।

यत्र तु स्थलपद्मादाववयवार्थबाधस्तत्र समुदायशक्त्या पद्मत्वेन रूपेण बोधः । यदि तु स्थलपङ्कजं विजातीयमेव तदा लक्षणयैवेति ।

यत्र तु यौगिकार्थरूढ्यर्थयोः स्वातन्त्र्येण बोधस्तद्यौगिकरूढम् यथोद्भिदादिपदम् । तत्र हि उद्भेदनकर्ता तरुगुल्मादिरपि बुध्यते यागविशेषोऽपीति ॥ ८१ ॥

मुक्तावलीमयूखः ।

पद्मं बोधयतीति । पङ्कजनिकर्त्रभिन्नं पद्ममिति बोधः ।

प्रतिबन्धकत्वादिति । न च रूढिज्ञानस्य यौगिकार्थबुद्धिं प्रति प्रतिबन्धकत्वे पङ्कजशब्दात्पद्ममित्येव बोधः स्याच्च तु पङ्कजनिकर्त्रभिन्नं पद्ममिति वाच्यम् । पद्मत्वावच्छिन्नविशेष्यत्वानिरूपितपङ्कजनिकर्तृत्वावच्छिन्नविषयताकशाब्दबुद्धित्वावच्छिन्नं प्रति रूढिज्ञानस्य प्रतिबन्धकत्वेन पद्मविशेष्यकयौगिकार्थबुद्धेः प्रतिबध्यतावच्छेदकानाक्रान्तत्वेनादोषात् तदेतदाह—केवलयौगिकार्थज्ञाने इति । एवं प्रतिबध्यप्रतिबन्धकभावस्वीकारे विरोधविशेष्यकज्ञानस्य प्रतिबन्धकत्वं जनकज्ञानविषयकत्वेनैवेति नियमभङ्गरूपोऽत्वरसः प्राच इत्यनेन सूचितः ।

मणिकारमतमाह वस्तुतस्त्विति ।

स्वातन्त्र्येणेति । विशेष्यविशेषणभावानवगाहित्वेनेत्यर्थः ।

लक्षणयैवेति । रूढ्यर्थतावच्छेदकपद्मत्वजातेस्तत्राभानेन रूढ्या तद्बोधनासम्भवादिति भावः ।

शक्तिमात्रेणेति । मात्रपदेन लक्षणानादरः सूचितः ।

यागविशेषोऽपीति । 'उद्भिदा यजेत पशुकामः' इत्यत्र उद्भिच्छब्दो यागविशेषनामधेयम् । तथाच न्यायमाला—

गुणोऽयं नामधेयं वा, खनित्रेऽस्य निदर्शितः ।
ज्योतिष्टोमं समाश्रित्य, पश्वर्थं गुणचोदना ॥

लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः।

लक्षणेति। गङ्गायां घोष इत्यादौ गङ्गापदस्य शक्यार्थे प्रवाहरूपे घोषस्यान्वयानुपपत्तिस्तात्पर्यानुपपत्तिर्वा यत्र प्रतिसन्धीयते तत्र लक्षणया तीरस्य बोध इति।

सा च शक्यसम्बन्धरूपा। तथाहि—प्रवाहरूपशक्यार्थसम्बन्धस्य तीरे गृहीतत्वात्तीरस्य स्मरणम्। ततः शाब्दबोधः।

परन्तु यद्यान्वयानुपपत्तिर्लक्षणाबीजं स्यात्तदा यष्टीः प्रवेशयेत्यत्र लक्षणा न स्यात्-यष्टिषु प्रवेशान्वयस्यानुपपत्तेरभावात्। तेन यष्टिप्रवेशे भोजनतात्पर्यानुपपत्त्या यष्टिधरेषु लक्षणा।

एवं काकेभ्यो दधि रक्ष्यतामित्यादौ काकपदस्य दध्युपघातके लक्षणासर्वतो दधिरक्षायास्तात्पर्यविषयत्वात्।

एवं छत्रिणो यान्तीत्यादौ छत्रिपदस्यैकसार्थवाहित्वे लक्षणा। इयमेवाजहत्स्वार्था लक्षणेत्युच्यते। एकसार्थवाहित्वेन रूपेण छत्रितदन्ययोर्बोधात्।

यदि चान्वयानुपपत्तिर्लक्षणाबीजं स्यात्, तदा क्वचिद्गङ्गापदस्य तीरे, क्वचिद्घोषपदस्य मत्स्यादौ, लक्षणेति नियमो न स्यात्।

इदन्तु बोध्यम्। शक्यार्थसम्बन्धो यदि तीरत्वेन रूपेण गृहीतस्तदा तीरत्वेन तीरबोधः। यदि तु गङ्गातीरत्वेन रूपेण गृहीतस्तदा तेनैव रूपेण स्मरणम्। अत एव लक्ष्यतावच्छेदके न लक्षणा—तत्प्रकारकबोधस्य तत्र लक्षणां विनाप्युपपत्तेः। परन्तु एवं क्रमेण शक्यतावच्छेदकेऽपि शक्तिर्न स्यात्, तत्प्रकारकशक्यार्थस्मरणं प्रति तत्पदस्य सामर्थ्यमित्यस्य सुवचत्वादिति विभावनीयम्।

यत्र तु शक्यार्थस्य परम्परासम्बन्धरूपा लक्षणा सा लक्षितलक्षणेत्युच्यते। यथा द्विरेफादिपदात् रेफद्वयसम्बन्धो भ्रमरपदे ज्ञायते भ्रमरपदस्य च सम्बन्धो भ्रमरे ज्ञायते इति तत्र लक्षितलक्षणा।

किन्तु लाक्षणिकं पदं नानुभावकम्। लाक्षणिकार्थस्य शाब्दबोधे तु

मुक्तावलीमयूखः।

फलोद्भेदात्समानेऽपि, निरुक्तिर्योगनाम्न्यपि।
नामत्वमुचितं याग-सामानाधिकरण्यतः॥ इति॥ ८१॥

प्रतिसन्धीयते इति। प्रतिसंधानं-स्मरणम्।

छत्रिपदस्येति। इदं वाक्यलक्षणावादिमताभिप्रायेण। न्यायमते तु छत्रपदस्यैकसार्थवाहित्वे लक्षणा प्रत्ययार्थश्च सम्बन्धी एकसार्थवन्तौ गच्छन्तीत्यन्वयः। एकसार्थवाहित्वमेकसार्थ एव नत्वेकयार्थगन्तृत्वं निराकाङ्क्षतया यान्तीत्यस्यानन्वयापत्तेः।

एकसार्थवाहित्वे—एकसार्थवाहित्वविशिष्टे।

परम्परासम्बन्धरूपा—स्ववाच्यरेफद्वयघटितपदवाच्यरूपा।

ननु तच्छाब्दबोधे तच्छब्दपदज्ञानत्वेन हेतुत्वाल्लाक्षणिकाच्छब्दाच्छाब्दबोधः कथमित्याह-किन्त्विति। पदान्तरं-समभिव्याहृतं शक्तं पदमित्यर्थः।

पदान्तरं कारणम्-शक्तिलक्षणान्यतरसम्बन्धेनेतरपदार्थान्वितस्वशक्यार्थ-शाब्दबोधं प्रति पदानां सामर्थ्यावधारणात्।

वाक्ये तु शक्तेरभावाच्छक्यसम्बन्धरूपा लक्षणापि नास्ति। यत्र गभीरायां नद्यां घोष इत्युक्तं तत्र नदीपदस्य नदीतीरे लक्षणा। गभीरापदार्थस्य नद्या सहाभेदेनान्वयः। क्वचिदेकदेशान्वयस्यापि स्वीकृतत्वात्।

यदि तत्रैकदेशान्वयो न स्वीक्रियते तदा नदीपदस्य गभीरनदीतीरे लक्षणा गभीरपदं तात्पर्यग्राहकम्।

बहुव्रीहावप्येवम्। तत्र हि चित्रगुपदादौ यदैकदेशान्वयः स्वीक्रियते तदा गोपदस्य गोस्वामिनि लक्षणा गवि चित्राभेदान्वयः। यदि तत्रैकदेशान्वयो न स्वीक्रियते, तदा गोपदस्य चित्रगोस्वामिनि लक्षणा, चित्रपदं तात्पर्यग्राहकम्। एवमारूढवानरो वृक्ष इत्यत्र वानरपदस्य वानरारोहणकर्मणि लक्षणा, आरूढपदं तात्पर्यग्राहकम्। एवमन्यत्रापि बोध्यम्।

तत्पुरुषे तु पूर्वपदे लक्षणा। तथाहि—राजपुरुष इत्यादौ राजपदार्थेन पुरुषपदार्थस्य साक्षात्सम्बन्धयो—निपातातिरिक्तनामार्थयोर्भेदेनान्वयबोधस्याव्युत्पन्नत्वात्, अन्यथा राजा पुरुष इत्यत्रापि तथान्वयबोधः स्यात्। घटः पटो न इत्यादौ घटपटाभ्यां नञ्सादृश्यादेवान्वयान्निपातातिरिक्तेति नीलो घट इत्यादौ नामार्थयोरभेदसम्बन्धेनान्वयाद् भेदेनेति। न च राज-

---

मुक्तावलीमयूखः।

सामर्थ्यावधारणादिति। 'कुमतिः पशुः' इति सर्वलक्षणिकस्थलेशाब्दबोधस्यानुभवसिद्धतया लाक्षणिकार्थस्याप्यानुभाविकत्वम् अत्र हि मतिशब्दस्य कुत्सितमतिमतिलक्षणा कुपदं तात्पर्यग्राहकं पशुशब्दस्य च पशुसदृशे लक्षणेति स लाक्षणिकत्वं बोध्यमिति नवीनाः।

नास्तीति। ननु 'गभीरायां नद्यां घोष' इत्यत्र नदीपदस्य नदीतीरे लक्षणायां गभीरापदार्थस्यैकदेशान्वयापत्तिरतो वाक्यलक्षणाङ्गीकर्तव्येति शङ्का समापत्ते—यत्र गभीरायामिति।

क्वचिदिति। चैत्रस्य गुरुरित्यादौ षष्ठ्यर्थनिरूपितत्वस्य स्वरूपेण गुरुत्वेऽन्वयेन चैत्रनिरूपितं यद्गुरुत्वं तदाश्रयस्य कुलमित्यर्थेनैकदेशान्वयस्य दर्शनादिति।

तात्पर्यग्राहकमिति। अत्र मीमांसकाः, वाक्यलक्षणयैव कार्यानर्वाहे गभीरपदस्य तात्पर्यग्राहकत्वकल्पनमयुक्तम्। न च वाक्ये शक्तेरभावात् शक्यसम्बन्धस्यलक्षणा न सम्भवतीति वाच्यम्। स्वबोध्यसम्बन्धस्यैव लक्षणापदार्थत्वेनादोषात् एवं च गभीरायां नद्यामिति वाक्यबोध्या गभीराभिन्ना नदी तत्सम्बन्धस्तीरे इति तीरबोधोपपत्तिरित्याहुः।

तन्न, स्वबोध्यसम्बन्धो लक्षणेत्यत्र स्वबोध्यत्वं यदि स्वजन्यशाब्दबोधविषयत्वं तदा गङ्गाया घोष इत्यत्र लक्षणानुपपत्तिः तत्र गङ्गापदेन प्रवाहविषयकशाब्दबोधाजननेन प्रवाहस्य गङ्गापदबोध्यत्वाभावात्; किन्तु शक्त्या स्वजन्यज्ञानविषयत्वं वाच्यम् एवं च वाक्ये नलक्षणासम्भवः शक्त्यभावात्।

पुरुष इत्यादौ लुप्तविभक्तेः स्मरणं कल्प्यमिति वाच्यम्, अस्मृतविभक्तेरपि ततो बोधोदयात्। तस्माद्राजपदादौ राजसम्बन्धिनि लक्षणा, तस्य च पुरुषेण सहामेदान्वयः।

द्वन्द्वे तु धवखदिरौ छिन्धीत्यादौ धवः खदिरश्च विभक्त्यर्थद्वित्वप्रकारेण भुज्यते, तत्र न लक्षणा। न च साहित्ये लक्षणेति वाच्यम्, साहित्यशून्ययोरपि द्वन्द्वदर्शनात्। न चैककियान्वयित्वरूप साहित्यमस्तीति वाच्यम् क्रियाभेदेऽपि धवखदिरौ पश्य छिन्धीत्यादिदर्शनात्। साहित्यस्यानुभवाच्च।

अत एव 'राजपुरोहितौ सायुज्यकामौ यजेयाताम्' इत्यत्र लक्षणाभावाद् द्वन्द्व आश्रीयते। तस्मात्साहित्यं नार्थः, किन्तु वास्तवो भेदो यत्र तत्र

मुक्तावलीमयूखः।

न च स्वजन्यज्ञानविषयत्वमात्रं स्वबोध्यत्वमस्तु शक्त्येति व्यर्थं ततश्च न दोष इति वाच्यं घटपदसंस्कारितस्याकाशस्यापि स्वबोध्यत्वापत्तौ तत्सम्बन्धज्ञानेन घटपदेन पटादेर्बोधप्रसङ्गादित्यलम्।

पुरुषेण सहामेदान्वय इति। अन्ये तु राजपुरुष इति तत्पुरुषे न लक्षणा किन्तु राज्ञ एव स्वत्वसम्बन्धेन पुरुषेऽन्वयो व्युत्पत्तिवैचित्र्यात् अत एव 'यस्यैते राजमात्रास्तस्यैवामी तुरङ्गमा' इत्यत्र यच्छब्देन राज्ञः परामर्शः राजसम्बन्धिनि राजपदस्य लक्षणायां तु राज्ञः पदार्थैकदेशत्वात्तदा परामर्शो न स्यादिति वदन्ति।

आकाशघटगतद्वित्वस्याकाशेऽपि सत्त्वादाकाशादिवियस्य प्रामाण्यापत्तिरतः उद्देश्यतावच्छेदकव्याप्यसंख्याबोधकत्वं सुपामिति नियम आश्रीयते। एवं च धवखदिराविति यत्र यदि धवत्वं खदिरत्वं च प्रत्येकमुद्देश्यतावच्छेदकं स्यात् तदा धवद्वयस्य खदिरद्वयस्य च बोधापत्तिरिति धवखदिरपदस्य धवखदिरसाहित्याश्रये लक्षणा स्वीक्रियते एवं च उद्देश्यतावच्छेदकीभूतसाहित्यव्याप्यत्वं न धवगतद्वित्वस्य नापि खदिरगतद्वित्वस्य किन्तु धवखदिरगतद्वित्वस्यैवेति न धवद्वयादेर्बोध इति मीमांसकाः। तन्मतेनाशङ्कते—न च साहित्ये इति। साहित्याश्रये इत्यर्थः। सहवृत्तित्वरूपं साहित्यमेककियान्वयित्वरूपं वा लक्ष्यमिति विकल्प्याद्यं दूषयति—साहित्यशून्येति। सहवृत्तित्वशून्ययोर्घटत्वपटत्वयोरित्यर्थः। द्वितीयं दूषयति—नचैकेति। अननुभवाच्चेति। वस्तुगत्या एककियान्वयित्वरूपस्य धवखदिरयोः सत्त्वेऽप्येककियान्वयित्वस्य शाब्दबोधे भानाभावादित्यर्थः।

यजेयातामिति। तथा च न्यायमालायाम्—

सायुज्यकामौ यजतोऽनेन राजपुरोहितौ। राज्ञः पुरोहितौ राज्ञोस्तौ वा राज्ञात्मकावुभौ॥
द्वयोर्द्वन्द्वसमासो वा तुरयत्वायाग्रिमो द्वयोः सिद्ध्यै द्वितीयो राजोक्तिसार्थक्याय तृतीयकः॥
अभ्याहृत्यै चतुर्थं स्याद्वचनाद्विधकल्पता। तनूनपात्पुराणंसौ विकल्प्येते समत्वतः॥इति।

ननु यदि द्वन्द्वे न लक्षणा तर्हि कर्मधारयाद् द्वन्द्वस्य भेदो न स्यादत आह किन्त्विति। चार्थे द्वन्द्व इति हि पाणिनीयं सूत्रं तत्र चार्थः समुच्चयान्वाचयेतरेतरयोगसमाहारभेदाच्चतुरः। तत्र इतरेतरयोग इत्यस्य इतरस्येतरस्मिन् योगः सम्बन्धः इतरेतरयोगः

द्वन्द्वः। न च नीलघटयोरभेद इत्यादौ कथमिति वाच्यम्, तत्र नीलपदस्य नीलत्वे घटपदस्य घटत्वे लक्षणा। अभेद इत्यस्य चाश्रयाभेद इत्यर्थात्।

समाहारद्वन्द्वे तु यदि समाहारोऽप्यनुभूयत इत्युच्यते, तदाऽहिनकुलमित्यादौ परपदेऽहिनकुलसमाहारे लक्षणा, पूर्वपदं तु तात्पर्यग्राहकम्। न च मेरीमृदङ्गं वादयेत्यत्र कथं समाहारस्यान्वयस्तस्यापेक्षाबुद्धिविशेषरूपस्य वदनासम्भवादिति वाच्यम्, परम्परासम्बन्धेन तदन्वयात्। एवं पञ्चमूर्लोत्यादावपि।

परे तु अहिनकुलमित्यादौ 'अहिर्नकुलञ्च बुध्यते' प्रत्येकमेकत्वान्वयः। समाहारसंज्ञा च यत्रैकत्वं च 'द्वन्द्वश्च प्राणितूर्य' इत्यादिसूत्रेणोक्तं तत्रैव, अन्यत्रैकवचनमसाधित्याहुः।

पितरौ श्वशुरावित्यादौ पितृपदे जनकदम्पत्योः, श्वशुरपदे स्त्रीजनकदम्पत्योर्लक्षणा। एवमन्यत्रापि। घटा इत्यादौ न लक्षणा—घटत्वेन रूपेण नानाघटोपस्थितिसम्भवात्।

कर्मधारयस्थले तु, नीलोत्पलमित्यादावभेदसम्बन्धेन नीलपदार्थं उत्पलपदार्थं प्रकारः। तत्र च न लक्षणा।

मुक्तावलीमयूखः।

इति भेदे द्वन्द्व इति लभ्यते तत्र पदभेदे, पदार्थभेदे, पदार्थतावच्छेदकभेदे वा द्वन्द्वः। नाद्यतृतीयौ नीलोत्पलमित्यत्र पदभेदस्य पदार्थतावच्छेदकभेदस्य च सत्त्वेन द्वन्द्वप्रसङ्गात् परिशेषात् पदार्थभेदे द्वन्द्व इति लभ्यते।

नन्वेवं नीलघटयोरभेद इति व्यवहारासंगतिः पदार्थभेदाभावादत आह तत्रेति—तथा च नीलत्वघटत्वयोराश्रयाभेद इत्यर्थ इति न दोषः।

वस्तुतस्तु पदार्थतावच्छेदकभेद एव द्वन्द्वः नीलोत्पलमित्यत्र तु सहविवक्षाभावात् कर्मधारयेण बाधाद्वा न द्वन्द्वः। कर्मधारयेण द्वन्द्वस्य बाधसिद्ध्यर्थमेवाकडारादेकासंज्ञेति सूत्रे आचार्यादेकासंज्ञेति न्यासो भाष्यकृता कृतः स्पष्टं चेदं लघुमञ्जूषायां प्रथमाकारके इति। एवं च नीलघटयोरभेद इति स्वरसत उपपद्यते। न चैवं घटा इत्यत्र द्वन्द्वाप्राप्त्या 'उत्सर्गसमानदेशा अपवादा' इतिन्यायेन द्वन्द्वापवाद एकशेषो न स्यादिति वाच्यम्। सरूपसूत्रस्य हरी इत्यत्र चारितार्थ्येन घटा इत्यत्रैकशेषाभावेऽपि क्वत्यभावात् घटपदेनैव अर्थतन्त्रमाश्रित्य नानाघटोपस्थितिसम्भवात्। न च 'सकृदुच्चरितः शब्दः सकृदर्थं गमयती'ति व्युत्पत्तिविरोध इति वाच्यम्। अर्थः वृत्तिजन्योपस्थितिविषयः। तत्र वृत्तौ सकृदित्यस्यान्वयेन सकृदुच्चरितः शब्दः एकवृत्तिजन्योपस्थितिविषयं बोधयतीत्यर्थात् एकशक्त्या नानाघटोपस्थितौ बाधकाभावादिति ध्येयम्।

अहिनकुलमित्यत्र अहिनकुलमात्रप्रतीतेर्नोत्तरपदे समाहारलक्षणा न वा शक्तिरित्यभिप्रायेणोक्तं यदीति।

परम्परासम्बन्धेनेति। स्वाश्रयवृत्तित्वरूपेणेत्यर्थः। स्वं समाहारः।

यत एव 'निषादस्थपतिं याजयेत्' इत्यत्र न तत्पुरुषो लक्षणापत्तेः, किन्तु कर्मधारयो लक्षणाभावात्। न च निषादस्य सङ्करजातिविशेषस्य वेदानधिकारापाद्याजनासम्भव इति वाच्यम्, निषादस्य विद्याप्रयुक्तेस्तत एव कल्पनीयत्वात्। लाघवेन मुख्यार्थस्यान्वये तदनुपपत्त्या तत्कल्पनायाःफल-मुखगौरवतयाऽदोषत्वादिति।

उपकुम्भमर्घपिप्पलीत्यादौ परपदे तत्सम्बन्धिनि लक्षणा, पूर्वपदार्थ-प्रधानतया चान्वयबोध इति। इत्यत्र समासे न कापि शक्तिः-पदशक्त्यैव निर्वाहादिति॥

मुक्तावलीमयूखः।

निषादस्थपतिं याजयेत् इति। तथा च न्यायमालाविस्तरे माधवः—

"द्विजः स्थपतिरन्यो वा, द्विजः षष्ठीसमासतः। कर्मधारयमुख्यत्वान्निषादो रौद्रयागकृत्॥"

अयमाशयः—वास्तुमयं रौद्रं चरुं निर्वपेत् इति। प्रकृत्य श्रूयते एतया निषाद-स्थपतिं याजयेदिति तत्र रौद्रेष्टेः यागकर्तृत्वं निषादस्य स्थपतिरिति विग्रहेण कस्य चित् शैवर्णिकस्य, निषादश्चासौ स्थपतिश्चेति विग्रहेण संकरजात्यवच्छिन्नस्य वेति संकर-जातिविशेषावच्छिन्नस्य शूद्रतया वेदानधिकारात् षष्ठीतत्पुरुषस्यैवौचित्येन शैवर्णिकस्यै-वेति पूर्वपक्षे पूर्वपदस्य निषादसम्बन्धिनि लक्षणायां गौरवात् लाघवात् कर्मधारयस्यौचि-त्येन सङ्करजातिविशेषावच्छिन्न एव कर्तेति सिद्धान्तः। ततश्च श्रुतिबलात् तात्कालिकाचा-र्योपदेशादिना विद्यां सम्पाद्य धनिको निषादो रौद्रयागं कुर्यादिति तात्पर्यम्।

ननु—

षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका। याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः।

इति स्मृत्या याजनस्य ब्राह्मणजीविकात्वेन परिगणनात्तत्र राजत एव प्रवृत्तिसम्भवा-च्छ्रुत्या याजनस्य विधानमनुपपन्नमिति चेन्न; याजयेदित्यस्य यजेदित्यत्रैव तात्पर्येणादो-षात् शूद्रस्य अज्ञतया यागे प्रवृत्त्यसम्भवात् ब्राह्मणस्य प्रवर्तकतया याजयेदित्युक्तेरिति सर्वं समञ्जसम्।

तत्पुरुष इति। षष्ठीतत्पुरुष इत्यर्थः यथाश्रुतं तु नयुक्तम्। कर्मधारयस्यापि 'तत्पुरु-षत्वादिति।

लक्षणापत्तेरिति। ननु लक्षणाकल्पनं न दोषः निषादानां स्थपतिरिति षष्ठीसमासे निषादसम्बन्ध्यभिन्नस्थपतिविषयकबोधाय लौकिकवाक्ये लक्षणायाः, कृतत्वात्। तदनुरो-धेन न तादृशशाब्दबोधे लक्षणाज्ञानहेतुत्वकल्पनप्रयुक्तं गौरवमपीति चेन्न—

वैदिकवाक्यजन्यशाब्दबोधात्पूर्वं लक्षणाज्ञानव्यक्तिकल्पनागौरवस्यैव दोषत्वमित्या-शयात् न च वैदिकवाक्यजन्यशाब्दबोधात्पूर्वं शक्तिज्ञानव्यक्तिकल्पनं तव, मम च लक्ष-णाज्ञानव्यक्तिकल्पनमिति किं गौरवमिति वाच्यम्। शक्यसम्बन्धरूपलक्षणाज्ञानव्यक्ति क-ल्पनवतस्तव शक्तिज्ञानव्यक्तिकल्पनाया आवश्यकत्वात्। मम शक्तिज्ञानमात्रस्यैव कल्पने-न लाघवादित्यलम्।

आसत्तियोग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते ॥ ८२ ॥
कारणं, संनिधानं तु पदस्यासत्तिरुच्यते ।

आसत्तिरिति । आसत्तिज्ञानं योग्यताज्ञानमाकाङ्क्षाज्ञानं तात्पर्यज्ञानं च शब्दबोधे कारणम् । तत्रासत्तिपदार्थमाह—संनिधानं त्विति । अन्वयप्रतियोग्यनुयोगिपदयोरव्यवधानमासत्तिः तज्ज्ञानं शाब्दबोधे कारणम्, क्वचिद्व्यवहितेष्वव्यवधानभ्रमाच्छाब्दबोधादिति केचित् ।

वस्तुतस्तु अव्यवधानज्ञानस्यानपेक्षितत्वात् यत्पदार्थेन यत्पदार्थस्यान्वयोऽपेक्षितस्तयोरव्यवधानेनोपस्थितिः शाब्दबोधे कारणम् । तेनगिरिर्भुक्तमग्निमान्देवदत्तेनेत्यादौ न शब्दबोधः । नीलो घटो द्रव्यं पटइत्यादावासत्तिभ्रमाच्छाब्दबोधः । आसत्तिभ्रमाच्छाब्दभ्रमाभावेऽपि न क्षतिः ।

ननु यत्र कुण्डली वासस्वी देवदत्त इत्याद्युक्तं तत्रोत्तरपदस्मरणेन पूर्वपदस्मरणस्य नाशादव्यधानेन तदुत्तरपदस्मरणासम्भवइति चेदु—

न प्रत्येकपदानुभवजन्यसंस्कारैश्चरमस्य तावत्पदविषयकस्मरणस्या-

मुक्तावलीमयूखः ।

आसत्तिज्ञानमिति । अयं भावः । 'गिरिर्भुक्तमग्निमान् देवदत्तेन' इत्यत्र गिरिपदाग्निमत्पदयोरव्यधानभ्रमेण शाब्दबोधदर्शनात् स्वरूपसत्त्या आसत्तेर्न शाब्दबोधे कारणत्वं किन्तु आसत्तिज्ञानस्यैवेति ।

ननु आसत्तिर्योग्यतेति लकारिकापाठात् आसत्तिरित्यस्य समासघटकत्वेन तस्य ज्ञानपदेनान्वयासंभवादासत्तिज्ञानमित्यर्थकरणमयुक्तमिति चेद् ।

न आसत्तिर्योग्यतेतिनिर्विभक्तिकपाठस्यैव साम्प्रदायिकत्वात् आसत्तिरितिप्रथमान्तपाठे तु आसत्तिपदमासत्तिज्ञाने लाक्षणिकमिति ध्येयम् ।

केचिदित्यन्तेनोक्तं मतं दूषयति—वस्तुतस्त्विति ।

ननु 'नीलो घटो द्रव्यं पटः' इत्यत्र नीलपदार्थपटपदार्थयोर्यश्चान्वयो वक्तुस्तात्पर्यविषयस्तत्र नीलपदघटपदयोरासत्तिर्न स्यात् तत्तत्पदार्थान्वित्वस्य तात्पर्यविषयत्वाभावादतस्तत्रेष्टापत्तिमाह—नीलो घट इत्यादिना ।

तर्हि तत्र नीलो घट इति कथं शाब्दबोध इत्याह—भ्रमाच्छाब्दबोधः इति तथा च भ्रमाच्छाब्दबोधमात्रं न तु तत्रासत्तिरिति तत्त्वम् ।

ननु तत्र यद्यासत्तिभ्रमस्तदा शाब्दबोधः भ्रमात्मकः स्यान्न चेष्टापत्तिः घटे नीलस्य सत्त्वेन विषयबाधाभावात् आसत्तिभ्रमाच्छाब्दभ्रमाङ्गीकारे वासत्तिभ्रमाच्छाब्दभ्रम इति प्राचीनमतविरोध इत्यत आह आसत्तिभ्रमादिति । आसत्तिभ्रमस्य न शाब्दभ्रमजनकत्वं प्राचीनगाथा तु निर्युक्तिकत्वादश्रद्धेयैवेति भावः ।

नन्वव्यधानेन पदोपस्थितिः शाब्दबोधे कारणमित्ययुक्तम् अनेकपदघटितवाक्यस्थले ऽव्यवधानेन पदोपस्थित्यभावादित्याशङ्क्य नन्विति ।

व्यवधानेनोत्पत्तेः। नानासंनिकर्षैरेकप्रत्यक्षस्येव नानासंस्कारैरेकस्मरणोत्पत्तेरपि सम्भवात्। कथमन्यथा नानावर्णैरेकपदस्मरणम्।

परन्तु तावत्पदार्थानां स्मरणादेकदैव खले कपोतन्यायेन तावत्पदार्थानां क्रियाकर्मभावेनान्वयरूपः शाब्दबोधो भवतीति केचित्—

वृद्धा युवानः शिशवः कपोता। खले यथामी युगपत्पतन्ति।
तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवन्ति॥

परेतु—

यद्यदाकाङ्क्षितं योग्यं संनिधानं प्रपद्यते।
तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते॥

तथाच खण्डवाक्यार्थबोधानन्तरं तथैव पदार्थस्मृत्या महावाक्यार्थबोध इत्याहुः।

मुक्तावलीमयूखः।

नानासन्निकर्षैरिति। यथा घटचक्षुःसंयोगस्य पटप्रत्यक्षे कारणत्वाभावेऽपि घटचक्षुःसंयोगपटचक्षुःसंयोगाभ्यामेकं घटपटाविति समूहालम्बनात्मकं प्रत्यक्षं तथा तत्तत्पदगोचरसंस्कारस्य भिन्नविषयकत्वेऽजनकत्वेऽपि ततत्संस्कारजन्यं एकमेव स्मरणं जायते बाधकाभावादिति भावः।

अन्यथेति। नानासंस्काराणामेकस्मरणजनकत्वाभावे इत्यर्थः।

नन्वाशुमद्वराणां क्रमिकाणां पदजन्यपदार्थोपस्थितीनामपि मेलनं न सम्भवति अतः सर्वत्र शाब्दबोधे पदजन्यपदार्थोपस्थितिः समूहालम्बनात्मिकैव कारणम्। एवं चैकदैव सकलपदार्थानां विशेष्ये विशेषणमिति रीत्यैव शाब्दबोधः न तु विशिष्टस्य वैशिष्ट्यमिति रीत्या, विशिष्टबुद्धिजनकस्य विशेषणतावच्छेदकप्रकारकनिर्णयस्य पूर्वमभावादिति प्राचीनमतं दर्शयति-परं त्विति।

एकदैवेति। नतु घटमानयेत्यादौ प्रथमं घटीया कर्मता इत्येवं बोधस्तदनन्तरं च घटकर्मकमानयनमिति बोध इत्यादि क्रमेणेत्यर्थः।

वृद्धा युवान इत्यस्य तदाहुरित्यादिः। अत्र वृद्धयुवशिशुभिः कपोतैश्चिरतरचिरसन्निहितकालोक्तानां पदार्थानां सादृश्यं बोध्यम्।

यद्यदिति। घटादिपदार्थाकाङ्क्षितं घटपदोपस्थितिजन्य 'किंघटीयम्' इति जिज्ञासाविषयीभूतं योग्यं योग्यताज्ञानाधीनं कर्मत्वादि यद्यत् सन्निधानं प्रतिपद्यते स्वार्थोपस्थितिविषयो भवति तेन तेनैवान्वितः स्वार्थः पदैः प्रथममनुभाव्यते इत्यर्थः। तथाच आनयनार्थरूपोपस्थितेः प्रथममेव 'घटम्' इतिवाक्यादुद्देश्यं कर्मत्वमिति बोधो भवति। तदनन्तरं च घटकर्मकमानयनमिति महावाक्यार्थबोधः। एवं च पूर्वोक्तसमूहालम्बनात्मकं पदार्थज्ञानं विनापि निर्वाह इति भावः।

केचित्तु तत्र पदजन्यपदार्थोपस्थितिरेवासत्तिः सा च स्वरूपसती हेतुः नावेताद्दशासत्तेः शाब्दबोधं प्रतिकारणत्वे किं मानमिति वाच्यम्, आनयेत वाक्यं श्रुतवतः प्रत्यक्षेण घटं पश्यतोऽपि पुंसः घटकर्मकानयनबोधापत्तेः। नचैवं 'गिरिर्वह्निमान् धूमात्' इत्यत्र अन्वयबोधापत्तिरिति वाच्यम्, सति तात्पर्यग्रहे इष्टापत्तेः।

एतेन तावद्वर्णाभिव्यङ्ग्यः पदस्फोटोऽपि निरस्तः। तत्तद्वर्णसंस्कारसहितचरमवर्णोपलम्भेन तद्घटकेनयोपपत्तेरिति।

इदन्तु बोध्यम्। यत्र द्वारमित्युक्तं तत्र पिधेहीत्यादि पदस्य ज्ञानादेव बोधो, न तु पिधानादिरूपार्थज्ञानात्-पदजन्यतत्तत्पदार्थोपस्थितेस्तत्तच्छाब्दबोधे हेतुत्वात्। किञ्च क्रियाकर्मपदानां तेन तेनैव रूपेणाकाङ्क्षितत्वात्, तेन क्रियापदं विना कथं शाब्दबोधः स्यात्। तथा पुष्पेभ्य इत्यादौ स्पृहयतीत्यादिपदाध्याहारं विना चतुर्थ्यनुपपत्तेः पदाध्याहार आवश्यकः॥

योग्यतां निर्वक्ति—

पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता॥ ८३॥

पदार्थ इत्यादिना। एकपदार्थेऽपरपदार्थसम्बन्धो योग्यतेत्यर्थः। तज्ज्ञानाभावाच्च वह्निना सिञ्चतीत्यादौ न शाब्दबोधः।

नन्वेतस्या योग्यताया ज्ञानं शाब्दबोधात्प्राक्सर्वत्र न सम्भवति वाक्यार्थस्यापूर्वत्वादिति चेद्र।

न-तत्तत्पदार्थस्मरणे सति क्वचित्संशयरूपस्य क्वचिन्निश्चयरूपस्य योग्यताज्ञानस्य सम्भवात्।

मुक्तावल्यां मयूखः।

नन्वेवं श्लोकेषु अन्वयप्रदर्शनानर्थक्यमिति चेन्न, तात्पर्यज्ञानार्थं तदुपयोगात् दृश्या पदजन्यपदार्थोपस्थितिश्च स्मृतिरूपा न तु शाब्दबुद्धिरूपा तथा सति शाब्दबोधरूपाया आपत्तेः शाब्दबुद्धिं प्रति कारणत्वेऽन्योन्याश्रयप्रसङ्गात्। एतेन मौनिश्लोकादौ पदाभावेन पदाध्यवधानरूपासत्त्यभावेऽपि न क्षतिरित्याहुः।

घट इति समुदायो न वाचकः उत्पन्नानामभिव्यक्तानां वा वर्णानां समुदायस्यैकदा प्रत्यक्षासम्भवात्। नापि प्रत्येकं वर्णा वाचकाः द्वितीयादिवर्णोच्चारणवैयर्थ्यापत्तेरतः पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहितोत्तरचरमवर्णानुभवजन्यसंस्कारेणाभिव्यक्तः स्फोट एव वाचक इति वैयाकरणास्तन्मतं निरस्यति एतेनेति। पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहितेन चरमवर्णानुभवजन्यसंस्कारेण क्रमिकवर्णविशिष्टपदस्मरणेनैव घटार्थबोधोपपत्तौ स्फोटाङ्गीकारो वृथेति भावः।

लाघवेन पदजन्यपदार्थोपस्थितिर्न शाब्दबोधे कारणं किन्तु पदार्थोपस्थितिरेव अत एव पिधेहीत्यत्र न पदाध्याहारः किन्तु अर्थाध्याहार एवेति प्रभाकरमतं दूषयति—इदन्तु बोध्यमित्यादिना। पदार्थोपस्थितिमात्रस्य हेतुत्वे प्रत्यक्षोपस्थितघटादेरपि शाब्दबोधे भानापत्तिरिति भावः।

ननु तात्पर्याभावादेव न प्रत्यक्षोपस्थितघटादेर्बोधे भानं तात्पर्यसत्त्वेऽपि तदापत्तिरतआह किञ्चेति।

अपूर्वत्वादिति। सर्वत्र शाब्दबोधात्पूर्वमनिश्चितत्वादित्यर्थः।

'शङ्खो न पीत' इति निश्चयसत्त्वेऽपि पितादिदोषवशात् 'पीतः शङ्ख' इति प्रत्यक्षं

नव्यास्तु योग्यताज्ञानं न शाब्दबोधकारणम्। किन्तु वह्निना सिञ्चतीत्यादौ सेके वह्निकरणत्वाभावरूपायोग्यतानिश्चयेन प्रतिबन्धात् शाब्दबोधः। तदभावनिश्चयस्य लौकिकसन्निकर्षजन्यदोषविशेषाजन्यतज्ज्ञानमात्रे प्रतिबन्धकत्वाच्छाब्दबोधं प्रत्यपि प्रतिबन्धकत्वं सिद्धम्। योग्यताज्ञानविलम्बाच्च शाब्दबोधविलम्बोऽसिद्ध इति वदन्ति। ८२-८३॥

आकाङ्क्षां निर्वक्ति—

यत्पदेन विना यस्यानन्वयानुभावकता भवेत्।
आकाङ्क्षा वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्॥ ८४॥

यत्पदेनेति। येन पदेन विना यत्पदस्यान्वयानुभावकत्वं तेन पदेन सह तस्याकाङ्क्षेत्यर्थः। क्रियापदं विना कारकपदं नान्वयप्रबोधं जनयतीति तेन तस्याकाङ्क्षा।

वस्तुतस्तु क्रियाकारकपदानां संनिधानमासत्या चरितार्थम्। परन्तु घटकर्मतायोधं प्रति घटपदोत्तरद्वितीयारूपाकाङ्क्षाज्ञानं कारणम्, तेन घटः कर्मत्वमानयनं कृतिरित्यादौ न शाब्दबोधः। अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ पुत्रेण सह राजपदस्य तात्पर्यग्रहस्वरसात्तेनैवान्वयबोधः। पुरुषेण सह तात्पर्यग्रहे तु तेन सहान्वयबोधः स्यादेव॥

तात्पर्यं निर्वक्ति—वक्तुरिच्छेति। यदि तात्पर्यज्ञानं कारणं न स्यात्तदा सैन्धवमानयेत्यादौ क्वचिदभ्यस्य क्वचिल्लवणस्य बोध इति न स्यात्।

मुक्तावलीमयूखः।

जायते इत्याह—लौकिकसंनिकर्षजन्येति। शुक्तौ 'नेदं रजतम्' इति ज्ञानसत्त्वेऽपि मण्डूकसाजनादिदोषेण इदं 'रजतम्' इति भ्रमस्योदयादाह—दोषविशेषेति।

ननु यत्र न योग्यताज्ञानं तत्र शाब्दबोधापत्तिरित्यत आह योग्यताज्ञानेति। तथा चेष्टापत्तिरिति भावः।

वदन्तीति। परे तु लौकिकसंनिकर्षजन्यदोषविशेषाजन्यतद्वत्तानुद्धिं प्रति तदभावनिश्चयत्वेन प्रतिबन्धकता न सम्भवति घटाभाववदभूतलमिति निश्चयोत्तरमपि घटप्रकारकभूतलविशेष्यकचाक्षुषे आयतामितीच्छासत्त्वे घटादेरपि चाक्षुषसन्निकर्षात् भूतले घट चाक्षुषोत्पत्त्या व्यभिचारवारणाय तच्चाक्षुषेच्छाविरहविशिष्टतदभावनिश्चयत्वेन विशिष्यैव प्रतिबन्ध्यप्रतिबन्धकभावः कल्पनीयः। अनुमितौ च तत्प्रकारकानुमितिं प्रति इच्छाविरहवैशिष्ट्यमवन्तर्भाव्यैव तदभावनिश्चयत्वेन प्रतिबन्धकता कल्पनीया परोक्षज्ञानस्याहार्यस्यानभ्युपगमात् एवं शाब्दबुद्धौ पृथगेवायोग्यता निश्चयस्य प्रतिबन्धकत्वं कल्पनीयमिति तदपेक्षयाशाब्दबोधे योग्यताज्ञानस्य हेतुत्वकल्पने एव लाघवमिति वदन्ति॥८२-८३॥

क्रियाकारकपदानामिति। अयं भावः एकपदेऽपरपदवत्त्वम्—अपरपदान्यवहितोत्तरत्वे सति चान्यव्यवधानाशस्त्यासत्त्वमेव आसत्तेः पदान्यव्यवधानकृतायाः पूर्वमुक्तवर्णि-

न च तात्पर्यग्राहकं प्रकरणादीनां शाब्दबोधे कारणत्वमस्तीति वाच्यम्, तेषामननुगमात् तात्पर्यज्ञानजनकत्वेन तेषामनुगमे तु तात्पर्यज्ञानमेव लाघवात्कारणमस्तु ।

इत्थं च वेदस्थलेऽपि तात्पर्यज्ञानार्थमीश्वरः कल्प्यते । न च तत्राप्यव्यापकतात्पर्यज्ञानं कारणमिति वाच्यम् सर्गादावव्यापकाभावात् ।

न च प्रलय एव नास्ति कुतः सर्गादिरिति वाच्यम्, प्रलयस्यागमेषु प्रतिपादनात् । इत्थं च शुकवाक्येऽपि ईश्वरीयतात्पर्यज्ञानं कारणम् विसंवादिशुकवाक्ये तु शिक्षयितुरेव तात्पर्यज्ञानं कारणम् ।

अन्ये तु नानार्थादौ क्वचिदेव तात्पर्यज्ञानं कारणम् । तथाच शुकवाक्ये विनैव तात्पर्यज्ञानं शाब्दबोधः, वेदे त्वनादिमीमांसापरिशोधिततर्कैरर्थावधारणमित्याहुः ॥ ८४ ॥

इति श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचितायां सिद्धान्तमुक्तावल्यां शब्दखण्डं समाप्तम् ।

मुक्तावलीमयूखः ।

तत्वादिति । उत्तरत्वं च क्रियाकारकपदयोर्नापेक्षितं 'चैत्रः पचति, पचति चैत्र' इति वाक्यद्वयादपि बोधात् क्रियाकारकपदयोर्नाकाङ्क्षा किन्तु प्रकृत्यन्यवहितोत्तरत्वमेवाकाङ्क्षा तत्राप्यवधानाशस्यासत्त्येव लाघात्प्रत्यये प्रकृत्युत्तरत्वरूपाकाङ्क्षाज्ञानं कारणमिति ।

प्रलयस्येति । कार्यद्रव्यानधिकरणकार्याधिकरणकाले विशेषात्मकखण्डप्रलयस्येत्यर्थः ।

आगमेष्विति । 'नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमो ज्योतिरभून्न चान्यत्, इत्यादागमेष्वित्यर्थः ।

ननु यहिना सिञ्चतीति शुकवाक्ये ईश्वरीयतात्पर्यज्ञानं न कारणमीश्वरेच्छाया विसंवादित्वापत्तेः । इत्थं च शुकवाक्येऽप्रीत्यसङ्गतम् अत आह—विसंवादीति । ईश्वरेच्छाया विसंवादित्वे ईश्वरस्य सत्यसङ्कल्पत्वक्षतेरिति भावः ।

अन्येत्विति । क्वचिदित्यस्य विवरणं नानार्थादाविति ।

वेदेति । वेदत्वं च शब्दतदुपजीव्यप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वम् ।

मीमांसेति । लाघवज्ञानात्मकस्तर्क इत्यर्थः । कपिञ्जलानालभेतेत्यत्र प्रथमोपस्थितत्वलाघवेन त्रित्वस्यैव बहुवचनार्थतानिश्चय इति भावः ।

ननु परिशोधित इत्यस्य सहकृतार्थकत्वे लाघवानन्तर्गतं सहकृतं तर्कान्तरं किमितिचेदनुमानमेवेति गृहाण । अनुमानाकारश्च कपिञ्जलानिति बहुवचनार्थः, त्रित्व, बहुवचनवाच्यत्वादित्येवं रूपः । तत्र च लाघवज्ञानं सहकारि चतुष्टादीनामपि बहुवचनवाच्यत्वादिति तात्पर्यम् ।

आहुरिति । परे तु गृहीतनानार्थवृत्तिकपदजन्यानुभवस्तस्य तात्पर्यज्ञानजन्यताव-

अथ स्मृतिप्रक्रिया।

न्यायसिद्धान्तमुक्तावली।

पूर्वमनुभवस्मरणभेदाद् बुद्धेर्द्वैविध्यमुक्तम्। तत्रानुभवप्रकारा दर्शिताः। सुगमतया स्मरणं न दर्शितम्। तत्र हि पूर्वानुभवः कारणम्।

(१)अत्र केचित्—(२)अनुभवत्वेन न कारणत्वं किन्तु ज्ञानत्वेनैव, अन्यथा स्मरणानन्तरं स्मरणं न स्यात्—समानप्रकारकस्मरणेन पूर्वसंस्कारस्य विनष्टत्वात्। मन्मते तु तेनैव स्मरणेन संस्कारान्तरद्वारा स्मरणान्तरं जन्यत इत्याहुः।

तन्न—यत्र समूहालम्बनोत्तरं घटपटादीनां क्रमेण स्मरणमजनिष्ट सकलविषयकस्मरणं तु नामूत्, तत्र फलस्य संस्कारनाशकत्वाभावात्कालस्य

मुक्तावलीमयूखः।

च्छेदकत्वकल्पनापेक्षया पदजन्यानुभवत्वस्य तात्पर्यज्ञानजन्यतावच्छेदकत्वकल्पने लाघवात् तात्पर्यसंशयस्थले शाब्दबोधानुभवाच्च, शाब्दबोधमात्रे तात्पर्यज्ञानस्य हेतुत्वं कल्पनीयं ततश्च वेदस्थले तात्पर्यज्ञानाभावे नार्थनिर्णय इति वदन्ति ॥ ८४ ॥

शाब्दत्वं च यां कांचित् शाब्दव्यक्तिमादाय तद्व्यक्तिवृत्तित्वे सति यां कांचित् प्रत्यक्षव्यक्तिमादाय तदवृत्तिजातिमत्त्वम्।

इति न्यायव्याकरणाचार्य श्रीसूर्यनारायणशुक्लविरचितमुक्तावलीमयूखे शब्दखण्डं सम्पूर्णम्।

अनुभवप्रकारा इति। अनुभवभेदा इत्यर्थः।

सुगमतयेति। सुगमस्य स्वयमप्यूहितुं शक्यतया दुरूहे एव आदौ सुधियां जिज्ञासोदयादिति भावः। तथा च अवसरसङ्गत्याऽनुभवानन्तरं स्मरणनिरूपणमिति भावः।

स्मरणं न स्यादिति। अयं भावः अनुभवत्वेन संस्कारो जन्यते तद्द्वाराऽनुभवः स्मरणं जनयति, अनुभवस्य तृतीयक्षणे नाशेन स्वरूपतो हेतुत्वासम्भवात्। ततश्च तत् स्मरणं संस्कारं नाशयित्वा संस्कारान्तमुत्पादयति तेन च संस्कारेण पुनः स्मरणमिति प्रक्रिया तत्रानुभवस्यैव स्मृतिजनकत्वेऽनुभवजन्यसंस्कारस्य प्रथमस्मरणेन नाशात् द्वाराभावात् स्मरणान्तरं न स्यात्, मम तु स्मरणं स्वजन्यसंस्कारद्वारा स्मरणान्तरं जनयतीत्यदोष इति।

तन्नेति। अयमाशयः संस्कारस्य न फलनाश्यत्वं किन्तु चरमफलनाश्यत्वमिति अनुभवजन्यसंस्कारस्यानिष्टत्वात्तद्द्वाराऽनुभवस्य स्मरणजनकत्वमिति।

संस्कारनाशकत्वाभावादिति। समानप्रकारकस्मरणस्यैव संस्कारनाशकतया प्रकृते स्मरणस्य समानप्रकारकत्वाभावेन संस्कारनाशकत्वायोगादिति भावः।

कालस्येति। अन्यथा समूहालम्बनसंस्कारस्य नाशो न स्यात्। नचेष्टापत्तिः जन्यभावस्य विनाशित्वनियमात्।

---

(१) स्मृतित्वावच्छिन्नं प्रति ज्ञानत्वावच्छिन्नं कारणमिति मतं खण्डयति अत्रेत्यादिना।

(२) स्मृतित्वावच्छिन्नकार्यतानिरूपितकारणता न अनुभवत्वावच्छिन्ना, किन्तु ज्ञानत्वावच्छिन्नैवेत्यर्थः।

रोगस्य चरमफलस्य वा संस्कारनाशकत्वं वाच्यम्, तथा च न क्षणिक-स्मरणानुपपत्तिः।

न च पुनःपुनः स्मरणाद् दृढतरसंस्कारानुपपत्तिरिति वाच्यम्, झटि-त्युद्बोधकसमवधानस्य दार्ढ्यपदार्थत्वात्।

न च विनिगमनाविरहादेव ज्ञानत्वेनापि जनकत्वं स्यादिति वाच्य-म्, विशेषधर्मेण व्यभिचाराज्ञाने सामान्यधर्मेणान्यथासिद्धत्वात्। कथ-मन्यथा दण्डस्य भ्रमिद्वारा द्रव्यत्वेन रूपेण न कारणत्वम्।

न चान्तरालिकस्मरणानां संस्कारनाशकत्वसंशयाद्व्यभिचारसंशय इति वाच्यम्। अनन्तसंस्कारतन्नाशकल्पनापेक्षया चरमस्मरणस्यैव लाघ-वात्संस्कारनाशकत्वकल्पनेन व्यभिचारसंशयाभावात्।

इति स्मृतिप्रक्रिया।

अथ मनो निरूपणम्।

इदानीं क्रमप्राप्तं मनो निरूपयितुमाह—

'साक्षात्कारे सुखादीनां करणं मन उच्यते'।

साक्षात्कार इति। एतेन मनसि प्रमाणं दर्शितम्। तथाहि—सुख-साक्षात्कारः सकरणकः जन्यसाक्षात्कारत्वात् चाक्षुषसाक्षात्कारवदित्यनु-मानेन मनसः करणत्वसिद्धिः।

नचैवं दुःखादिसाक्षात्काराणामपि करणान्तराणि स्युरिति वाच्यम्, लाघवादेकस्यैव तादृशसकलसाक्षात्कारकरणतया सिद्धेः। एवं सुखा-दीनामसमवायिकारणसंयोगाश्रयतया मनसः सिद्धिर्बोद्धव्या।

मुक्तावलीमयूखः।

ननु कालादेः कालत्वादिना नाशकत्वे संस्कारमात्रस्य क्षणिकत्वं स्यात् तत्तद्व्यक्तित्वेन नाशकत्वे तु गौरवमत आह—चरमफलस्य वेति। तथा च चरमफले वैजा(१)त्यं कल्पयित्वा तेन रूपेण नाशकत्वमिति भावः।

दृढतरसंस्कारेति। यन्मते स्मरणेन संस्कारः तद्द्वारा स्मरणं तेन च संस्कारान्त-रमिति तन्मते दृढतरः संस्कार उत्पत्तुं प्रभवति यन्मते च अनुभवजन्यसंस्कारेणैव स्मरण-परम्परा तन्मते न दृढतरसंस्कारोत्पत्तिसम्भव इति।

दार्ढ्यपदार्थत्वादिति। तथा च पुनः पुनः स्मरणान्न दृढसंस्कारोत्पत्तिः। किन्तु-विद्यमानसंस्कारस्यैव पुनः पुनः स्मरणेन झटिति उद्बोधकसमवधानं जायते उद्बुद्धसंस्का-रात् स्मरणान्तरमिति भावः।

आन्तरालिकस्मरणानामिति। अनुभवचरमस्मरणमध्यभाविनां स्मरणानामित्यर्थः।

व्यभिचारसंशय इति। अनुभवत्वेन हेतुत्वे व्यभिचारसंशय इत्यर्थः।

इति स्मृतिप्रक्रिया।

जन्यसाक्षात्कारत्वादिति। ईश्वरीयसाक्षात्कारे व्यभिचारवारणाय जन्येति।

तादृशेति। आत्मवृत्तीत्यर्थः। असमवायिकारणसंयोगेति। दुःखं खासमवायि-

---

(२) वैजात्यमिति—संस्कारनाशकारणता किञ्चिद्धर्मावच्छिन्ना कारणतावात्, तथाकारकमित्यर्थः। अन्यथा—चरमफलस्य नाशकारणतावच्छेदकतयानुगतत्वात् नाशकत्वं न स्यादिति भावः।

अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते ॥ ८५ ॥

तत्र मनसोऽणुत्वे प्रमाणमाह—अयौगपद्यादिति। ज्ञानानां—चाक्षुषरासनादीनाम्, अयौगपद्यम्—एककालोत्पत्तिर्नास्तीत्यनुभवसिद्धम्। तत्र नानेन्द्रियाणां सत्यपि विषयसंनिधाने यत्सम्बन्धादेकेनेन्द्रियेण ज्ञानमुत्पद्यते, यदसम्बन्धाच्च परैर्ज्ञानं नोत्पद्यते तन्मनः। विभुत्वे चासंनिधानं न सम्भवतीति न विभु मनः।

न च तदानीमदृष्टविशेषोद्बोधकविलम्बादेव तज्ज्ञानविलम्ब इति वाच्यम्, तथा सति चक्षुरादीनामप्यकल्पनापत्तेः। न च दीर्घशष्कुलीभक्षणादौ नानावधानभाजां च कथमेकदाऽनेकेन्द्रियजन्यं ज्ञानमिति वाच्यम्, मनसोऽतिलाघवात्त्वरया नानेन्द्रियसम्बन्धान्नानाज्ञानोत्पत्त्या उत्पलशतपत्रभेदादिव यौगपद्यप्रत्ययस्य भ्रान्तत्वात्।

न च मनसः सङ्कोचविकाशशालित्वादुभयोपपत्तिरस्त्विति वाच्यम्, नानावयवतन्त्राणादिकल्पने गौरवाल्लाघवान्निरवयवस्याणुरूपस्यैव मनसः कल्पनादिति संक्षेपः ॥८५॥ इति मनो निरूपणम्।

इति द्रव्यपदार्थो व्याख्यातः।

अथ गुणनिरूपणप्रकरणम्।

द्रव्यं निरूप्य गुणान्निरूपयति—

अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः।

मुक्तावलीमयूखः।

कारणकं भावकार्यत्वात् घटवत् इत्यनुमानेन दुःखासमवायिकारणसंयोगसिद्धौ दुःखासमवायिकारणसंयोगः किञ्चिदाश्रितः संयोगत्वादित्यनुमानेन मनसः सिद्धिरित्यर्थः।

दीर्घशष्कुलीभक्षणेति। तत्र घ्राणजरासनचाक्षुषज्ञानानि युगपज्जायन्ते।

भ्रान्तत्वादिति। अव्यवहितकालोत्पत्तिकत्वस्य दोषत्वादिति भावः।

उभयोपपत्तिरिति। मनसः सङ्कोचे एवेन्द्रियमात्रसम्बन्धादेकमेव ज्ञानं विकासे तु नानेन्द्रियैर्मनसः सम्बन्धाद्युगपन्नानाज्ञानानामुत्पत्तिरिति भावः।

यद्यपि नानेन्द्रियैर्मनसः सान्निकर्षकाले चाक्षुषाद्युत्पत्तिकाले रासनाद्यनुत्पादस्य रासनादिकं प्रति चाक्षुषसामग्र्याः प्रतिबन्धकत्वेनैवोपपत्तेर्मनसो विभुत्वे बाधकाभावस्तथापि तथा प्रतिबन्ध्यप्रतिबन्धकभावकल्पने गौरवान्मनसोऽणुत्वमेवाभ्युपेयमिति।

न च स्वमनोयोगस्य ज्ञानमात्रहेतुत्वाच्चाक्षुषसामग्रीकाले स्पार्शनसामग्र्या नियमतः सत्त्वात् स्पार्शनापत्तिर्मनसोऽणुत्वपक्षे दुर्वारेति वाच्यम्। अनन्यगत्या स्पार्शनं प्रति चाक्षुषसामग्र्याः प्रतिबन्धकत्वस्वीकारात् एवमपि रासनप्रत्यक्षे चाक्षुषसामग्रीप्रतिबन्धकाभावकल्पनप्रयुक्तलाघवस्याणुत्वपक्षे निष्प्रत्यूहत्वादिति तत्त्वम् ॥ ८५ ॥

इति मनो निरूपणम्।

अवसरसङ्गतिमभिप्रेत्याह—द्रव्यं निरूप्येति। तस्मिन्निरूपिते प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्तेरिति भावः।

अथेत्यादिना। गुणत्वजातौ किं मानमिति चेत्, द्रव्यकर्मभिन्नेसामान्यवति या कारणता सा किञ्चिद्धर्मावच्छिन्ना—निरवच्छिन्नकारणतायाऽसम्भवात्। न हि रूपत्वादिकं सत्ता वा तत्रावच्छेदिकान्यूनाधिकदेशवृत्तित्वात्। अतश्चतुर्विंशत्यनुगतं किञ्चिदाच्यं, तदेव गुणत्वमिति।

द्रव्याश्रिता इति। यद्यपि द्रव्याश्रितत्वं न लक्षणं कर्मादावतिव्याप्तेः, तथापि द्रव्यत्वव्यापकतावच्छेदकसत्ताभिन्नजातिमत्त्वं तदर्थः। भवति हि गुणत्वं द्रव्यत्वव्यापकतावच्छेदकं तद्वत्ता च गुणानामिति। द्रव्यत्वं कर्मत्वं वा न द्रव्यत्वव्यापकतावच्छेदकं, गगनादौ द्रव्यकर्मणोरभावात्, द्रव्य [illegible] सामान्यवत्त्वे सति सामान्यवत्त्वं, कर्मणो न कर्मान्यत्वं, द्रव्यस्य न निर्गुणत्वमिति तत्र नातिव्याप्तिः। 'निष्क्रिया' इति स्वरूपकथनं न तु लक्षणं गगनादावतिव्याप्तेः।

रूपं रसः स्पर्शगन्धौ परत्वमपरत्वकम् ॥ ८६ ॥
द्रवत्वस्नेहवेगाश्च मता मूर्तगुणा अमी।

वेगा इति। वेगेन स्थितिस्थापकोऽप्युपलक्षणीयः। मूर्तगुणा इति। अमूर्तेषु न वर्तन्त इत्यर्थः। लक्षणं तु तावदन्यान्यत्वम्। एवमग्रेऽपि।

मुक्तावलीमयूखः।

ननु गुणत्वस्य रूपादिषु स्वसमवेतसमवायसम्बन्धेन प्रत्यक्षसम्भवादनुमानप्रमाणोपन्यासोऽयुक्त इति चेन्न, अतीन्द्रियरूपादौ तत्प्रत्यक्षासम्भवेन तत्साधारण्यं गुणत्वस्य न घटते इत्यनुमानोपन्यास इत्याशयात्।

गुणत्वमिति। वस्तुतस्तु पारिमाण्डल्यस्य काप्यकारणतया गुणत्वस्य तत्रापि सत्त्वेन तादृशकारणतातिरिक्तवृत्तित्वेन तादृशकारणतावच्छेदकतया न गुणत्वजातिसिद्धिसम्भवः। किन्तु गुणपदशक्यतावच्छेदकतया तत्सिद्धिरिति बोध्यम्।

द्रव्यत्वव्यापकतावच्छेदकेति। द्रव्यत्वसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकेत्यर्थः। द्रव्यत्वाधिकरणं घटादिकं तन्निष्ठोभावः गुणो नास्ति सत्तावान्नास्तीति न भवति गुणस्य सत्तावत्त्व तत्र वृत्तेः किन्तूदासीन एवाभावस्तथात्वप्रतियोगितावच्छेदकं पटत्वादिकमनवच्छेदकं गुणत्वं सत्ता च तत्र सत्तायां सत्तासामान्यत्वाभावात् द्रव्यत्वव्यापकतावच्छेदकसत्ताभिन्नगुणत्वजातिमत्त्वं गुणे इति समन्वयः।

उपलक्षणीय इति। वेगपदं भावनान्यसंस्कारपरमिति भावः। वेगवेति चकारेण गुरुत्वस्य संग्रहः।

ननु मूर्तगुणत्वं मूर्तवृत्तिगुणत्वं तच्च संख्यादावतिव्याप्तमतआह—अमूर्तेषु न वर्तन्त इति।

तावदन्यान्यत्वमिति। ता(१)वत्त्वावच्छिन्नप्रतियोगिताकभेदावच्छिन्नप्रतियोगिताकभेदवत्त्वम् इत्यर्थः एतदन्यतमत्वमिति यावत्॥ ८६-८८ ॥

---

(१) समन्वयस्तु—यावन्त रूपादयो दशमूर्तगुणास्तावत्त्वावच्छिन्नप्रतियोगिताकभेदावच्छिन्नं मूर्तेतरसकलगुणादिः तत्प्रतियोगिताक भेदवत्त्वं मूर्तगुणेषु इति।

धर्माधर्मौ भावना च शब्दो बुद्ध्यादयोऽपि च ॥ ८७ ॥
एतेऽमूर्तगुणाः सर्वे विद्वद्भिः परिकीर्तिताः ।

अमूर्तगुणा इति । (१)मूर्तेषु न वर्तन्त इत्यर्थः ।

संख्यादयो विभागान्ता उभयेषां गुणा मताः ॥ ८८ ॥

उभयेषामिति । मूर्तामूर्तगुणा इत्यर्थः । ८६-८७-८८ ॥

संयोगश्च विभागश्च संख्या द्वित्वादिकास्तथा ।
द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः ॥ ८९ ॥

अनेकाश्रिता इति संयोगविभागद्वित्वादीनि द्विवृत्तीनि । त्रित्वचतुष्ट्वादिकं त्रिचतुरादिवृत्तीति बोध्यम् ॥ ८९ ॥

अतः शेषगुणाः सर्वे मता एकैकवृत्तयः ।

अत इति । रूपरसगन्धस्पर्शैकत्वपरिमाणैकपृथक्त्वपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दा इत्यर्थः ।

बुद्ध्यादिपदकं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः ॥ ९० ॥
अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः ।

बुद्ध्यादेति । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्ना इत्यर्थः । स्पर्शान्ताः-रूपरसगन्धस्पर्शा इत्यर्थः । द्रवो-द्रवत्वम् । वैशेषिकाः-विशेषा एव वैशेषिकाः । स्वार्थे ठक् । विशेषगुणा इत्यर्थः ।

द्विपृथक्त्वमिति । द्वयोः पृथक्त्वं 'घटाद्दण्डाटौ पृथक्' इतिप्रतीतेर्द्विपृथक्त्वं विषयः । नन्वनेकाश्रितत्वं संयोगादावव्याप्तमनेकपदस्य बहुत्वविशिष्टे शक्तेरत आह—संयोगविभागद्वित्वेति ॥ ८९ ॥

स्वार्थे ठगिति । त्रिचतुरादित्वादिति शेषः । विशेषगुणत्वं च भावनान्यो यो वायुवृत्तिस्पर्शवृत्तिधर्मसमवायी तदन्यत्वे सति गुरुत्वाजलद्रवत्वान्यगुणत्वम् । तथा हि वायुवृत्तयः स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्काराः तद्वृत्तयः स्पर्शवृत्तयश्च धर्माः संख्यात्वादयः तत्समवायिनः संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्काराः समवायिनि भावनान्यत्वविशेषणाद् भावनाभिन्नः संस्कार इह ग्राह्यः तदन्यत्वमेतद्वृत्तिरिषेषु रूपादिषु इति समन्वयः । गुरुत्वे नैमित्तिकद्रवत्वे चातिव्याप्तिवारणाय गुरुत्वाजलद्रवत्वान्यगुणत्वमिति विशेष्यदलम् । जात्यादावतिव्याप्तिवारणाय गुणत्वेति । सांसिद्धिकद्रवत्वसंग्रहायाह अजलेति । संख्यादिवारणाय सत्यन्तम् । भावनायामव्याप्तिवारणायायमन्यान्तं सत्यन्तघटकसमवायिविशेषणम् । सत्तादिकमादायासम्भववारणाय स्पर्शसंग्रहाय च स्पर्शवृत्तीति । यद्वा विशेषगुणत्वं द्रव्यविभाजकोपाधिद्वयसामानाधिकरण्यवृत्तिद्रव्यकर्मावृत्तिजातिमत्त्वम् । द्रव्यस्य विभाजकमुपाधिद्वयं पृथिवीत्वजलत्वा-

---

(१) ननु अमूर्तगुणत्वं अमूर्तवृत्तिगुणत्वं तच्च गगनादिगतैकत्वेऽतिव्याप्तमत आह—मूर्तेषु इत्यादि । तथाच-धर्माधर्मादिदशामूर्तगुणत्वावच्छिन्नप्रतियोगिताकभेदवच्छिन्नप्रतियोगिताकभेदत्वं अमूर्तगुणत्वम् इति लक्षणं निष्पन्नम् ।

संख्यादिरपरत्वान्तो द्रवोऽसांसिद्धिकस्तथा ॥ ९१ ॥
गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्तिताः ।

संख्येति । संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानीत्यर्थः ।

संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च ॥ ९२ ॥
एते तु द्वीन्द्रियग्राह्याः,

द्वीन्द्रियेति । चक्षुषा त्वचापि ग्रहणयोग्यत्वात् ।

अथ स्पर्शान्तशब्दकाः ।

बाह्यैकैकेन्द्रियग्राह्याः;

बाह्येति । रूपादीनां चक्षुरादिग्राह्यत्वात् ।

गुरुत्वाद्दृष्टभावनाः ॥ ९३ ॥
अतीन्द्रिया, विभूनां तु ये स्युर्वैशेषिका गुणाः ।
अकारणगुणोत्पन्ना एते तु परिकीर्तिताः ॥ ९४ ॥

विभूनामिति । बुद्धिसुखदुःखेच्छाद्वेषयत्नधर्माधर्मभावनाशब्दा इत्यर्थः । अकारणेति । कारणगुणेन कार्ये ये गुणा उत्पद्यन्ते ते कारणगुणपूर्वका रूपादयो वक्ष्यन्ते, बुद्ध्यादयस्तु न तादृशा आत्मादेः कारणाभावात् ॥९०-९४॥

अपाक(१)जास्तु स्पर्शान्ता द्रवत्वं च तथाविधम् ।
स्नेहवेगगुरुत्वैपृथक्त्वपरिमाणकम् ॥ ९५ ॥
स्थितिस्थापक इत्येते स्युः कारणगुणोद्भवाः ।

दितरसमानाधिकरणः संयोगसंख्यादिस्तन्निवृत्तिरविद्यमाना तथा द्रव्यकर्मणोरप्यविद्यमाना या रूपादिकतिपयगुणेषु विद्यमानाजातिस्तादृशजातिमत्त्वं पूर्वोक्तविशेषगुणेष्विति समन्वयः ।

सामान्यगुणत्वं च रूपस्पर्शान्यत्वे सति द्रव्यविभाजकोपाधिव्याप्यतावच्छेदकसंयोगविभागवेगद्रवत्वावृत्तिजातिशून्यगुणत्वम् । द्रव्यविभाजकोपाधिः पृथिवीत्वादिः तद्व्याप्यतावच्छेदकं च गन्धत्वादि तच्छून्यत्वस्य सख्यादौ सत्त्वाल्लक्षणसमन्वयः । अलीयशुक्लरूपे, वायोरनुष्णाशीतस्पर्शे, चातिव्याप्तिवारणाय सत्यन्तम् । कर्मादौ तद्वारणाय विशेष्यम् । पृथिवीत्वादिव्याप्यतावच्छेदकतत्तत्संख्यात्वादिशून्यत्वस्य तत्तत्संख्यायामभावादव्याप्तिवारणाय जातिपदम् । शब्दविशेषजनकतावच्छेदकजात्यवच्छिन्नकठिनावयवद्रव्यविभागे, तेजोवेगातिशये, ऽत्यन्ताग्निसंयोगानाश्यतावच्छेदकवैजात्यावच्छिन्नघृतादिवृत्तिद्रवत्वे, चाव्याप्तिवारणायावृत्त्यन्तं जातिविशेषणमिति ध्येयम् ।

स्नेहपदचेतिमूले—स्नेहपदं वेगस्याप्युपलक्षणम् ॥ ९०-९२ ॥

एकेन्द्रियग्राह्यत्वं । एकेन्द्रियग्रहणयोग्यत्वमित्यर्थः । तेनातीन्द्रियरूपादौ इन्द्रियग्राह्यत्वाभावेऽपि नाव्याप्तिः । स्पर्शान्ताः । रूपरसगन्धस्पर्शाः ॥ ९३-९५ ॥

---

(१) अपाकजाः-विलक्षणतेजः संयोगजन्याः ।

अपाकजास्त्विति। पाकजरूपादीनां कारणगुणपूर्वकत्वाभावात् अपाकजा इत्युक्तम्। तथाविधम् अपाकजम्। तथैकत्वमपि वोध्यम्।

संयोगश्च विभागश्च वेगश्चैते तु कर्मजाः ॥ ९६ ॥

संयोगश्चेति। कर्मजन्यत्वं यद्यपि न साधर्म्यं-घटादावतिव्याप्तेः, संयोगजसंयोगेऽव्याप्तेश्च, तथा(१)पि कर्मजन्यवृत्तिगुणत्वव्याप्यजातिमत्त्वं वोध्यम्। एवमन्यत्राप्यूह्यम् ॥ ९५-९६ ॥

स्पर्शान्तपरिमाणैकपृथक्स्नेहशब्दके।
भवेदसमवायित्वम्,

स्पर्शान्तेति। एकपृथक्त्वमित्यत्र त्वप्रत्ययस्य प्रत्येकमन्वयादेकत्वं पृथक्त्वं च ग्राह्यम्। पृथक्त्वपदेन चैकपृथक्त्वम्। भवेदसमवायित्वमिति। घटादिरूपरसगन्धस्पर्शाः कपालादिरूपरसगन्धस्पर्शेभ्यो भवन्ति। एवं कपालादिपरिमाणादीनां घटादिपरिमाणाद्यसमवायिकारणत्वम्। शब्दस्यापि द्वितीयशब्दं प्रति। एवं स्थितिस्थापकैकपृथक्त्वयोरपि ज्ञेयम्।

अथ वैशेषिके गुणे ॥ ९७ ॥

आत्मनः स्यान्निमित्तत्वम्,

निमित्तत्वमिति। बुद्ध्यादीनामिच्छादिनिमित्तत्वादिति भावः।

उष्णस्पर्शगुरुत्वयोः।
वेगेऽपि च द्रवत्वे च संयोगादिद्वये तथा ॥ ९८ ॥
द्वित्वेऽपि कारणत्वं स्याद्,

द्वित्वेऽपीति। असमवायिकारणत्वं निमित्तकारणत्वं च। यथाहि-उष्णस्पर्शं उष्णस्पर्शस्यासमवायिकारणं, पाकजे निमित्तम्। गुरुत्वं गुरुत्वपतनयोरसमवायिकारणं, प्रतिघाते निमित्तम्। वेगो वेगस्पन्दनयोरसमवायी, अभिघाते निमित्तम्। द्रवत्वं द्रवत्वस्यन्दनयोरसमवायि, सङ्ग्रहे निमित्तम्। भेरीदण्डसंयोगः शब्दे निमित्तं, भेर्याकाशसंयोगेऽसमवायी। वंशदलद्वयविभागः शब्दे निमित्तं वंशदलाकाशविभागेऽसमवायीति।

अथ(१) प्रादेशिको भवेत्।
वैशेषिको विभुगुणः संयोगादिद्वयं तथा ॥ ९९ ॥
प्रादेशिकोऽव्याप्यवृत्तिः ॥ ९७-९८-९९ ॥

चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलम्भकम्।

---

(१) कर्मजन्ये संयोगे विभागे वेगे च वर्तमाना या गुणत्वव्याप्या संयोगत्वं विभागत्वं वेगत्वं जातिस्तद्वत्त्वस्य तत्र सत्त्वादिति। (२) अथेति-विभ्वोराकाशात्मनोः ये विशेषगुणाः शब्दज्ञानसुखदुःखेच्छाद्वेषभावनाधर्माधर्माः संयोगविभागौ च तेषां प्रादेशिकत्वं प्रदेशे भवत्वं-वैशेषिकाव्याप्यवृत्तिगुणत्वं साधर्म्यमित्यर्थः।

चक्षुरिति। रू(१)पत्वजातिस्तु प्रत्यक्षसिद्धा। रूपशब्दोल्लेखिनी प्रतीतिर्नास्तीति चेन्मास्तु रूपशब्दप्रयोगः, तथापि, नीलपीतादिष्वनुगतजातिविशेषोऽनुभवसिद्ध एव। रूपशब्दाप्रयोगेऽपि नीलो वर्णः पीतो वर्ण इति वर्णशब्दोल्लेखिनो प्रतीतिरस्त्येव। एवं नीलत्वादिकमपि प्रत्यक्षसिद्धम्।

न चैकैका एव नीलरूपाद्व्यक्तय इत्येकव्यक्तिवृत्तित्वान्नीलत्वादिकं न जातिरिति वाच्यम्, नीलो नष्टो रक्त उत्पन्न इत्यादिप्रतीतेर्नीलादेरुत्पादविनाशशालितया नानात्वात्, अन्यथा एकनीलनाशे जगदनीलमापद्येत।

न च नीलसमवायरक्तसमवाययोरेवोत्पाद्विषयकोऽसौ प्रत्यय इति वाच्यम्, प्रतीत्या समवायानुल्लेखात्। न च स एवायं नील इति प्रत्ययाल्लाघ(२)वाद्वैक्यमिति वाच्यम्, उक्तप्रत्ययस्य तज्जातीयविषयकत्वात्सैवेयं गुर्जरीतिवत्। लाघवं तु प्रत्यक्षबाधितम्, अन्यथा घटादीनामप्यैक्यप्रसङ्गादुत्पादविनाशबुद्धेः समवायालम्बनत्वापत्तेरिति। एतेन रसादिकमपि व्याख्यातम्।

चक्षुर्ग्राह्यमिति। चक्षुर्ग्राह्यविशेषगुण इत्यर्थः। एवमग्रेऽपि।

द्रव्यादेरिति। उपलम्भकमुपलब्धिकारणम्। इदमेव विवृणोति—

चक्षुषः सहकारि स्याच्छुक्लादिकमनेकधा ॥ १०० ॥

चक्षुष इति। द्रव्यगुणकर्मसामान्यानां चाक्षुषप्रत्यक्षं प्रति उद्भूतरूपं कारणम् शुक्लादीति। तच्च रूपं शुक्लनीलपीतरक्तहरितकपिशकबुरभेदादनेकप्रकारकं भवति।

ननु कथं कबुरमतिरिक्तरूपं भवति। इत्थं—नीलपीताद्यवयवारब्धोऽवयवी न तावन्नीरूपो, अप्रत्यक्षत्वप्रसङ्गात्। नापि व्याप्यवृत्तिर्नीलादिकमुत्पद्यते, पीतावच्छेदेनापि नीलोपलब्धिप्रसङ्गात्। नाप्यव्याप्यवृत्ति नीलादिकमुत्पद्यते, व्याप्यवृत्तिजातीयगुणानामव्याप्यवृत्तित्वे विरोधात्। तस्मान्नानाजातीयरूपैरवयविनि विजातीयं चित्रं रूपमारभ्यते। अत एव 'एकं चित्रम्' इत्यनुभवोऽपि। नानारूपकल्पने गौरवात्। इत्थं च नीलादीनांपो ताद्यारम्भे

अन्याप्यवृत्तित्वम् स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वम्॥ ९६-९९ ॥

प्रतिबन्धकत्वकल्पनादिति। समवायेन नीलं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन नीलातिरिक्तरूपत्वेन, समवायेन पीतरूपं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन पीतातिरिक्तरूपत्वेन प्रतिबन्धकत्वमिति रीत्या प्रतिबध्यप्रतिबन्धकभावकल्पनात्। अन्यथा नानाजा-

(१) सर्वेषु रूपेषु रूपपदशक्तिग्रहाय अवश्यकल्पनीयायाः—सकलरूपोपस्थिति निर्वाहाय अवश्यकल्प्यसामान्यलक्षणाजन्य प्रत्यक्षप्रतीति सिद्धेत्यर्थः। अत्ररूपनिष्ठविशेष्यतासम्बन्धेन रूपत्वप्रकारकप्रत्यक्षं प्रति स्वविषय सामान्यत्वसम्बन्धेन रूपत्वज्ञानं कारणमिति तादृशकारणतायां विषयविषयाऽवच्छेदकतया रूपत्वजातिसिद्धिरिति ध्येयम्।

(२) ननु स एवायं नील इति प्रत्ययात् न तत्रैक्यनीलयोरभेदो विषयीक्रियते, अन्यथा—नीलनीलत्वादिव्यवहारविरोधप्रसंगात्, किन्तु तत्सजातीयत्वमेवेति न नीलव्यक्तीनामैक्यसिद्धिरित्याशङ्क्याहमाह लाघवाच्चेति।

प्रतियन्धकत्वकल्पनादवयविनि न पीताद्युत्पत्तिः। एतेन स्पर्शोऽपि व्याख्यातः।

रसादिकमपि नाव्याप्यवृत्ति, किन्तु नानाजातीयरसवदवयवैरारब्धेऽवयविनि रसाभावेऽपि न क्षतिः। तत्र रसनयाऽवयवरस एव गृह्यते रसनेन्द्रियादीनां द्रव्यग्रहे सामर्थ्याभावादवयविनो नीरसत्वेऽपि क्षतेरभावात्।

नव्यास्तु तत्राव्याप्यवृत्त्येव नाना रूपं नीलादेः पीताद्विप्रतिबन्धकत्वकल्पने गौरवात्। अत एव—

लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते॥

इत्यादिशास्त्रमप्युपपद्यते।

न च व्याप्यवृत्त्यव्याप्यवृत्तिजातीययोर्द्वयोर्विरोधः, मानाभावात्।

न च लाघवादेकं रूपम्, अननुभवात्। अन्यथा घटादेरपि लाघवादैक्यं स्यात्। एतेन स्पर्शादिकमपि व्याख्यातमिति वदन्ति॥ १००॥

जलादिपरमाणौ तन्नित्यमन्यत्सहेतुकम्।

जलादीति। जलपरमाणौ तेजः परमाणौ च रूपं नित्यम्। पृथिवीपरमाणुरूपं तु न नित्यं तत्र पाकेन रूपान्तरोत्पत्तेः। नहि घटस्य पाकान्तरं तदवयवोऽपक्व उपलभ्यते। न हि रक्तकपालस्य कपालिका नीलावयवा भवति। एवं क्रमेण परमाणावपि पाकसिद्धेः। अन्यत्-जलतेजः परमाणुरूपभिन्नं रूपं, सहेतुकं—जन्यम्। रसं निरूपयति—

रसस्तु रसनाग्राह्यो मधुरादिरनेकधा॥ १०१॥
सहकारी रसज्ञाय नित्यतादि च पूर्ववत्।

रसस्त्विति। सहकारीति। रासनज्ञाने रसः कारणमित्यर्थः।

पूर्ववदिति। जलपरमाणौ रसो नित्योऽन्यः सर्वोऽपि रसोऽनित्य इत्यर्थः॥ गन्धं निरूपयति—

घ्राणग्राह्यो भवेद्गन्धो घ्राणस्यैवोपकारकः॥ १०२॥
सौरभश्चासौरभश्च स द्वेधा परिकीर्तितः॥

मुक्तावलीमयूखः।

तीयरूपवत्कपालारब्धे घटे नीलकपालावच्छेदेन पीतोत्पादस्य दुर्वारत्वादिति भावः।

स्पर्शोऽपि व्याख्यात इति। कोमलकठिनस्पर्शवदवयवाभ्यामारब्धे घटादौ स्पर्शानङ्गीकारे घटस्य त्वचप्रत्यक्षापत्तिः त्वगिन्द्रियजन्यद्रव्यप्रत्यक्षे समवायेन स्पर्शस्य कारणत्वादिति चित्रस्पर्शोऽपि स्वीकार्य इति भावः।

नन्वव्याप्यवृत्तिजातिसम्बन्धेन नीलं प्रति समवायेन नीलस्य हेतुतास्वीकारेणैव नानाजातीयरूपवत्कपालारब्धे घटे पीतकपालावच्छेदेन नीलापत्तिवारणसम्भवे पूर्वोक्तप्रतिबन्ध्यप्रबन्धकभावकल्पने गौरवमित्याशयेनाह—नव्यास्त्विति॥ १००-१०३॥

घ्राणग्राह्य इति। उपकारक इति। घ्राणजन्यज्ञाने सहकारिकारणमित्यर्थः। सर्वोऽपि गन्धोऽनित्य एव ॥ १०१-१०२ ॥

स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः ॥ १०३ ॥
अनुष्णाशीतशीतोष्णभेदात्स त्रिविधो मतः।
काठिन्यादि क्षितावेव नित्यतादि च पूर्ववत् ॥ १०४ ॥

स्पर्श इति। उपकारक इति। स्पार्शनप्रत्यक्षे स्पर्शः कारणमित्यर्थः॥ १०३॥

अनुष्णाशीतेति। पृथिव्यां वायौ च स्पर्शोऽनुष्णाशीतः, जले शीतः, तेजस्युष्णः।

काठिन्येति। कठिनत्वकारणत्वं पृथिव्यामेवेत्यर्थः। कठिनत्वादिकं नित्यास्तद्भिन्नास्त्वनित्या इत्यर्थः ॥ १०४ ॥

एतेषां पाकजत्वं तु क्षितौ नान्यत्र कुत्रचित्।
तत्रापि परमाणौ स्यात्पाको वैशेषिके नये ॥ १०५ ॥

एतेषामिति। एतेषां रूपरसगन्धस्पर्शानाम्।

नान्यत्रेति। पृथिव्यां हि रूपरसगन्धस्पर्शपरावृत्तिरग्निसंयोगादुपलभ्यते। न हि शतधापि ध्मायमाने जले रूपादिकं परिवर्तते। नारे सौरभमौष्ण्यं चान्वयव्यतिरेकाभ्यामौपाधिकमेवेति निर्णीयते—पवनपृथिव्योः शीतस्पर्शादिवत्।

तत्रापि पृथिवीष्वपि परमाणावेव रूपादीनां पाक इति वैशेषिका वदन्ति।

तेषामयमाशयः—अवयविनावष्टब्धेष्ववयवेषु पाको न सम्भवति, परन्तु वह्निसंयोगेनावयविषु विनष्टेषु स्वतन्त्रेषु परमाणुषु पाकः। पुनश्च पक्वपरमाणुसंयोगाद् द्व्यणुकादिक्रमेण पुनर्महावयविपर्यन्तमुत्पत्तिः। तेजसामतिशयितवेगवशात्पूर्वव्यूहनाशो झटिति व्यूहान्तरोत्पत्तिश्चेति।

मुक्तावलीमयूखः।

न संयोगनिष्ठ इति। 'कठिनः संयोगः' इति प्रतीतिस्तु कठिनस्पर्शवद्द्रव्यप्रतियोगिकत्वमवगाहते इति भावः।

ध्मायमाने इति। अग्निसंयुक्ते इत्यर्थः।

पाक इति। रूपरसगन्धस्पर्शानां परावृत्तिरित्यर्थः।

पाको न सम्भवतीति। रूपादिपरावृत्तिफलकस्तेजःसंयोगो न भवतीत्यर्थः। रूपनाशं प्रति साक्षात्परम्परासाधारणसर्वावयवावच्छेदेन तेजःसंयोगः कारणमिति कार्यकारणभावादवयविनाऽवष्टब्धेषु अवयवेषु सत्सु सर्वावयवावच्छेदेन तेजःसंयोगरूपकारणाभावाद्रूपनाशासम्भवादिति भावः।

अत्र द्व्यणुकादिविनाशमारभ्य कतिभिः क्षणैः पुनरुत्पत्त्या रूपादिमद्द्रव्यमिति शिष्यबुद्धिवैशद्यार्थं क्षणप्रक्रिया।

तत्र विभागजविभागानङ्गीकारे नवक्षणा।

तदङ्गीकारे तु विभागः किञ्चित्सापेक्षो विभागं जनयेत् निरपेक्षस्य तत्त्वे कर्मत्वं स्यात्। संयोगविभागयोरनपेक्षं कारणं कर्मेति १।१।१७॥ वैशेषिकसूत्रम्। स्वोत्तरोत्पन्नभावान्तरानपेक्षत्वं तस्यार्थः, अन्यथा कर्मणाऽप्युत्तरसंयोगोत्पत्तौ पूर्वसंयोगनाशापेक्षणाद्व्याप्तिः स्यात्। तत्र यदिद्रव्यारम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात्तदा दशक्षणा।

अथद्रव्यनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात्तदैकादशक्षणा।

अथ नवक्षणा। तथाहि बहिसंयोगात्परमाणौ कर्म। ततः परमाण्वन्तरेण विभागः। तत आरम्भकसंयोगनाशः। ततो द्व्यणुकनाशः। १। ततः परमाणौ श्यामादिनाशः। २। ततो रक्तायुत्पत्तिः। ३। ततो द्रव्यारम्भानुगुणा क्रिया। ४। ततो विभागः। ५। ततः पूर्वसंयोगनाशः। ६। तत आरम्भकसंयोगः। ७। ततो द्व्यणुकोत्पत्तिः। ८। ततो रक्ताद्युत्पत्तिः। ९।

ननु श्यामादिनाशक्षणे रक्तोत्पत्तिक्षणे वा परमाणौ द्रव्यारम्भानुगुणा क्रियाऽस्त्विति चेद्—

न, अग्निसंयुक्ते परमाणौ यत्कर्म तद्विनाशमन्तरेण गुणोत्पत्तिमन्तरेण च परमाणौ क्रियान्तराभावात्-कर्मवति कर्मान्तरानुत्पत्तेर्निर्गुणे द्रव्ये द्रव्यारम्भानुगुणक्रियानुपपत्तेश्च।

तथापि परमाणौ श्यामादिनिवृत्तिसमकालं रक्ताद्युत्पत्तिः स्यादिति चेद्—न, पूर्वरूपादिध्वंसस्यापि रूपान्तरे हेतुत्वात्। इति नवक्षणा।

मुक्तावलीमयूखः।

न चावयविनाऽवष्टब्धेषु तेजः संयोगः कुतो न जायते इति वाच्यम्। एवं सति आरम्भकसंयोगावच्छेदेनावयविनि तेजःसंयोगोत्पादकाले तदवच्छेदेनावयवेष्वपि नोदनाभिघातयोरन्यतरस्य जननियमादवयवेषु विभागहेतुक्रियोत्पादेनारम्भकसंयोगनाशादवयविनाशापत्तेरिति भावः।

वैशद्यं—स्फीतता।

विभागजविभागानङ्गीकारे इति। इदमवधेयम्। विभागजविभागोद्विधा कारणमात्रविभागात्कारणाकारणविभागः, कारणाकारणविभागात् कार्याकार्यविभागश्च।

आद्यस्तावत् यत्र कपाले कर्म ततः कपालद्वयविभागः ततः घटारम्भकसंयोगनाशः ततः घटनाशः ततस्तेनैव कपालविभागेन सकर्मणः कपालस्याकाशविभागो जन्यते सोऽयं कारणमात्रविभागात् कारणाकारणविभागः।

द्वितीयस्तु यत्र हस्तक्रियया हस्तावयविभागस्ततः शरीरेऽपि विभक्तप्रत्ययः इति

अथ द्वशक्षणा । सा च-आरम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागेन विभागजननने सति स्यात् । तथाहि-वह्निसंयोगात् द्व्यणुकारम्भके परमाणौ कर्म, ततो विभागः, तत आरम्भकसंयोगनाशः, ततो द्व्यणुकनाशविभागजविभागौ । १ । ततः श्यामनाशपूर्वसंयोगनाशौ । २ । ततो रक्तोत्पत्युत्तरसंयोगौ । ३ । ततो वह्निनोदनजन्यपरमाणुकर्मणो नाशः । ४ । ततोऽदृष्टवदात्मसंयोगाद् द्रव्यारम्भानुगुणा क्रिया । ५ । ततो विभागः । ६ । ततः पूर्वसंयोगनाशः । ७ । तत आरम्भकसंयोगः । ८ । ततो द्व्यणुकोत्पत्तिः । ९ । ततो रक्तोत्पत्तिः । १० । इति दशक्षणा ।

अथैकादशक्षणा—वह्निसंयोगात्परमाणौ कर्म, ततो विभागः, ततो द्रव्यारम्भकसंयोगनाशः, ततो द्व्यणुकनाशः । १ । ततो द्व्यणुकनाशविशिष्टं कालमपेक्ष्य विभागजविभागश्यामनाशौ । २ । ततः पूर्वसंयोगनानाशरक्तोत्पत्ती । ३ । तत उत्तरदेशसंयोगः । ४ । ततो वह्निनोदनजन्यपरमाणुकर्मनाशः । ५ । ततोऽदृष्टवदात्मसंयोगाद् द्रव्यारम्भानुगुणा क्रिया । ६ । ततो विभागः । ७ । ततः पूर्वसंयोगनाशः । ८ । ततो द्रव्यारम्भकोत्तरसंयोगः । ९ । ततो द्व्यणुकोत्पत्तिः । १० । ततो रक्ताद्युत्पत्तिः । ११ । इति ।

मध्यशब्दवेदकस्मादग्निसंयोगान्न रूपनाशोत्पादौ तावत्कालमेकस्याग्नेरस्थिरत्वात् । किञ्च नाशक एव यद्युत्पादकः, तदानीं रूपादावग्निनाशे नीरूपश्चिरं परमाणुः स्यात् । उत्पादकश्चेन्नाशकः, तदा रक्तोत्पत्तौ तदग्निनाशे रक्ततरता न स्यात् । इत्येकादशक्षणा ॥

अथ परमाण्वन्तरे कर्मचिन्तनात्पञ्चमादिक्षणेऽपि गुणोत्पत्तिः । तथाहि-एकत्र परमाणौ कर्म, ततो विभागः, तत आरम्भकसंयोगनाशकपरमाण्वन्तरकर्मणा । ततस्तु द्व्यणुकनाशः, परमाण्वन्तरकर्मजश्च विभाग इत्येकः कालः ।१।

मुक्तावलीमयूखः ।

सोऽयं विभागः कारणाकारणविभागात् कार्याकार्यविभाग इत्युच्यते शरीरस्य हस्तकार्यत्वात् तरोश्चाकार्यत्वादिति ।

न च कर्मणैव विभागोत्पत्तौ किमिति विभागेन विभागोत्पत्तिरिष्यते इति वाच्यम् । एकस्य कर्मणः आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्यानारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्य च विरोधादन्यथा विकसत्कमलकुड्मलभङ्गप्रसङ्गादिति परिभाषानिरूपणावसरे मुक्तावल्यां स्पष्टीभविष्यति । यदवच्छेदेन कर्मारम्भकसंयोगस्तदवच्छेदेन क्रियानुत्पत्त्या न विकसत्कमलकुड्मलभङ्गप्रसङ्ग इति तादृशनियमे मानाभावात् कारणमात्रविभागात् कारणाकारणविभागो नाङ्गीक्रियते किन्तु कर्मणैव तादृशविभाग इत्याशयेनाह—विभागजविभागानङ्गीकारे इति ।

विभागेन विभागजननने इति । कारणविभागेन कारणाकारणविभागजननने सतीत्यर्थः ।

ततः श्यामादिनाशः, विभागश्च पूर्वसंयोगनाश इत्येकः कालः। २। ततो रक्तोत्पत्तिर्द्रव्यारम्भकसंयोग इत्येकः कालः। ३। अथ द्व्यणुकोत्पत्तिः। ४। ततो रक्तोत्पत्तिः। ५। इति पञ्चक्षणा॥

द्रव्यनाश समकालं परमाण्वन्तरे कर्मचिन्तनात्षष्ठक्षणे गुणोत्पत्तिः तथाहि—परमाणुकर्मणा परमाण्वन्तरविभागः, तत आरम्भकसंयोगनाशः। अथ द्व्यणुकनाशपरमाण्वन्तरकर्मणी। १। अथ श्यामादिनाशः, परमाण्वन्तरकर्मजो विभागश्च। २। ततो रक्तोत्पत्तिः परमाण्वन्तरे पूर्वसंयोगनाशश्च। ३। ततः परमाण्वन्तरसंयोगः। ४। ततो द्व्यणुकोत्पत्ति। ५। अथ रक्तोत्पत्तिः। ६। इति षट्क्षणा॥

एवं श्यामनाशक्षणे परमाण्वन्तरे कर्मचिन्तनात्सप्तक्षणा। तथाहि—परमाणौ कर्म, ततः परमाण्वन्तरेण विभागः, तत आरम्भकसंयोगनाशः। ततो द्व्यणुकनाशः। १। ततः श्यामादिनाशपरमाण्वन्तरकर्मणी। २। ततो रक्तोत्पत्तिः, परमाण्वन्तरकर्मजविभागश्च। ३। ततः परमाण्वन्तरेण पूर्वसंयोगनाशः। ४। ततः परमाण्वन्तरसंयोगः। ५। ततो द्व्यणुकोत्पत्तिः। ६। ततो रक्तोत्पत्तिः। ७। इति सप्तक्षणा॥

एवं रक्तोत्पत्तिसमकालं परमाण्वन्तरे कर्मचिन्तनादष्टक्षणा। तथाहि—परमाणौ कर्म ततः परमाण्वन्तरविभागः, तत आरम्भकसंयोगनाशः, ततो द्व्यणुकनाशः। १। ततः श्यामनाशः। २। ततो रक्तोत्पत्तिपरमाण्वन्तरकर्मणी। ३। ततः परमाण्वन्तरकर्मजविभागः। ४। ततः पूर्वसंयोगनाशः। ५। ततः परमाण्वन्तरसंयोगः। ६। ततो द्व्यणुकोत्पत्तिः। ७। अथ रक्तोत्पत्तिः। इत्यष्टक्षणा॥ १०५॥

नैयायिकानां तु नये द्व्यणुकादावपीष्यते।

नैयायिकानामिति। नैयायिकानां मते द्व्यणुकादाववयविन्यपि पाको भवति। तेषामयमाशयः—अवयविनां सच्छिद्रत्वाद्बहेः सूक्ष्मावयवैरन्तः प्रविष्टावयवेष्ववष्टब्धेष्वपि पाको न विरुद्ध्यते। वैशेषिकमते अनन्तावयवितन्त्वाश्रयकल्पनेन गौरवात्। इत्थञ्च सोऽयं घट इत्यादि प्रत्यभिज्ञापि सङ्गच्छते। यत्र तु न प्रत्यभिज्ञा तत्रावयविनाशोऽपि स्वीक्रियत इति॥

सङ्ख्यां निरूपयितुमाह—

गणनाव्यवहारे तु हेतुः सङ्ख्याभिधीयते॥ १०६॥

गणनेति। गणनाव्यवहारासाधारणकारणं सङ्ख्येत्यर्थः॥ १०६॥

नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते।

मुक्तावलीमयूखः।

प्रत्यभिज्ञापि सङ्गच्छते इति। पूर्वावयविनाशे तु उत्तरोत्पन्नावयविपूर्वावयविनोरभेदाभावादभेदावगाहि प्रत्यभिज्ञा न स्यादिति भावः॥ १०४—१०५॥

द्वित्वादयः परार्धान्ता अपेक्षाबुद्धिजा मताः ॥ १७ ॥

नित्येष्विति । नित्येषु—परमाण्वादिषु एकत्वं नित्यम् । अनित्ये घटादावेकत्वमनित्यमित्यर्थः । द्वित्वादयो व्यासज्यवृत्तिसङ्ख्या अपेक्षाबुद्धिजन्याः ॥ १०७ ॥

अनेकाश्रयपर्याप्ता एते तु परिकीर्तिताः ।
अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः ॥ १०८ ॥

अनेकेति । यद्यपि द्वित्वादिसमवायः प्रत्येकं घटादावपि वर्तते, तथाप्येको द्वाविति प्रत्ययाभावात्, एको न द्वाविति प्रत्ययसद्भावाच्च द्वित्वादीनां पर्याप्तिलक्षणः कश्चन सम्बन्धोऽनेकाश्रयोऽभ्युपगम्यते ।

अपेक्षाबुद्धिनाशादिति । प्रथममपेक्षाबुद्धिः, ततो द्वित्वोत्पत्तिः, ततो विशेषणज्ञानं द्वित्वत्वनिर्विकल्पात्मकम्, ततो द्वित्वत्वविशिष्टप्रत्यक्षमपेक्षाबुद्धिनाशश्च, ततो द्वित्वनाश इति ।

यद्यपि ज्ञानानां क्षिणमात्रस्थायित्वं योग्यविभुविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वात्, तथाप्यपेक्षाबुद्धेः क्षिणावस्थायित्वं कल्प्यते अन्यथा निर्विकल्पककाले ऽपेक्षाबुद्धिनाशानन्तरं द्वित्वस्यैव नाशः स्यात्, न तु द्वित्वप्रत्यक्षं—तदानीं विषयाभावात्, विद्यमानस्यैव चक्षुरादिना ज्ञानजन-

---

[1]मुक्तावलीमयूखः ।

अपेक्षाबुद्धिजन्या इति । ननु प्रत्यक्षवृत्तिद्वित्वादेरपेक्षाबुद्धिजन्यत्वसम्भवेऽपि अतीन्द्रियगतद्वित्वादेर्नापेक्षाबुद्धिजन्यत्वसम्भवः । अतीन्द्रियार्थानामस्मदादेरप्रत्यक्षतया 'अयमेकः, 'अयमेक' इत्यपेक्षाबुद्धेरसम्भवादिति चेन्न; अतीन्द्रियगतद्वित्वोत्पत्तेयेऽस्मदादेरपेक्षाबुद्धेः कारणत्वासम्भवेऽपि ईश्वरीयापेक्षाबुद्धेरेव तत्र कारणत्वेन द्वित्वोत्पत्तिसम्भवात् ।

न च अतीन्द्रियगतद्वित्वस्येश्वरीयापेक्षाबुद्धिजन्यत्वे तदीयापेक्षाबुद्धेर्नित्यतया नाशासम्भवेन तादृशद्वित्वस्यापि नित्यत्वापत्तिः अपेक्षाबुद्धिनाशस्यैव द्वित्वनाशकत्वादिति वाच्यम् । तद्वित्वस्येश्वरीयापेक्षाबुद्धिसहकारिविशेषस्य क्षणविशेषस्य नाशादेव नाशोपपत्तेः क्षणविशेषस्येश्वरीयापेक्षाबुद्धिसहकारित्वानङ्गीकारे संयोगकालीनपरमाणुद्वित्वे स्पत्तेः पूर्वं तद्द्वित्वोत्पादापत्तेः ।

न 'चापेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपित' इति मूलविरोध इति वाच्यम् । अपेक्षाबुद्धिनाशाच्चेति मूलस्य आश्रयनाशोपलक्षकत्ववदीश्वरीयापेक्षाबुद्धिसहकारिविशेषक्षणविशेषोपलक्षकत्वस्वीकारेणादोषात् । तद्व्यक्तिमात्रनिरूढेदन्त्वावच्छिन्नविशेष्यतानिरूपितैकत्वप्रकारताशालिनी बुद्धिरपेक्षाबुद्धिः ॥ १०६-१०७ ॥

अनेकाश्रय इति । उभयाधाराश्रय इत्यर्थः । तथा च तादृशप्रतीतेर्न द्वित्ववद्भेदाधारतावच्छेदकत्वमेकत्वे विषयः किन्तु पर्याप्तिसम्बन्धेन द्वित्वं तद्भेदो वा एकत्वावच्छिन्ने प्रकारः । एवं च पर्याप्तिसम्बन्धेन द्वित्वस्य प्रत्येकसमवादेको द्वावित्यादि प्रत्ययस्यैको न द्वावितिप्रत्ययस्य चोपपत्तिरिति भावः ।

नोपगमात् । तस्माद् द्वित्वप्रत्यक्षादिकमपेक्षाबुद्धेर्नाशकं कल्प्यते ।

न चापेक्षाबुद्धिनाशात्कथं द्वित्वनाश इति वाच्यम्, कालान्तरे द्वित्वप्रत्यक्षाभावात्, अपेक्षाबुद्धिस्तदुत्पादिका तन्नाशात्तन्नाश इति कल्पनात् । अत एव तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वादिकं तेनैव गृह्यत इति कल्प्यते ।

न चापेक्षाबुद्धेर्द्वित्वप्रत्यक्षे कारणत्वमस्त्विति वाच्यम्, (१)लाघवेन द्वित्वं प्रत्येव कारणत्वस्योचितत्वात् । अतीन्द्रिये द्व्यणुकादावपेक्षाबुद्धियोगिनाम्, सर्गादिकालीनपरमाण्वादावीश्वरीयापेक्षाबुद्धिः, ब्रह्माण्डान्तरघटितयोगिनामपेक्षाबुद्धिर्वा द्वित्वादिकारणमिति ॥ १०८ ॥

अपेक्षाबुद्धिः कीदृशी इत्यत आह—

अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरिष्यते ।

अनेकेति । अयमेकोऽयमेक इत्याकारिका इत्यर्थः ।

इदं तु बोध्यम् । यत्रानियतैकत्वज्ञानं तत्र त्रित्वादिभिन्ना बहुत्वसङ्ख्योत्पद्यते, यथा सेनावनादाविति कन्दलीकारः ।

(२)आचार्यास्तु त्रित्वादिकमेव बहुत्वं मन्यन्ते, तथाच त्रित्वत्वादिव्यापिका बहुत्वत्वजातिर्नोतिरिच्यते । सेनावनादावुत्पन्नेऽपि त्रित्वादौ त्रित्वत्वाद्यग्रहो दोषात् । इयं चेतो बहुतरेयं सेनेति प्रतीतिरुपपद्यते । (३)बहुत्वस्य सङ्ख्यान्तरत्वे तु तत्तारतम्याभावान्नोपपद्येतेत्यवधेयम् ॥

परिमाणं निरूपयति—

परिमाणं भवेन्मानव्यवहारस्य कारणम् ॥ १०९ ॥

परिमाणमिति । परिमितिव्यवहारासाधारणं कारणं परिमाणमित्यर्थः १०९

मुक्तावलीमूधः ।

लाघवेनेति । द्वित्वप्रत्यक्षत्वापेक्षया द्वित्वत्वस्य कार्यतावच्छेदकत्वे लाघवादिति भावः । द्वित्वं प्रति आश्रयगतैकत्वे असमवायिकारणम्, अपेक्षाबुद्धिर्निमित्तकारणम्, आश्रयीभूतं द्रव्यं समवायिकारणमिति विवेकः । उत्पन्नेऽपीति । अनियतैकत्वज्ञानस्यापि द्वित्वाद्युत्पादकत्वादिति भावः । दोषादिति । नियतानेकैकत्वज्ञानाभावरूपादित्यर्थः । यद्यपि अनियतानेकैकत्वज्ञानं त्रित्वोत्पत्तिकारणं तथापि त्रित्वविशेष्यकत्रित्वत्वप्रकारकप्रत्यक्षे नियतानेकैकत्वज्ञानस्य हेतुतया तं विना न त्रित्वत्वादिप्रकारकं प्रत्यक्षमित्याशयः ।

इतो बहुतरेति । इतो बहुतरेयत्र बहुत्वे स्वसजातीयनिरूपितोत्कर्षप्रतीत्या चतुष्ट्वादिरूपे बहुत्वे त्रित्वादिरूपबहुत्वापेक्षयोत्कर्षसत्त्वात् तादृशप्रतीतिरुपपद्यते इति भावः ।

तारतम्याभावादिति । त्वन्मते बहुत्वस्यैकरूपतया स्वसजातीयोत्कर्षाभावात् तारतम्यव्यवहारो न स्यादिति भावः ॥ १०८ ॥ १०९ ॥

---

(१) उपस्थितिलाघवमभिप्रेत्याह—लाघवेनेति । (२) तदवनाचार्यसिद्धान्तः ।
(३) कन्दलीकार मतं निरस्यति ।

अणु दीर्घं महद्ध्रस्वमिति तद्भेद ईरितः ।

तच्चतुर्विधम्—अणु महद् दीर्घं ह्रस्वं चेति ।

अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ॥ ११० ॥

सङ्ख्यातः परिमाणाच्च प्रचयादपि जायते ।

अनित्यं,

ततः—परिमाणम् । नित्यमित्यत्र परिमाणमित्यनुषज्यते । जायत इत्यत्रापि परिमाणमित्यनुवर्त्तते । अनित्यमिति पूर्वेणान्वितम् । तथा चानित्यपरिमाणं संख्याजन्यं परिमाणजन्यं प्रचयजन्यं चेत्यर्थः ॥

तत्र सङ्ख्याजन्यमुदाहरति—

द्व्यणुकादौ तु सङ्ख्याजन्यमुदाहृतम् ॥ १११ ॥

द्व्यणुकादाविति । द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुकपरिमाणं वा न कारणं—परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमात् । द्व्यणुकपरिमाणं तु परमाणवणुत्वापेक्षया नोत्कृष्टम् । त्रसरेणुपरिमाणं तु न सजातीयम् । अतः परमाणौ द्वित्वसङ्ख्या द्व्यणुकपरिमाणस्य-द्व्यणुके त्रित्वसङ्ख्या च त्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः ॥ ११० ॥

परिमाणजन्यं परिमाणमुदाहरति—

परिमाणं घटादौ तु परिमाणजमुच्यते ।

परिमाणं घटादाविति । घटादिपरिमाणं कपालादिपरिमाणजन्यम् ॥

प्रचयजन्यमुदाहर्तुं प्रचयं निर्वक्ति—

प्रचयः शिथिलाख्यौ यः संयोगस्तेन जन्यते ॥ ११२ ॥

परिमाणं तूलकादौ,

मुक्तावलीमयूखः ।

अणुमहदिति । यद्यप्यणुत्वमेव ह्रस्वत्वमस्तु महत्त्वमेव दीर्घत्वमस्तु कुतं परिमाणचातुर्विध्येन यथापि तदवधिकतयाणुत्वेन प्रतीयमानेऽपि तदवधिकह्रस्वत्वस्यान्यव्यवहारात्; तदवधिकमहत्त्ववत्तया प्रतीयमानेऽपि तदवधिकदीर्घत्वस्यान्यव्यवहारात्परिमाणचातुर्विध्यमित्यवेयम् ।

परमाणौ द्वित्वसङ्ख्येति । नन्वेवं घटगतमहत्परिमाणस्यापि कपालगतद्वित्वसङ्ख्यैव कारणमस्त्विति चेन्न, द्वित्वसङ्ख्याया महत्त्वाजनकत्वात् अन्यथा द्व्यणुकपरिमाणस्य परमाणुगतद्वित्वजन्यतया महत्त्वं स्यात् । नचोक्तापत्तिभिया द्वित्वत्वेन द्वित्वस्याजनकत्वेऽपि कपालगतद्वित्वत्वेन घटपरिमाणजनकत्वमस्त्विति वाच्यम् । कपालगतमहत्त्वोत्कर्षेण घटगतमहत्त्वोत्कर्षस्यानुभविकया कपालगतमहत्त्वस्यैव घटपरिमाणजनकत्वौचित्यादिति तत्त्वम् ॥ ११०-११२ ॥

अचय इति ॥

परिमाणं चाश्रयनाशादेव नश्यतीत्याह—

नाशस्त्वाश्रयनाशतः ।

नाश इति । अर्थात्परिमाणस्यैव ।

न चावयविनाशः कथं परिमाणनाशकः सत्यप्यवयविनि त्रिचतुरपरमाणुविश्लेषे तदुपचये चावयविनः प्रत्यभिज्ञानेऽपि परिमाणान्तरस्य प्रायश्चसिद्धत्वादिति वाच्यम् ।

परमाणुविश्लेषे हि द्व्यणुकस्य नाशोऽवश्यमभ्युपेयस्तन्नाशे च असरेणुनाशः । एवं क्रमेण महावयविनो नाशस्यावश्यकत्वात्, सति च नाशकेऽनभ्युपगममात्रेण नाशस्यापलपितुमशक्यत्वात्, शरीरादावयवोपचयेऽसमवायिकारणनाशस्यावश्यकत्वादवयविनाश आवश्यकः ।

न च पटाविनाशेऽपि तन्त्वन्तरसंयोगात्परिमाणाधिक्यं न स्यादिति वाच्यम्,

तत्रापि येनावयविनातेनासमवायिकारणतन्तुसंयोगनाशात्पटनाशस्यावश्यकत्वात् । किञ्च तन्त्वन्तरस्य तत्पटावयवत्वे पूर्वं तत्पट एव न स्यात्, तन्त्वन्तरस्यारम्भकारणाभावात्, तन्त्वन्तरस्यावयवत्वाभावे च न तेन परिमाणाधिक्यं संयुक्तद्रव्यान्तरवत् ।

तस्मात्तत्र तन्त्वन्तरसंयोगे सति पूर्वं पटनाशस्ततः पटान्तरोत्पत्तिरित्यवश्यं स्वीकार्यम् । अवयविनः प्रत्यभिज्ञानं तु सादृश्येन दीपकलिकावत् ।

न च पूर्वतन्तव एव तन्त्वन्तरसहकारात्पूर्वपटे सत्येव पटान्तरमारभन्तामिति वाच्यम्,

मूर्तयोः समानदेशतविरोधात्तत्र पटद्वयासम्भवात्, एकदा नानाद्रव्यस्य तत्रोपलम्भस्य बाधितत्वाच्च । तस्मात्पूर्वस्य द्रव्यस्य प्रतिबन्धकस्य विनाशे द्रव्यान्तरोत्पत्तिरित्यस्यावश्यमभ्युपेयत्वात् ॥

पृथक्त्वं निरूपयति—

सङ्ख्यावत्तु पृथक्त्वं स्यात्पृथक्प्रत्ययकारणम् ॥ ११२ ॥

सङ्ख्यावदिति । पृथक्प्रत्ययसामान्यकारणं कारणं पृथक्त्वम् । तत्त्रित्वसङ्ख्यादिकं सङ्ख्यावत् । तथाहि—नित्येष्वेकत्वं नित्यम्, अनित्येऽनित्यमेकत्वमाश्रयद्वितीयक्षणे चोत्पद्यते आश्रयनाशादश्यति, तथैकपृथक्त्वमपि, द्वित्वादिवच्च द्विपृथक्त्वादिकमपीत्यर्थः ॥ ११२ ॥ ११३ ॥

मुक्तावलीमयूखः ।

अर्थादिति । प्रकरणादित्यर्थः ।

द्वितीयक्षणे चोत्पद्यते । द्व्यनन्तरं स्वाश्रयावयवगतैकत्वासमवायिकारणकं चेति पूरणीयम् ।

द्विपृथक्त्वमिति । ननु घटौ पटात्पृथगिति प्रतीतेः पटावधिकैकपृथक्त्वद्वयवदिनाप्यु-

अन्योन्याभावतो नास्य चरितार्थत्वमिष्यते ।
अस्मात्पृथगिदं नेति प्रतीतिर्हि विलक्षणा ॥ ११४ ॥

नन्वयमस्मात्पृथगित्यादावन्योन्याभावो भासते तत्कथं पृथक्त्वं गुणान्तरं स्वीक्रियते—

न चास्तु पृथक्त्वं न त्वन्योन्याभाव इति वाच्यम्, रूपं न घट इति प्रतीत्यनापत्तेः । न हि रूपे घटाधिकं पृथक्त्वं गुणान्तरमस्ति, न वा घटे घटाधिकं पृथक्त्वमस्ति, येन परम्परासम्बन्धः कल्प्येत इत्यत आह— अस्मादिति ।

ननु शब्दवैलक्षण्यमेव न त्वर्थवैलक्षण्यमिति चेद्—

न-विनार्थभेदं घटात्पृथगितिवद्घटो न पट इत्यत्रापि पञ्चमीप्रसङ्गात् । तस्माद्यदर्थयोगे पञ्चमी सोऽर्थो नञर्थान्योन्याभावतो भिन्नो गुणान्तरं कल्प्यत इति ॥ ११४ ॥

संयोगं निरूपयति—

अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः ।

मुक्तावलीमयूखः ।

पपत्तौ द्विपृथक्त्वादिकं नाङ्गीकर्तव्यमिति चेन्न । घटौ पटात्पृथगिति प्रतीत्योभयसमवेतद्विपृथक्त्वे सिद्धे तेनैव घटःपटात्पृथगितिप्रतीत्युपपत्तौ एकपृथक्त्वे मानाभाव इत्यस्यापि वक्तुं शक्यतया विनिगमनाविरहेणोभयोरप्यवश्यमङ्गीकर्तव्यत्वादिति ।

परम्परासम्बन्ध इति । सामानाधिकरण्यरूपपरम्परासम्बन्धविषयकत्वमङ्गीकृत्यान्योन्याभावानङ्गीकारे एतद्घटावधिकपृथक्त्वस्य एतद्रूपेऽसत्त्वेन समवायेन, एतद्घटावधिकपृथक्त्वस्यैतद्घटेऽसत्त्वेन परम्परासम्बन्धेन च पृथक्त्वस्यैतद्घटरूपेऽसत्त्वेन एतद्घटरूपमेतद्घटात्पृथगिति प्रतीत्यनुपपत्तिः । न च रूपावधिकस्य तद्रूपावधिकस्य वा पृथक्त्वस्य घटे सत्त्वात् स्वाधिकरणवृत्तित्वसम्बन्धेन घटनिष्ठं पृथक्त्वं रूपे वर्तते इति न दोष इति वाच्यम्, तथासति एतद्रूपमेतद्रूपात्पृथगिति प्रतीत्यापत्तेः । अन्योन्याभावस्यातिरिक्तस्याभ्युपगमे तु पृथक्पदस्यान्योन्याभावलक्षणया सर्वमुपपादनीयमिति भावः ।

गुणान्तरमिति । परे तु अन्योन्याभाव एव पृथक्त्वं न तु गुणान्तरम् । न च घटो नेत्यत्र पञ्चम्यापत्तिः, अन्योन्याभावविशिष्टार्थकपदयोग एव 'अन्यारादितरर्ते'—इति सूत्रेण पञ्चमीविधानात् नञस्त्वन्योन्याभावमात्रार्थकत्वस्य सिद्धान्ततत्त्वात् यदि च घटाद्भेद इत्यत्र पञ्चम्युपपत्तये 'अन्यारादि'ति सूत्रे अन्यपदेन अन्योन्याभावार्थकपदयोगेऽपि पञ्चमीप्रयोजकतया गृह्यत इति घटोनेत्यत्र पञ्चमी दुर्वारेत्युच्यते तदा निपातातिरिक्तान्योन्याभावार्थकपदयोगस्यैव पञ्चमीप्रयोजकत्वमभ्युपेयम् । अनुशासनस्य प्रयोगानुरोधित्वादिति दोषादिति वदन्ति ॥ ११३-११४ ॥

अप्राप्तयोरिति । अप्राप्तयोः अपृथक्सिद्धयोः या प्राप्तिः यः सम्बन्धः स संयोग

कीर्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्मजः ॥ ११५ ॥

अप्राप्तयोरिति। तं विभजते-कीर्तित इति। एषः-संयोगः ॥ ११५ ॥

तथोभयक्रियाजन्यो भवेत्संयोगजोऽपरः।
आदिमः श्येनशैलादिसंयोगः परिकीर्तितः ॥ ११६ ॥
मेषयोः सन्निपातो यः स द्वितीय उदाहृतः।

सन्निपातः-संयोगः। द्वितीयः-उभयकर्मजः ॥

कपालतरुसंयोगात्संयोगस्तरुकुम्भयोः ॥ ११७ ॥
तृतीयः स्यात्कर्मजोऽपि द्विधैव परिकीर्तितः।
अभिघातो नोदनं च शब्दहेतुरिहादिमः ॥ ११८ ॥
शब्दाहेतुर्द्वितीयः स्याद्,

तृतीय इति। संयोगजसंयोग इत्यर्थः। तृतीयः स्यादिति पूर्वेणान्वितम्। आदिमः-अभिघातः। द्वितीयो नोदनाख्यः संयोग इति ॥

विभक्तप्रत्ययासाधारणं कारणं विभागं निरूपयति—

विभागोऽपि त्रिधा भवेत्।
एककर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवोऽपरः ॥ ११९ ॥
विभागजस्तृतीयः स्यात्तृतीयोऽपि द्विधा भवेत्।
हेतुमात्रविभागोत्थो हेत्यहेतुविभागजः ॥ १२० ॥

विभाग इति।

एककर्मेति। तदुदाहरणं तु श्येनशैलविभागादिकं पूर्ववद् बोध्यम्। तृतीयोऽपि-विभागजविभागः कारणमात्रविभागजन्यः कारणाकारणविभागजन्यश्चेति त्रिविधः।

आद्यस्तावत्-यत्र कपाले कर्म ततः कपालद्वयविभागः, ततो घटारम्भ-

मुक्तावलीसमेतः।

इत्यर्थः। घटकपालयोः समवायस्य संयोगत्वनिरासाय अप्राप्तयोरिति। घटकपालौ न पृथक्स्थितौ कपाले एव घटोपलम्भादिति भावः।

संयोगजोऽपर इति। ननु संयोगजसंयोगे मानाभावः यत्र कपालक्रियाकपालतरुसंयोगः ततः कुम्भतरुसंयोगस्तत्रकपालक्रियायां एव कुम्भतरुसंयोगं प्रति कारणत्वं न तु कपालतरुसंयोगस्येति चेत्;

न, समवायेन संयोगं प्रति समवायेन क्रियायाः कारणत्वम् कुम्भे समवायेन क्रियाया अभावेन कुम्भे तरुसंयोगानुपपत्तेः क्रियायाः सामानाधिकरण्येन हेतुत्वान्तरकल्पनापेक्षया समवायेन संयोगस्यैव हेतुत्वकल्पनौचित्यादित्यलम्।

पूर्ववदिति। संयोगवदित्यर्थः ॥ ११५-११९ ॥

कसंयोगनाशः, ततो घटनाशः, ततस्तेनैव कपालविभागेन सकर्मणः कपालस्याकाशविभागो जन्यते, तत आकाशसंयोगनाशः, तत उत्तरदेशसंयोगः, ततः कर्मनाश इति।

न च तेत कर्मणैव कथं देशान्तरविभागो न जन्यत इति वाच्यम्, एकस्य कर्मण आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्यानारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्य च विरोधात्। अन्यथा विकसत्कमलकुड्मलभङ्गप्रसङ्गात्, तस्माद् यदीदमनारम्भकसंयोगप्रतिद्वन्द्विविभागं जनयेत्तदारम्भकसंयोगप्रतिद्वन्द्विविभागं न जनयेत्।

न च कारणविभागेनैव द्रव्यनाशात्पूर्वं कुतो देशान्तरविभागो न जन्यत इति वाच्यम्।

आरम्भकसंयोगप्रतिद्वन्द्विविभागघटोऽवयवस्य सति द्रव्ये देशान्तरविभागासम्भवात्।

द्वितीयस्तावत्-यत्र हस्तक्रियया हस्ततरुविभागस्ततः शरीरेऽपि विभक्तप्रत्ययो भवति, तत्र शरीरतरुविभागो हस्तक्रिया न कारणं-व्यधिकरणत्वात्। शरीरे तु क्रिया नास्त्येव-अवयवकर्मणो यावदवयवकर्मनियतत्वात्। अतस्तत्र कारणाकारणविभागेन कार्याकार्यविभागो जन्यत इति। अत एव विभागो गुणान्तरम्, अन्यथा शरीरे विभक्तप्रत्ययो न स्यात्। अतः संयोगनाशेन विभागो नान्यथासिद्धो भवति ॥ ११६-१२० ॥

परापरव्यवहारनिमित्ते परत्वापरत्वे निरूपयति—

परत्वं चापरत्वं च द्विविधं परिकीर्तितम्।
दैशिकं कालिकं चापि मूर्त एव तु दैशिकम् ॥ १२१ ॥

मुक्तावलीमयूखः।

आरम्भकेति। आरम्भकसंयोगः कपालद्वयसंयोगादिः तत्प्रतिद्वन्द्वी तन्नाशक इति यावत्।

विकसदिति। तत्राप्यवच्छेदेनारम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्मणः सत्त्वात्तेन कर्मणा मूलावच्छिन्नारम्भकसंयोगविरोधिविभागोत्पत्तिस्तेन चारम्भकसंयोगनाशस्तेन कमलनाशः स्यादिति भावः।

द्रव्यनाशात्पूर्वमिति। घटाद्यात्मकद्रव्यनाशात्पूर्वमित्यर्थः। तथाच पूर्वोक्तं 'ततो घटनाशः ततः कपालस्याकाशविभागो जन्यते' इत्यसङ्गतमिति भावः।

सति द्रव्ये-द्रव्यनाशं विनेत्यर्थः।

देशान्तरविभागासम्भवादिति। अन्यथा कारणमात्रविभागे संयोगविभागयोरनपेक्षं कारणं कर्मेति कर्मलक्षणस्यातिव्याप्त्यापत्तेः। कारणमात्रविभागस्य द्रव्यनाशमनपेक्ष्य विभागजनकत्वादिति भावः ॥ १२० ॥

मूर्त एव तु दैशिकमिति। विभुद्रव्ये विप्रकृष्टदेशमात्रवृत्तित्वसन्निकृष्टदेशमात्रवृत्तित्वबुद्धेर्निमित्तकारणस्य, दिक्संयोगस्यासमवायिकारणस्य चाभावादिति भावः।

परत्वं मूर्तसंयोगभूयस्त्वज्ञानतो भवेत् ।
अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम् ॥ १२२ ॥

परत्वमपरत्वं चेति । दैशिकमिति । दैशिकपरत्वं बहुतरमूर्तसंयोगान्तरितत्वज्ञानादुत्पद्यते, एवं तदल्पीयस्त्वज्ञानादपरत्वमुत्पद्यते । अत्रापेक्षाबुद्धेः पञ्चम्यपेक्षा, यथा पाटलिपुत्रात्काशीमपेक्ष्य प्रयागः परः पाटलिपुत्रात्कुरुक्षेत्रमपेक्ष्य प्रयागोऽपर इति ॥ १२१-१२२ ॥

तयोरसमवायी तु दिक्संयोगस्तदाश्रये ।

तयोर्दैशिकपरत्वापरत्वयोः । असमवायी—असमवायिकारणम् । तदाश्रये-दैशिकपरत्वापरत्वाश्रये ॥

दिवाकरपरिस्पन्दभूयस्त्वज्ञानतो भवेत् ॥ १२३ ॥
परत्वमपरत्वं तु तदीयाल्पत्वबुद्धितः ।
अत्र त्वसमवायी स्यात्संयोगः कालपिण्डयोः ॥ १२४ ॥

दिवाकरेति । अत्र परत्वमपरत्वं च कालिकं ग्राह्यम् । यस्य सूर्यपरिस्पन्दापेक्षया यस्य सूर्यपरिस्पन्दोऽधिकः स ज्येष्ठः, यस्य न्यूनः स कनिष्ठः । कालिकपरत्वापरत्वे जन्यद्रव्ये एव । अत्र—कालिकपरत्वापरत्वयोः ॥ १२३-१२४ ॥

सपेक्षाबुद्धिनाशेन नाशस्तेषां निरूपितः ।

तेषां-कालिकदैशिकपरत्वानाम् ॥

क्रमप्राप्तां बुद्धिं निरूपयितुमाह—

बुद्धेः सपक्षाः प्रागेव प्रायशो विनिरूपिताः ॥ १२५ ॥
अथावशिष्टोऽप्यपरः प्रकारः परिदर्श्यते ।

बुद्धेरिति ॥

अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते ॥ १२६ ॥

मुक्तावलीसमूहः ।

जन्य एवेति । अत्र जन्यपदं ग्राह्यान्तम्, नित्ये तत्संयोगासमवायिकारणेऽल्पत्वबुद्धेः तदनन्तरोत्पन्नपरत्वकनिष्ठत्वबुद्धेर्निमित्तकारणस्य, कालसंयोगरूपासमवायिकारणस्य नाशादिति भावः ।

अपेक्षाबुद्धिनाशेनेति । स्वनिमित्तकारणविप्रकृष्टत्वादिबुद्धीनां नाशेनेत्यर्थः ।

परे तु बहुतरसंयोगान्तरितत्वकविप्रकृष्टत्वासंयोगान्तरितत्वकपरत्वनिकृष्टत्वाभ्यां दैशिकपरत्वापरत्वव्यवहारस्य, बहुतरस्पन्दान्तरितजन्यत्वकज्येष्ठत्वासंतरस्पन्दान्तरितजन्यत्वकनिष्ठत्वाभ्यां च कालिकपरत्वव्यवहारस्योपपत्तेर्न तयोर्गुणान्तरत्वम् । अत्र च कालेऽपेक्षाबुद्धिरपेक्षते तारकाद्यादाय दूरान्न्यूनाधिकते अवगम्येते । अतो न कनिष्ठेऽधिकत्वबुद्धिरिति परत्वव्यवहारानुपपत्तिरिति वदन्ति ॥ १२१-१२२ ॥

तच्छून्ये तन्मतिर्या स्यादमथा सा निरूपिता ।
तत्प्रकारो विपर्यासः संशयोऽपि प्रकीर्तितः ॥ १२७ ॥

तथाप्रमां निरूपयति—तच्छून्य इति । तदभाववति तत्प्रकारकं ज्ञानं भ्रम इत्यर्थः ।

तत्प्रकारोऽप्रमाप्रकारः ॥ १२५ ॥ १२६ ॥ १२७ ॥

आद्यो देहेऽप्यात्मबुद्धिः शब्दादौ पीततामतिः ।
भवेन्निश्चयरूपा या,

आद्य इति । विपर्यास इत्यर्थः । शरीरादौ निश्चयरूपं यदात्मत्वप्रकारकं ज्ञानं गौरोऽहमित्याकारकम्, एवं शङ्खादौ पीतः शङ्ख इत्याकारकं यज्ज्ञानं निश्चयरूपं तद्भ्रम इति ॥

संशयोऽथ प्रदर्श्यते ॥ १२८ ॥

किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः ।
तदभावप्रकारा धीस्तत्प्रकारा तु निश्चयः ॥ १२९ ॥

किंस्विदिति । किंस्विदिति वितर्के ।

निश्चयस्य लक्षणमाह—तदभावेति । तदभावप्रकारकं तत्प्रकारकं ज्ञानं निश्चयः ॥ १२८ ॥ १२९ ॥

संशयं लक्षयति—

स संशयो मतिर्या स्यादेकत्रासावभावयोः ।
साधारणादिधर्मस्य ज्ञानं संशयकारणम् ॥ १३० ॥

स संशय इति । एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशय इत्यर्थः ।

साधारणेति । उभयसाधारणो यो धर्मस्तज्ज्ञानं संशयकारणम् । यथोच्चैस्त्वं स्थाणुपुरुषसाधारणं ज्ञात्वायं स्थाणुर्न वेति सन्दिग्धे ।

मुक्तावलीमयूखः ।

तदभाववतीति । तत्प्रकारकं ज्ञानमित्येतन्मात्रोक्तौ प्रमायामतिव्याप्तिरतस्तदभाववतीति । तदभाववद्विशेष्यकतदभावप्रकारकप्रमायामतिव्याप्तिवारणाय तत्प्रकारकमिति । इच्छायामतिव्याप्तिवारणाय ज्ञानमिति ॥ १२६–१२८ ॥

तदभावप्रकारकमिति । संशयेऽतिव्याप्तिवारणायेदम् । अत्र च तद्विशेष्यकत्वावच्छिन्नतदभावप्रकारतान्यतद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वघटज्ञानत्वं यत्र तत्र तत्तिश्चयत्वमवश्येयम् नन्वेवं यथाश्रुतम् 'महानयोऽयं वह्निमान्वा, पर्वतो वह्निमान्' इत्यत्र पर्वते वह्निनिश्चयस्यापत्तेः । ज्ञानपदमिच्छायामतिव्याप्तिवारणाय ।

एकधर्मिकेति । एकधर्मिकं ज्ञानं संशय इत्युक्तौ घटो द्रव्यं पृथिवी वेति ज्ञानेऽतिव्याप्तिरतोभावाभावेति । तदपर्याप्तौ वह्नितदभाववन्तौ इत्यत्रातिव्याप्तिवारणाय एकध-

एवमसाधारणधर्मज्ञानमपि कारणम्। यथा शब्दत्वस्य नित्यानित्यव्यावृत्तत्वं शब्दे गृहीत्वा शब्दो नित्यो न वेति सन्दिग्धे।

विप्रतिपत्तिस्तु शब्दो नित्यो न वेत्यादिशब्दात्मिका न संशयकारणम्, शब्दव्याप्तिज्ञानादीनां निश्चयमात्रजनकत्वस्वभावात्। किन्तु तत्र शब्देन कोटिद्वयज्ञानं जन्यते संशयस्तु मानस एवेति।

एवं ज्ञाने प्रामाण्यसंशयाद्विषयसंशय इति। एवं व्याप्यसंशयादपि

मुक्तावलीमयूखः।

मिकेति। वृक्षः संयोगवांस्तदभाववद्भिन्नेति समुच्चयवारणाय विरुद्धेति। इच्छाव्युदासार्थं विशेष्यदलम्। तथा च एकधर्मिकेत्यस्य एकधर्मितावच्छेदकविशिष्टविशेष्यकत्वावच्छिन्नेत्यर्थः, तेन पर्वतो वह्निमान् द्रव्यं वह्न्यभाववदिति ज्ञानव्युदासः।

वस्तुतस्तु एकधर्मावच्छिन्नविशेष्यकत्वानिवेशे पर्वतो वह्निमान् द्रव्यं वह्न्यभाववदिति ज्ञानेऽतिव्याप्तिः, निवेशे च निरवच्छिन्नविशेष्यतावच्छेदकताकसंशयासङ्ग्रहः इति स्वीयैककोटिप्रकारतावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूतापरकोटिप्रकारताशालिज्ञानत्वं संशयत्वमिति ध्येयम्।

न संशयकारणमिति। समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः इति हि गौतमं सूत्रम्, अयमर्थः समानधर्मः कोटिद्वयसहचरितधर्मः, साधारणो धर्मः ऊर्ध्वत्वादिकमिति यावत्, अनेकस्मात् सपक्षाद् विपक्षाच्च व्यावृत्तो धर्मः असाधारणो धर्मः नित्यानित्यव्यावृत्तशब्दत्वादिकमिति यावत्, तयोरुपपत्तेर्ज्ञानात् संशयः अर्थात् साधारणधर्मज्ञानमसाधारणधर्मज्ञानं च संशयजनकं, विप्रतिपत्तिः विरुद्धकोटिप्रतिपादकं वाक्यं शब्दो नित्यो नवेति रूपं संशयजनकम्, उपलब्धिः प्रामाण्यम्, अनुपलब्धिरप्रामाण्यं तयोरव्यवस्था संशयः प्रामाण्यसंशयः अप्रामाण्यसंशयश्च विषयसंशयकारणम् स्यात् व्याप्यसंशयजन्यो व्यापकसंशय इत्यादेः संग्रहः। विशेषापेक्षो विमर्श इति लक्षणम् एकधर्मिकभावाभावप्रकारकत्वरूपविशेषवान् विशेषापेक्षः विमर्शः ज्ञानमिति एव च साधारणासाधारणधर्मज्ञानस्यैव संशयजनकत्वे विप्रतिपत्तेः संशयाजनकत्वेन सूत्रविरोध इत्यत आह किन्त्विति—

मानस एवेति। तथा च विप्रतिपत्तेरित्यत्र पञ्चम्या न जन्यत्वमर्थः, किन्तु प्रयोज्यत्वमिति न सूत्रविरोध इति भावः।

प्रामाण्यसंशयादिति। प्रामाण्यमपदप्रामाण्यस्याप्युपलक्षणम्, तेन अप्रामाण्यसंशयादपि विषयसंशय इति लभ्यते।

व्याप्यसंशयादिति। ननु व्याप्यसंशयस्य व्यापकसंशयहेतुत्वे मानाभावः कोटिस्मरणादित एव तत्सम्भवादिति चेन्न महानसे हुताशो न जलह्रदे इति स्मरणवतः पर्वतमपि पश्यतः धूमसंशयसत्त्वासत्त्वाभ्यां हुताशनसंशयसत्त्वासत्त्वदर्शनाद् व्याप्यसंशयस्य व्यापकसंशयहेतुत्वसिद्धेरिति।

न च साधारणधर्मज्ञानादेः संशयजनकत्वे परस्परं व्यभिचार इति वाच्यम् कार्यतावच्छेदकेऽव्यवहितोत्तरत्वनिवेशेनादोषात्।

व्यापकसंशय इत्यादिकं वोध्यम्। किन्तु संशये धर्मिज्ञानं धर्मीन्द्रियसन्निकर्षो वा कारणमिति ॥ १३० ॥

दोषोऽप्रमाया जनकः, प्रमायास्तु गुणो भवेत्।

दोष इति। अप्रमां प्रति दोषः कारणम्, प्रमां प्रति गुणः कारणम्। तत्रापि पित्तादिरूपा दोषाः अननुगताः तेषां कारणत्वमन्वयव्यतिरेकाभ्यां सिद्धम्। गुणस्य प्रमाजनकत्वं तु अनुमानात्सिद्धम्। यथा प्रमा ज्ञानसाधारणकारणभिन्नकारणजन्या जन्यज्ञानत्वात् अप्रमावत्।

न च दोषाभाव एव कारणमस्त्विति वाच्यम्, पीतः शङ्ख इति ज्ञानस्थले पित्तदोषसत्त्वाच्छङ्खत्वप्रमानुत्पत्तिप्रसङ्गात्, विनिगमनाविरहादनन्तदोषाभावस्य कारणत्वमपेक्ष्य गुणस्य कारणतायां न्याय्यत्वात्।

न च गुणसत्त्वेऽपि पित्तेन प्रतिबन्धाच्छङ्खे न श्वैत्यज्ञानमतः पित्तादिदोषाभावानां कारणत्वमवश्यं वाच्यं तथाच किं गुणस्य हेतुत्वकल्पनयेति वाच्यम्, तथाप्यन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्वसिद्धेः। एवं भ्रमं प्रति गुणाभावः कारणमित्यस्यापि सुवचत्वात्।

पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः ॥ १३१ ॥

तत्र दोषाः के इत्याकाङ्क्षायामाह-पित्तेति। क्वचित्पीतादिभ्रमे पित्तं दोषः, क्वचिच्चन्द्रादेः स्वल्पपरिमाणभ्रमे दूरत्वं दोषः, क्वचिच्च वंशोरगभ्रमे मण्डूकवसाञ्जनमित्येवं रूपा दोषा अननुगता एव भ्रान्तिजनका इत्यर्थः ॥ १३१ ॥

मुक्तावलीमयूखः।

ननु साधारणधर्मज्ञानादेरिव धर्मिज्ञानस्यापि संशयजनकत्वात् तत्कृतः संशयविभागः कृतो न कृत इत्यत आह—किन्त्विति।

संशये—संशयमात्रे। तथा च सशयत्वसमव्याप्तत्वात् धर्मिज्ञानजन्यतावच्छेदकस्य न संशयविभाजकतावच्छेदकत्वमिति भावः।

ननु धर्मिज्ञानस्य संशयजनकत्वे मानाभावः न च धर्मिज्ञानमन्तरेण संशयापत्तिरेव मानमिति वाच्यम् इन्द्रियसन्निकर्षे सतीष्टापत्तेरित्याह—इन्द्रियसन्निकर्षो वेति ॥१३०॥

भगवज्ज्ञाने व्यभिचारवारणाय हेतौ जन्येति।

दोषाभाव एवेति। तथा चार्थान्तरमिति भावः।

ननु पित्तात्मकदोषाभावः श्वैत्यप्रमायामेव कारण न शङ्खप्रमायामत आह-विनिगमनाविरहादिति। प्रमायां दोषाभावः गुणो वा कारणमित्यत्र विनिगमनाविरहादिति भावः।

वस्तुतो गुणहेतुतायामेव विनिगमकमस्तीत्याह—न्याय्यत्वादिति।

गुणस्यापीति। तथा च पित्तादिदोषाभावसत्त्वेऽपि विशेषणवद्विशेष्यरूपगुणाभावान्न शङ्खे पीतत्वभ्रमेति दोषाभावेन न गुणस्यान्यथासिद्धिरिति भावः।

अथ के गुणाः ? इत्याकाङ्क्षायां प्रत्यक्षादौ क्रमशो गुणान्दर्शयति—

प्रत्यक्षे तु विशेष्येण विशेषणवता समम् ।
सन्निकर्षो गुणस्तु स्यादथ त्वनुमितौ पुनः ॥ १३२ ॥
पक्षे साध्यविशिष्टे तु परामर्शो गुणो भवेत् ।
शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः ॥ १३३ ॥
शाब्दबोधे योग्यतायास्तात्पर्यस्याथ वा प्रमा ।
गुणः स्यात्, भ्रमभिन्नं तु ज्ञानमत्रोच्यते प्रमा ॥ १३४ ॥

प्रत्यक्षे त्विति । प्रत्यक्षे विशेषणवद्विशेष्यसन्निकर्षो गुणः । अनुमितौ साध्यवति साध्यव्याप्यवैशिष्ट्यज्ञानं गुण एवमग्रेऽप्यूह्यम् ।

प्रमां निरूपयति-भ्रमभिन्नमिति ॥ १३२ ॥ १३३ ॥ १३४ ॥

ननु यत्र शुक्तिरजतयोरिमे रजते इति ज्ञानं जातं तत्र रजतांशेऽपि प्रमा न स्यात् तज्ज्ञानस्य भ्रमभिन्नत्वाभावादत आह—

अथ वा तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकम् ।
तत्प्रमा, न प्रमा नापि भ्रमः स्यान्निर्विकल्पकम् ॥ १३५ ॥
प्रकारतादिशून्यं हि सम्बन्धानवगाहि तत् ।

अथवेति । तद्वद्विशेष्यकत्वे सति तत्प्रकारकं ज्ञानं प्रमेत्यर्थः । अथैवं स्मृतेरपि प्रमात्वं स्यात्, ततः किमिति चेत्, तथासति तत्करणस्यापि प्रमाणान्तरत्वं स्यादिति चेद्—न यथार्थानुभवकरणस्यैव प्रमाणत्वेन विवक्षितत्वात् ।

इदं तु बोध्यम् । येन सम्बन्धेन यद्वत्ता तेन सम्बन्धेन तद्वद्विशेष्यकत्वं तेन सम्बन्धेन तत्प्रकारकत्वं च वाच्यम्, तेन कपालादौ संयोगादिना घटादिज्ञाने नातिव्याप्तिः ।

एवं सति निर्विकल्पकं प्रमा न स्यात् तस्य सप्रकारकत्वाभावादत आह-न भ्रमेति ।

ननु वृक्षे कपिसंयोगज्ञानं भ्रमः प्रमा च स्यादिति चेद् न-प्रतियोगिव्यधिकरणसंयोगाभाववति संयोगज्ञानस्य भ्रमत्वात् ।

मुक्तावलीमयूखः ।

शक्ये इति । गवयो गवयपदवाच्य इत्युपमितौ गवयत्वावच्छिन्ने शक्ये सादृश्यज्ञानं कारणम् शाब्दबोधे योग्यताप्रमा तात्पर्यप्रमा वा कारणमित्यर्थः ॥ १३१-१३४ ॥

तद्वद्विशेष्यकत्वे सतीति । तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्ववज्ज्ञानमित्यर्थः । सति सप्तम्या अवच्छिन्नार्थकत्वात् तत्प्रकारकमूमेऽतिव्याप्तेस्तद्वद्विशेष्यकेति । रजते एव द्रव्यमिति बुद्धेरजतत्वप्रमात्वापत्तिरतस्तत्प्रकारकेति । ज्ञानपदं तादृशेच्छायामतिव्याप्तिवारणाय । एवं-तत्प्रकारकत्वनिवेश इत्यर्थः ।

न च वृक्षे कपिसंयोगाभावावच्छेदेन संयोगज्ञानं भ्रमो न स्यात्तत्र संयोगाभावस्य प्रतियोगिसमानाधिकरणत्वादिति वाच्यम्, तत्र संयोगाभावावच्छेदेन संयोगज्ञानस्य भ्रमत्वात् । लक्ष्यस्यानुगमाल्लक्षणानुगमेऽपि न क्षतिः ॥ १२५ ॥

प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः ॥ १२६ ॥

प्रमात्वमिति । मीमांसका हि प्रमात्वं स्वतो ग्राह्यमिति वदन्ति । तत्र गुरूणां मते ज्ञानस्य स्वप्रकाशरूपत्वात्तज्ज्ञानप्रमाणयं तेनैव गृह्यते ।

मुक्तावलीमयूखः ।

संयोगाभावावच्छेदेनेति । मूलावच्छेदेन संयोगाभाववति वृक्षे मूलावच्छेदेन संयोगवान् इति बुद्धेर्भ्रमत्वं न स्यादित्यर्थः ।

भ्रमत्वादिति । तदर्थं संयोगाभावावच्छेदकावच्छेदेन संयोगज्ञानं भ्रम इति लक्षणान्तरस्य स्वीकर्तव्यत्वादिति भावः ।

नन्वेवं लक्ष्यानुगम इत्यत आह—लक्ष्यस्येति ।

अथ पाकघटे श्यामरूपवत्त्वप्रतीतेः प्रमात्वं स्यादिति चेदिष्टापत्तेः । घटस्य कदाचिच्छ्यामत्वात् वर्तमानत्वस्य च प्रमात्वाघटकत्वादित्यलम् ॥ १२५ ॥

प्रमात्वं—तद्वति तत्प्रकारकत्वम् ।

न स्वतो ग्राह्यमिति ।

प्रामाण्याप्रामाण्ये स्वतः साङ्ख्याः समाश्रिताः । नैयायिकास्ते परतः, सौगताश्चरमं स्वतः ॥
प्रथमं परतस्त्वाहुः प्रामाण्यं वेदवादिनः । प्रामाण्यं स्वतः प्राहुः परतश्चाप्रमाण्यताम् ॥

इति मतसङ्ग्रहः सर्वदर्शनसङ्ग्रहे ।

स्वतोग्राह्यमित्यत्र स्वपदमात्मपरमात्मीयपरं च । तत्र गुरुः प्रभाकरः तन्मते स्वपदमात्मपरं तन्मते हि घट इति ज्ञानं ज्ञाता ज्ञेय, चेति त्रितयं भासते अत एव ते त्रिपुटीप्रतिभासवादिन इत्युच्यन्ते इति, एतन्मते ज्ञानस्य स्वप्रकाशत्वात् स्वनिष्ठप्रामाण्यं तद्वतित्वप्रकारकत्वरूपं स्वेन गृह्यते । तदाहुर्गुरुमतानुयायिनः—

अर्थक्रियाज्ञानात्संवादाद् गुणवत्कारणज्ञानाद्वा ज्ञानप्रामाण्यनिश्चय इति पूर्वपक्षः ।

सिद्धान्तस्तु न ज्ञानमव्यभिचारनिश्चयमुखेनार्थं निश्चिनोति किन्तु स्वत एव यदि स्वतो निश्चेतुं न शक्नुयात् तदा निश्चयस्यात्यन्तासम्भव एव इत्यान्ध्यमशेषस्य जगतो भवेत् नहि स्वतोऽनिश्चितोऽर्थः परतोऽपि निश्चेतुं शक्यते परस्यापि पूर्ववदेवासामर्थ्यात् यथा घटज्ञानमसत्यपि घटे दृष्टमित्यनिश्चायकं तथार्थक्रियाज्ञानमपि स्वप्नावस्थायामसत्यामेव च तस्यां दृष्टमिति न केनापि निश्चेतुं शक्यते तया घटनिश्चयस्तु दूरत एव तथा संवादो नाम तद्विषयं ज्ञानान्तरम् तस्य पूर्वज्ञानात्को विशेषः येन तेनानिश्चितमनेन निश्चीयेत तथा गुणज्ञानादपि गुणो निश्चेतुं न शक्यते किं पुनः पूर्वज्ञानप्रामाण्यम् तस्मात्स्वत एव प्रामाण्यम् परतस्त्वप्रामाण्यं दोषज्ञानाद्बाधकज्ञानाद्वा वेदे तु दोषाभावात् स्वतः प्राप्तं प्रमाणत्वं सुस्थमिति ।

तेनैव गृह्यते इति । ज्ञाने गृह्यमाणे ज्ञाननिष्ठज्ञानत्वादिधर्मवत् तन्निष्ठप्रामाण्य-

भट्टानां मते ज्ञानमतोन्द्रियम्, ज्ञानजन्या ज्ञातता प्रत्यक्षा, तया च ज्ञानमनुमीयते।

मुरारिमिश्राणां मतेऽनुव्यवसायेन ज्ञानं गृह्यते। सर्वेषामपि मते तज्ज्ञानविषयकज्ञानेन तज्ज्ञानप्रामाण्यं गृह्यते। विषयनिरूप्यं हि ज्ञानमतो ज्ञानविच्छिद्यते विषयः।

तन्मतं दूषयति-न स्वतो ग्राह्यमिति। संशयेति। यदि ज्ञानस्य प्रामाण्यं स्वतो ग्राह्यं स्यात्, तदाऽनभ्यासदशापन्नज्ञाने प्रामाण्यसंशयो न स्यात्।

मुक्तावलीमधूलः।

मपि ज्ञानग्राहकसामग्र्यैव गृह्यते इति तन्मते अयं घटो घटमहं जानामीत्याकारकं ज्ञानमिति भावः।

भट्टानां—कुमारिलभट्टानां मते ज्ञानजन्यया प्राकट्यापरपर्यायया विषयनिष्ठया ज्ञाततया ज्ञानप्रामाण्यमनुमेयमिति एतन्मते स्वतोग्राह्यमित्यत्रत्यं स्वपदमात्मीयपरं ततश्च स्वीयया ज्ञाततया प्रामाण्यं गृह्यते इत्यर्थः।

तयाचेति। इयं ज्ञातता घटविशेष्यकघटत्वप्रकारकज्ञानजन्या घटवृत्तिघटत्वप्रकारकज्ञाततात्वात् या यद्वृत्तिर्यत्प्रकारिका ज्ञातता सा तद्विशेष्यकतत्प्रकारकज्ञानसाध्या, यथा घटे पटत्वप्रकारिका ज्ञाततेति।

तथा चाहुः शास्त्रदीपिकाकाराः। ज्ञानक्रिया हि सकर्मिका कर्मभूतेऽर्थे फलं जनयति पाकादिवत् तच्च फलमैन्द्रियकं ज्ञातजन्यमापरोक्ष्यम् लिङ्गादिज्ञानजन्यं तु मानोक्ष्यम्। अस्ति हि विषयाविषयविभागः सार्वजनीनः न च फलमन्तरेणायं विभागः सम्भवतीति तदाश्रीयते तदेव च फलं कार्यभूतं कारणभूतं विज्ञानमुपकल्पयति इति सिध्यत्यप्रत्यक्षमपि ज्ञानमिति। अर्थगतो वा ज्ञानजन्योतिशयः कल्पयति ज्ञानम्। अवदयमयमङ्गीकरणीयस्वसमतिशयस्त्रितयप्रतिभासवादिभिरपीति।

मुरारिमिश्राणां मते ज्ञानमनुव्यवसायेन गृह्यते इति विषयनिरूप्यं ज्ञानमतो ज्ञाने गृह्यमाणे घटत्वप्रकारत्वं गृह्यते इति एतन्मतेऽपि स्वतोग्राह्यमित्यत्रत्यं स्वपदमात्मीयपरं स्वीयेन स्वविषयकज्ञाने स्वप्रामाण्ये गृह्यते इत्यर्थः; अत एव मुरारेस्तृतीयः पन्था इति लोकोक्तिः इतीमे त्रयोपि मीमांसकाः तत्र मुरारिमिश्राणां मतमतिपादकः कोऽपि ग्रन्थो न मिलतीति महान् खेदः।

अनुव्यवसायेनेति। व्यवसायः ज्ञानम् अनुव्यवसायः ज्ञानानन्तरं जायमानं ज्ञानविषयकं ज्ञानम्।

ननु ज्ञानज्ञानस्य विषयाविषयकत्वात् कथं विषयघटितप्रामाण्यं तस्य विषय इत्यतो ज्ञानज्ञानस्य विषयविषयकत्वे प्रमाणमाह—विषयनिरूप्यमिति। तथा च ज्ञानं विषयविषयताकनियतस्वविषयताकप्रत्यक्षकं विषयाविषयकप्रत्यक्षाविषयत्वे सति प्रत्यक्षविषयत्वादित्यनुमानं ज्ञानप्रत्यक्षविषयविषयकत्वे प्रमाणमिति भावः।

अनभ्यासदशेति। अनवगतप्रामाण्यकेत्यर्थः।

तत्र हि यदि ज्ञानं ज्ञातं तदा स्वन्मते प्रामाण्यं ज्ञातमेवेति कथं संशयः, यदि ज्ञानं न ज्ञातं तदा धर्मिज्ञानाभावात्कथं संशयः। तस्माज्ज्ञाने प्रामाण्यमनुमेयम्।

तथाहि-इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वात्, यन्नैवं, तन्नैवं, यथाऽप्रमा। इदं पृथिवीत्वप्रकारकं ज्ञानं प्रमा गन्धवति पृथिवीत्वप्रकारकज्ञानत्वात्। एवमिदं जलत्वप्रकारकं ज्ञानं प्रमा स्नेहवति जलत्वप्रकारकज्ञानत्वात्।

न च हेतुज्ञानं कथं जातमिति वाच्यम्, पृथवीत्वप्रकारकत्वस्य स्वतो ग्राह्यत्वात्। तत्र गन्धाग्रहेण गन्धवद्विशेष्यकत्वस्यापि ग्रहत्वात्। तत्प्रकारकत्वावच्छिन्नतद्विशेष्यकत्वं परं न गृह्यते संश(१)यानुरोधात्।

ननु सर्वेषां ज्ञानानां यथार्थत्वात्प्रमालक्षणे तद्वद्विशेष्यकत्वं विशेषणं

मुक्तावलीमयूखः।

ज्ञातमेव-निश्चितमेव। गन्धवतीति। व्याप्यवति व्यापकप्रकारकत्वस्य व्यापकवति व्यापकप्रकारकत्वव्याप्यत्वादिति भावः।

ननु सर्वेषां ज्ञानानां यथार्थत्वादिति। इदं हि प्रभाकरमतं तन्मते यथार्थ्यं सर्वज्ञानसाधारणं सर्वस्य ज्ञानस्यार्थाव्यभिचारित्वेन तन्नियमात्।

ननु कथमव्यभिचारः इदं रजतं पीतश्चाक्षुषः इत्यादिविपर्ययस्य, स्थाणुर्वा पुरुषोवेत्यादेः संशयस्य, स्वप्नस्य, वाऽतथात्वात् रजतप्रतिपत्तिश्च पुरोगतां शुक्तिमेव रजतत्वेनाध्यवस्यति रजतमात्रगोचरत्वे च 'इदं रजतम्' इति सामानाधिकरण्यं न स्यात् रजतार्थिनः पुरोवर्तिनि शुक्तिशकले प्रवृत्तिर्न स्यात् अवगतिप्रतिपत्त्योरेकविषयत्वात् एवं पीतः शङ्ख इत्यादिवित्तयोप्यन्यथाख्यातिरूपाः इति चेद्—

उच्यते यस्यां संविदि योऽर्थोऽवभासते स तस्या विषयो नान्यः तस्य तत्रानवभासात् अनवभासमानस्य विषयत्वेऽतिप्रसङ्गात् तेनान्यस्यान्यथाभानं प्रतीतिविरुद्धमेव ततोऽत्र न रजतप्रतीतिः शुक्तिगोचरा तत्र तस्यानवभासात्। किन्तु रजतगोचरैव।

संशयानुरोधादिति। एतदन्तरम्—

(१) न च प्रमात्वस्य प्रसिद्धिः कथमिति वाच्यम् ज्ञातप्रमात्वस्य स्वतो ग्राह्यत्वात्।

न च प्रकारभेदेन प्रामाण्यभेदाद् घटत्वप्रकारकत्वादेः कथं प्रसिद्धिरितिवाच्यम् घटत्वप्रकारकत्वस्य स्वविशेष्यकत्वस्य च स्वतो ग्राह्यत्वात् घटस्य च पूर्वमुपस्थितत्वात् घटविशेष्यकं घटत्वप्रकारकमिति ज्ञाने प्रामाण्यस्य बाधकाभावः, व्यवसायपरं तु प्रामाण्यं न गृह्यते तत्र संशयसामग्रीसत्त्वे संशयस्यैवोपपत्तेः किं चान्यासदृशार्थी तृतीयानुव्यवसायादिना प्रामाण्यस्य स्वतस्त्व ग्रहसम्भवात् प्रथमानुव्यवसायपरं न तद्ग्राहकमिति कल्प्यते संशयानुरोधात्।

अथ प्रामाण्यानुमितौ प्रामाण्यग्रहे न तस्य विषयनिश्चयरूपत्वार्थं तत्र प्रामाण्यग्रहो वाच्यः सोऽप्यनुमित्यन्तरेणेति फलमुखौ कारणमुखौ वाऽनवस्थेति चेद्—तत्— अगृहीताप्रामाण्यग्राहकस्यैव निश्चयरूपत्वात् यत्र च प्रामाण्यसंशयस्तत्रैव प्रामाण्यानुमितेरपेक्षा यावदाशङ्क प्रामाण्यानुमितिरित्यत एव सर्वत्र तु न संशयः क्वचित्कोट्यनुपस्थितेः क्वचिद्विशेषदर्शनादिनेः क्वचिद्विपर्यान्तरसञ्चारादिति संक्षेपः। इति विद्याविलासमुद्रिते महामहोपाध्याय खदमणशास्त्रि द्राविडसंशोधितेऽधिकः पाठः स च दिनकरेणाख्याख्यातत्वात्प्रक्षिप्त इव प्रतिभाति।

व्यर्थम्--

न च रङ्गे रजतार्थिनः प्रवृत्तिर्भ्रमजन्या न स्यात्-तव मते भ्रमस्याभावादिति वाच्यम्, तत्र हि दोषाधीनस्य पुरोवर्तिनि स्वतन्त्रोपस्थितरजत-

मुक्तावलीमयूखः।

ननु तर्हि पुरोवर्तिनि इदं रजतमिति विशिष्टधीनिर्वाहः कथम्? इत्थम् प्रथममिन्द्रियार्थसन्निकर्षे सति शुक्तिकामात्रमगृहीतविशेषधर्मकम् 'इदम्' इति सामान्येन गृह्यते-तदनु दोषवशात् तदंशविकलं तत्सदृशं रजतमात्रं स्मर्यते लोके च सदृशदर्शनात्सदृशस्मृतिर्दृष्टैव-तच्च स्मरणं तदंशप्रमोषादनुभवसमानाकारं एतावत्तावदावयोरविवादम् तत्र गृह्यमाणस्मर्यमाणयोर्ग्रहणस्मरणयोर्वा भेदाग्रहात् केवलसामान्याकारोपलम्भाद्विशिष्टव्यवहारः न तु विशिष्टधीतः। तत एव प्रवृत्तिरपि युक्ता उत्तरकालं च भेदग्रहणे व्यवहारविसंवादाद्बाधोन्युपपन्नः। स च न पूर्वज्ञानविषयापहारः तयोर्यथार्थत्वात् किन्तु व्यवहारविसंवाद एव न हि ज्ञानं कार्यं तस्य यथार्थत्वात् किन्तु व्यवहार एव।

ननु भवेत्तामेदंशोऽनुभवः रजतांशस्य कथं स्मृतिः तत्तांशप्रमोषात् न हि तत्र तदिति प्रतीतिरुदेति ततोनुभवत्वमेवोचितम् सत्यम् न तावच्चाक्षुषोऽनुभवः तदसम्प्रयोगात्। नाप्यनुमितिर्लिङ्गाभावात् परिशेषात् स्मृतिरेव तदंशप्रमोषस्तु दोषवशात्। अत एव पामराणां तत्रानुभवव्यवहारः परीक्षकाणां स्वन्यथा।

ननु यद्गोचरं ज्ञानं तत्रैव प्रवृत्तिः रजतज्ञानं च न शुक्तिगोचरं अतः कथं तत्र प्रवृत्तिरिति चेत्सत्यम् सम्यग्रजतस्थले तथैव अत्र तु सा केवलभेदाग्रहनिबन्धना।

तथा पीतशङ्खबोधोऽपि यथार्थ एव तथा हि नेत्रवर्तिनि स्वच्छे पित्तद्रव्ये तद्रश्मिभिः सह निर्गते तद्गतपीतिमाऽत्र गृह्यते तथा दोषवच्छङ्खमात्रं च परस्परसाकाङ्क्षयोस्तयोर्विद्यमानोऽप्यसम्बन्धो न बुध्यते ततश्च तत्रासम्बन्धाग्रहाद्विशिष्टधीव्यवहारः प्रवृत्तिरपि तत एव।

द्विचन्द्रज्ञानेऽप्यङ्गुल्यवष्टम्भादिदोषाद्विधोः प्रविभक्तो नायनरश्मिरेकस्मिंश्चन्द्रमसिद्वित्वं जनयति तत्र द्वित्वस्य चन्द्रमसाऽसम्बन्धाग्रहाद् द्वौ चन्द्राविति व्यवहारः। तथा सर्वतोदिशमाशुसञ्चारिण्यलातदण्डेऽपि निरन्तरधियोजायन्ते तत्रान्तरालाग्रहाच्चक्रबुद्धिव्यवहारः अलाते च चक्रव्यवहारः तथादर्पणे नयनरश्मिनिपतितः प्रथमं सविशेषं दर्पणं गृह्णाति पश्चात्तु प्रतिहतः परावृत्तो मुखमात्रं तत्र दर्पणस्य मुखस्य च भेदाग्रहाद्दर्पणे मुखव्यवहारः।

स्वप्नस्तु स्मृतिरेव न ह्यननुभूते स स्यादिति दोषाच्च तत्तांशप्रमोषः।

तथा संशयोऽपि नैकं ज्ञानं किन्तु द्वे एते स्थाणुत्वपुरुषत्वगोचरे प्रमुष्टतत्तांशे परस्परविनिर्मुक्ते पुरःस्थितोर्ध्ववस्तुदर्शनाज्जायमाने स्मृतिरूपे एतत्सर्वं यथार्थमेव परस्परविनिर्मुक्तयोस्तयोर्विशेषयोः पुरःस्थिते धर्मिणि एकस्यापि व्यवस्था नास्तीति व्यवस्थितव्यवहारं प्रवर्तयितुमशक्नुवन् संशेत इति भवति तत्र संशयव्यवहारोऽतः सर्वं ज्ञानं यथार्थमिति सिद्धम्।

अत एव श्रीभाष्यकारैरपि 'यथार्थं सर्वविज्ञानमिति वेदविदां मतम्' इत्युक्तम्।

व्यर्थमिति। तद्व्यावर्त्तायां अन्यथाख्यातेरभावात्।

भ्रमजन्येति। न्यायनये भ्रमजन्या प्रवृत्तिस्वन्मते न स्यादिति भावः।

भ्रमस्य—अन्यथाख्यातेः। तत्र—रङ्गगोचरविसंवादिरजतार्थिप्रवृत्तौ। रजते 'इदं'

भेदाग्रहस्य हेतुत्वात् ।

सत्यरजतस्थले तु विशिष्टज्ञानस्य सत्त्वात्तदेव कारणम्, अस्तु वा तथापि रजतभेदाग्रहः एव कारणमिति ।

न चान्यथाख्यातिः सम्भवति, रजतप्रत्यक्षकारणस्य रजतसन्निकर्षस्याभावाद्रङ्गे रजतबुद्धेरनुपपत्तेरिति चेद्--

न सत्यरजतस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुतायाः कल्पितत्वाद्-न्यत्रापि तत्कल्पनात् ।

न च संवादिप्रवृत्तौ तत्कारणं, विसंवादिप्रवृत्तौ च भेदाग्रहः कारण-मिति वाच्यम् लाघवेन प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात् ।

इत्थं च रङ्गे रजतत्वविशिष्टबुद्धयनुरोधेन ज्ञानलक्षणाप्रत्यासत्तिकल्प-नेऽपि न क्षतिः, फलमुखगौरवस्यादोषत्वात् ।

किञ्च (यत्र) रङ्गरजतयोरिमे रजते रङ्गे वेति ज्ञानं जातं तत्र न कार-णबाधोऽपि ।

मुक्तावलीमयूखः ।

रजतम्' इति ज्ञानकाले रजतभेदाग्रहसत्त्वादिसंवादिप्रवृत्त्यापत्तिवारणाय दोषाधीनत्वेत्युक्तं न्यायनये दोषाधीनो यो रजतभ्रमस्तत्स्थानाभिषिक्तरजतभेदाग्रहस्यैव तन्मते दोषाधीनतया रजते रजतभेदाग्रहस्य दोषाधीनत्वादिति भावः ।

हेतुत्वादिति । न्यायनयेऽपि 'इदं रजतम्' इति भ्रमे हेतुतया रजतभेदाग्रहस्य तत्रावश्यकतया तस्यैव हेतुत्वं युक्तं 'तद्धेतोरेव तत्त्वे किं तेनेति' न्यायादिति भावः ।

ननु रजतत्वांशे सन्निकर्षाभावान्नान्यथाख्यातिः सम्भवति इत्यत आह इत्थं चेति । प्रवृत्तिमात्रे विशिष्टबुद्धेर्हेतुत्वसिद्धौ चेत्यर्थः । स्वसंयुक्तमनःसंयुक्तात्मसमवेतस्मृतिविषय-त्वरूपज्ञानलक्षणप्रत्यासत्त्या रजतत्वस्य भानमिति भावः ।

फलमुखेति । निषादस्थपत्यधिकरणसिद्धान्तसिद्धोऽयं न्यायः । तथाहि "वा-स्तुमयं रौद्रं चरुं निर्वपेत्' इति प्रकृत्य श्रूयते 'पतया निषादस्थपतिं याजयेत्' अत्र संशयः निषादानां स्थपतिः इति षष्ठीतत्पुरुषेण निषादस्वामी कश्चित्त्रैवर्णिकः, निषा-दश्चासौ स्थपतिरिति कर्मधारयेण निषाद एव वा विवक्षितः तत्र निषादस्य सङ्कीर्णजाति-मतो वेदानधिकारात् षष्ठीतत्पुरुषेण त्रैवर्णिक एवेति पूर्वपक्षे षष्ठीतत्पुरुषेनिषादपदस्य निषादसम्बन्धिनि लक्षणायां गौरवेण लाघवात् कर्मधारय एव ततश्च एतद्यागोपयोगिम-न्त्रेष्वधिकारः निषादस्य कल्प्यते इति सिद्धान्तः । अनेन आदौ लाघवमनुसृत्यान्ते गौर-वसहनं न दोषावहमिति स्पष्टमेवावगम्यत इति ।

ननु ममापि प्रवृत्तिमात्रे भेदाग्रह एव कारणं न तु विसंवादिप्रवृत्तिस्थले भेदाग्रहः संवादिप्रवृत्तिस्थले च विशिष्टज्ञानं कारणमिति वैषम्यमित्यपरितोषादाह--किञ्चेति । यत्र रङ्गे रजते च युगपदिन्द्रियसन्निकर्षात् रजतरङ्गयोः इमे रजते रङ्गे वेति ज्ञानं जातं तत्र रजतत्वेन रङ्गत्वेन च स्वसंयुक्तसमवायस्य सत्त्वात् रजते रङ्गत्वस्य रङ्गे रजतत्वस्य वा भान-सम्भवात् अन्यथाख्यातिस्वीकारे बाधकाभावः न चेदं प्रमेतिभ्रमितव्यं विशेषणवद्विशेष्य-

अपि च यत्र रङ्गरजतयोरिमे रजतरङ्गे इति ज्ञानं तत्रोभयत्र युगपत्प्रवृत्तिनिवृत्ती स्यातां रङ्गे रङ्गभेदग्रहे रजते रजतभेदग्रहे चान्यथाख्यातिभयात्, त्वन्मते दोषादेव रङ्गे रजतभेदाग्रहस्य रजते रङ्गभेदाग्रहस्य च सत्त्वात्।

किञ्चानुमितिं प्रति भेदाग्रहस्य हेतुत्वे जलह्रदे वह्निव्याप्यधूमवत्त्वभेदाग्रहादनुमितिर्निराबाधा। यदि च विशिष्टज्ञानं कारणं तदाऽयोगोलके वह्निव्याप्यधूमज्ञानमनुमित्यनुरोधादापतितम्। (सेयमुभयतः पाशा रज्जुः)।

इत्थं चान्यथाख्यातौ प्रत्यक्षमेव प्रमाणं रङ्गे रजततथाऽन्येदृशमित्यनुभवादिति सङ्क्षेपः ॥ १३६ ॥

पूर्वं व्याप्तिरुक्ता, तद्ग्रहोपायस्तु न दर्शित इत्यतस्तं दर्शयति—

व्यभिचारस्याग्रहोऽपि सहचारग्रहस्तथा।
हेतुर्व्याप्तिग्रहे, तर्कः क्वचिच्छङ्कानिवर्तकः ॥ १३७ ॥

व्यभिचारस्येति। व्यभिचाराग्रहः सहचारग्रहश्च व्याप्तिग्रहे कारणम्। व्यभिचारग्रहस्य व्याप्तिग्रहे प्रतिबन्धकत्वात्तदभावः कारणमित्यर्थः।

मुक्तावलीमयूखः।

सन्निकर्षरूपप्रमासामग्र्यभावादिति भावः।

ननु तत्तद्विशेष्ये तत्तद्विशिष्टबुद्धिं प्रति तत्तद्विशेषणे तत्तद्विशेष्यघटितसन्निकर्षो हेतुः। तथाच रजतघटितसंयुक्तसमवायेन रङ्गे न रजतत्वभानसम्भव इति नान्यथाख्यातिसम्भवइत्यत आह—अपिचेति।

प्रवृत्तिनिवृत्ती इति। रजते इष्टभेदाग्रहरूपा प्रवृत्तिसामग्रीसत्त्वेन प्रवृत्तिः, रङ्गे चानिष्टभेदाग्रहरूपनिवृत्तिसामग्रीसत्त्वेन च निवृत्तिः स्यादिति भावः।

रङ्गे रङ्गभेदग्रहे—इत्यस्य रङ्गे रङ्गभेदाग्रहस्य रजते रजतभेदाग्रहस्य च सत्त्वेनेत्यादिः। तथा च रङ्गभेदाग्रहे सति दोषादेव रङ्गभेदग्रहो वाच्य इति अन्यथाख्यात्यापत्तिरिति भावः।

ननु रङ्गे रजतभेदाग्रहप्रयोजकदोषस्य प्रतिबन्धकस्य सद्भावान्न रङ्गे निवृत्तिः, एवं रजते रङ्गभेदाग्रहप्रयोजकदोषस्य प्रतिबन्धकस्य सद्भावान्न प्रवृत्तिरित्यत आह—किञ्चेति।

भेदाग्रहस्य—व्याप्यवद्भेदाग्रहस्य।

ननु ह्रदे वह्निव्याप्यधूमवद्भेदाग्रहान्न ह्रदो वह्निमान् इत्यन्यथाख्यातिरूपानुमितिः किन्तु अनुभवस्मरणरूपं ज्ञानरूपमेवागृहीतसंसर्गकमित्यरुचेराह—इत्थं चेति। तथा चानुभवसाय एवान्यथाख्यातौ प्रमाणमिति भावः ॥ १३६ ॥

ननु प्रामाण्यस्यानुमानगम्यत्वं प्रतिपादितं तच्चानुमानस्य प्रमाणत्वसिद्धौ स्यात् तदेतेन प्राहकाभावेन व्याप्तिज्ञानाभावादतः प्रामाण्योपपादकत्वेनोपोद्घातसङ्गत्या व्याप्तिग्रहोपायमाह—पूर्वमिति।

प्रतिबन्धकत्वादिति। कारणीभूताभावप्रतियोगित्वं हि प्रतिबन्धकत्वम्।

एवमन्वयव्यतिरेकाभ्यां सहचारग्रहस्यापि हेतुता । भूयोदर्शनं तु न कारणं-व्यभिचारास्फूर्तौ सकृद्दर्शनेऽपि क्वचिद्व्याप्तिग्रहात् । क्वचिद्व्यभिचारशङ्काविधूननद्वारा भूयोदर्शनमुपयुज्यते ।

यत्र तु भूयोदर्शनादपि शङ्का नापैति तत्र विपक्षे बाधकस्तर्कोऽपेक्षितः । तथाहि—वह्निविरहिण्यपि धूमः स्यादिति यद्याशङ्का भवति, तदा सा वह्निधूमयोः कार्यकारणभावस्य प्रतिसन्धानान्निवर्तते । यद्ययं वह्निमान् स्यात्तदा धूमवान्न स्यात् कारणं विना कार्यानुत्पत्तेः । यदि च क्वचित्कारणं विनापि कार्यं भविष्यति तदाऽहेतुक एव भविष्यतीति तत्राप्याशङ्का भवेत्, तदा सा व्याघातादपसारणीया । यदि हि कारणं विना कार्यं स्यात्, तदा धूमार्थं वह्रेस्तृप्त्यर्थं भोजनस्य वा नियमत उपादानं तवैव न स्यादिति । यत्र स्वत एव शङ्का नावतरति तत्र न तर्कापेक्षाप्रीति तदिदमुक्तम्—तर्कः क्वचिच्छङ्कानिवर्तक इति ॥ १३७ ॥

इदानीं परकीयव्याप्तिग्रहप्रतिबन्धार्थमुपाधिं निरूपयति—

साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा ।
स उपाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्श्यते ॥ १३८ ॥

मुक्तावलीमयूखः ।

यद्ययमिति । अयं—धूमवान्पर्वतः । कारणं विनेति । तथाच यदि धूमो वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादिति तर्काकारो बोध्यः । यथाश्रुतं तु न युक्तं तस्य विषयपरिशोधिकत्वेन व्याप्तिग्रहानौपयिकत्वादिति ध्येयम् ।

व्याघातमेव दर्शयति—यदि हीति ।

ननु तर्कप्रत्यापाद्यापादकवत्ताज्ञानं कारणं तत्र व्याप्तिज्ञानप्रतिबन्धकव्यभिचारशङ्कानिवर्तकस्तर्कोऽपेक्षित एवमप्रेपीत्यनवस्थेत्यत आह—यत्रेति । स्वत एव—शङ्कासामग्रीविरहादेव ।

तर्कापेक्षेत्यनन्तरमतो नानवस्थेति शेषः । ननु तर्कस्य न व्यभिचारशङ्कानिवर्तकत्वं तर्ककारणीभूतव्याप्तिज्ञानेनैव तन्निरासादिति चेदत्र केचित्—अनाहार्यशङ्कानिवर्तनस्य तर्ककारणीभूतव्याप्तिज्ञानसाध्यत्वेऽपि आहार्यशङ्कानिवर्तनाय तर्कस्यापेक्षणात् । आहार्यज्ञानस्य व्याप्तिज्ञानाप्रतिबध्यत्वादनिष्टप्रसञ्जनात्मकतर्केण तु आपादकज्ञाने आपाद्यज्ञानरूपानिष्टसाधनत्वज्ञानजननद्वारा आपादकज्ञाने द्वेषो जन्यते तेन चापादकज्ञाने इच्छाप्रतिबन्धः क्रियते । एवं च इच्छारूपकारणाभावादेव नाहार्यशङ्कोत्पत्तिरिति अर्थात्सिद्धं तर्कस्य निवर्तकत्वम् ।

तर्कश्च आहार्यारोपविशेषः । तर्कत्वं च मानसत्वव्याप्यो जातिविशेषो तर्कयामीत्यनुभवसिद्धः । तर्कश्च द्विविधः । विषयपरिशोधकः व्याप्तिग्राहकश्चेति । आद्यः निर्धूमः स्यादिर्वह्निः स्यादित्यादिः । द्वितीयः धूमो यदि वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादित्यादिः ॥ १३७ ॥

इदानीमिति । व्याप्तिग्रहोपायनिरूपणानन्तरं वैपरीत्यसम्बन्धेन व्याप्तिनिश्चयाभा-

साध्येस्यति । साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापकत्वमुपाधित्वमित्यर्थः ।

स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजन्यत्वं नोपाधिः स्यात्—तस्य साध्यव्यापकत्वाभावाच्छ्यामत्वस्य घटादावपि सत्त्वात्,

एवं वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वं नोपाधिः स्यात्-प्रत्यक्षत्वस्यात्मादिषु सत्त्वात्तत्र च रूपाभावात् ।

एवं ध्वंसो विनाशी जन्यत्वादित्यत्र भावत्वं नोपाधिः स्यात्-विनाशित्वस्य प्रागभावेऽपि सत्त्वात्तत्र च भावत्वाभावादिति चेदु—

न यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वमित्यर्थे तात्पर्यात् ।

मित्रातनयत्वावच्छिन्नश्यामत्वस्यव्यापकं शाकपाकजत्वं, तदवच्छिन्नसाधनाव्यापकं च ।

एवं पक्षधर्मबहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्य व्यापकमुद्भूतरूपवत्त्वम्, बहिर्द्रव्यत्वावच्छिन्नसाधनस्याव्यापकं च ।

एवं ध्वंसो विनाशी जन्यत्वादित्यत्र जन्यत्वावच्छिन्नसाध्यव्यापकं भावत्वं बोध्यम् ।

सद्धेतौ तु एतादृशो धर्मो नास्ति यदवच्छिन्नस्य साध्यस्य व्यापकं तदवच्छिन्नस्य साधनस्य चाव्यापकं किञ्चित्स्यात् ।

व्यभिचारिणि त्वन्तत उपाध्यधिकरणं यत्साध्याधिकरणं यच्चोपाधि-

मुक्तावलीमयूखः ।

साधप्रयोजकव्यभिचारशङ्काकारणज्ञानविषयत्वेन उपाधेः स्मरणात् स्मृतत्वे सत्युपेक्षानार्हत्वरूपप्रवृत्तसङ्गत्योपाधिनिरूपणमिति भावः ।

स श्याम इति । काकः श्यामो मित्रातनयत्वादित्यादावित्यर्थः अत एव ध्वंसो विनाशी जन्यत्वादित्यनेन न पौनरुक्त्यम् । अस्य साधनावच्छिन्नसाध्यव्यापकत्वाद् ध्वंसो विनाशी इत्यस्य साधनरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वात् ।

ननु साधनावच्छिन्नसाध्यव्यापकत्वं विवक्षणीयमतो नोक्तव्याप्तिरतः पक्षधर्मावच्छिन्नसाध्यव्यापकोपाधावव्याप्तिमाह—एवं वायुरिति ।

उद्भूतरूपवत्त्वमिति । ननु प्रत्यक्षं प्रति उद्भूतरूपस्याव्यापकत्वे रूपस्य सुतरामव्यापकत्वमिति उद्भूतपदं व्यर्थमिति चेन्न । उद्भूतपदस्य उपाधेः साध्यव्यापकत्वे कार्यकारणभावलक्षणानुकूलतर्कदर्शनार्थं सत्त्वात् ।

व्यभिचारिणि त्विति । धूमवान् वह्नेरित्यत्रार्द्रेन्धनसंयोग उपाधिः, उपाधेरार्द्रेन्धनसंयोगस्य, साध्यस्य धूमस्य, चाधिकरणं महानसादिकमुपाधिनाऽऽर्द्रेन्धनसंयोगेन शून्यं धूमव्यभिचारनिरूपकाधिकरणं च अयोगोलकं तदन्यतरत्वावच्छिन्नस्य साध्यस्य व्यापकत्वं बहिरूपसाधनाव्यापकत्वं चार्द्रेन्धनसंयोगस्येति । वायुः प्रत्यक्षोद्रव्यत्वादित्यत्र प्रत्यक्षत्वरूपसाध्याधिकरणमात्मा उद्भूतरूपात्मकोपाधिशून्यं साध्यव्यभिचाराधिकरणं गगनं तदन्यत्वावच्छिन्नसाध्यव्यापकत्वस्य उद्भूतरूपेऽभावादाह उपाध्यधिकरणमिति

शून्यं साध्यव्यभिचारनिरूपकमधिकरणं तदन्यतरत्वावच्छिन्नस्य साध्यस्य व्यापकत्वं साधनस्य चाव्यापकत्वमुपाधेरन्ततः सम्भवतीति ॥ १३८ ॥

अत एव लक्ष्यमप्युपाधिरूपमेतदनुसारेण दर्शयति—

सर्वे साध्यसमानाधिकरणाः स्युरुपाधयः ।
हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता ॥ १३९ ॥

सर्वे इत्यादिना । स्वसाध्येति । स्वम्-उपाधिः, स्वं च साध्यं च स्वसाध्ये तयोर्व्यभिचारितेत्यर्थः ॥ १३९ ॥

उपाधेर्दूषकतावीजमाह—

व्यभिचारस्यानुमानमुपाधेयस्तु प्रयोजनम् ।

व्यभिचारस्येति । उपाधिव्यभिचारेण हेतौ साध्यव्यभिचारानुमानमुपाधेः प्रयोजनमित्यर्थः ।

तथाहि—यत्र शुद्धसाध्यव्यापक उपाधिस्तत्र शुद्धेनैवोपाधिव्यभिचारेण साध्यव्यभिचारानुमानम् । यथा धूमवान्वह्नेरित्यादौ वह्निर्धूमव्यभिचारी तदुव्यापकार्द्रेन्धनसंयोगव्यभिचारित्वादिति, व्यापकव्यभिचारिणो व्याप्यव्यभिचारावश्यकत्वात् ।

मुक्तावलीमयूखः ।

उद्भूतरूपाधिकरणपरमाण्वाकाशान्यतरत्वावच्छिन्नसाध्याप्रसिद्धया तद्दोषतादवस्थ्यमतः—साध्याधिकरणमिति ।

उद्भूतरूपाधिकरणं यत्प्रत्यक्षत्वाधिकरणं घटादि तद्वृत्तिद्रव्यत्वात्मकधर्मावच्छिन्नसाध्यव्यापकत्वाभावादुक्तं यच्चेत्यादि ।

तत्रापि साध्यव्यभिचाराधिकरणपरमाणुघटान्यतरत्वावच्छिन्नद्रव्यत्वात्मकसाधनव्यापकत्वादुपाधिकशून्यमिति ।

तत्रैवोपाध्यधिकरणं साध्याधिकरणं घट उपाधिशून्यमधिकरणमात्मा तदन्यतरत्वावच्छिन्नसाध्यव्यापकत्वाभावात साध्यव्यधिचारनिरूपकमधिकरणमिति ।

उद्भूतरूपाधिकरणं यत्प्रत्यक्षत्वाधिकरणं घटः यच्चोद्भूतरूपशून्यं प्रत्यक्षत्वाभावाधिकरणमतीन्द्रियरूपादि तदन्यतरत्वावच्छिन्नद्रव्यत्वरूपसाधनाव्यापकत्वस्य उद्भूतरूपेऽभावात्साध्याभावाधिकरणमिति, परित्यज्य साध्यव्यभिचारनिरूपकाधिकरणमित्युक्तं, तदर्थश्च साधननिष्ठसाध्यव्यभिचारनिरूपकाधिकरणमिति ॥ १३८ ॥

सर्व इति । साध्यसमानाधिकरणास्ते सर्वे उपाधयः स्युः ते के इत्याकाङ्क्षायामाह येषां एकस्मिन्नाश्रय एकाधिकरणावच्छेदेन स्वमुपाधिः साध्यं च तयोर्व्यभिचारित्व हेतौ स्यादित्यर्थः ।

अयंभावः धूमवान् वह्नेरित्यत्र अयोगोलके धूमरूपसाध्यसमानाधिकरणयार्द्रेन्धनसंयोगस्य अयोगोलकावच्छेदेन वह्नौ आर्द्रेन्धनसंयोगरूपोपाधेर्धूमरूपसाध्यस्य च व्यभिचारो वर्तते इति ॥ १३९ ॥

यत्र तु किञ्चिद्धर्मावच्छिन्नसाध्यव्या।क उपाधिस्तत्र तद्धर्मवति उपाधिव्यभिचारेण साध्यव्यभिचारानुमानम् । यथा स श्यामो मित्रातनयत्वादित्यादौ मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनये शाकपाकजत्वभिचारित्वादिति ।

बाधानुद्गीतपक्षेतरस्तु साध्यव्यापकताग्राहकप्रमाणाभावात्स्वव्याघातकत्वाच्च नोपाधिः ।

बाधोद्गीतस्तूपाधिर्भवत्येव । यथा वह्निरनुष्णः कृतकत्वादित्यादौ प्रत्यक्षेण वह्नौ उष्णत्वग्रहे वह्नीतरत्वमुपाधिः ।

यस्य तूपाधेः साध्यव्यापकता सन्दिह्यते स सन्दिग्धोपाधिः ।

पक्षेतरस्तु सन्दिग्धोपाधिरपि नोद्भावनीयः कथकसम्प्रदायानुरोधादिति ।

केचित्तु सत्प्रतिपक्षोत्थापनमुपाधिफलम् । तथाहि—मयोगोलकं धूमवद्वह्नेरित्यादावयोगोलकं धूमाभाववदार्द्रेन्धनाभावादिति सत्प्रतिपक्षसम्भवात् । इत्थं च साधनव्यापकोऽपि क्वचिदुपाधिः । यथा करका पृथ्वी कठिनसंयोगवत्त्वादित्यादावनुष्णाशीतस्पर्शवत्त्वम् । न चात्र स्वरूपासिद्धिरेव दूषणमिति वाच्यम्, सर्वत्रोपाधेर्दूषणान्तरसाङ्कर्यात् । अत्र च साध्यव्यापकः पक्षावृत्तिरुपाधिरित्याहुः ॥

शब्दोपमानयोर्नैव पृथक्प्रामाण्यमिष्यते ॥ १४० ॥
अनुमानगतार्थत्वादिति वैशेषिकं मतम् ।
तन्न सम्यग्विना व्याप्तिबोधं शाब्दादिबोधतः ॥ १४१ ॥

मुक्तावलीमयूखः ।

तद्धर्मवत्युपाधिव्यभिचारेणेति । तद्धर्माधिकरणीभूते यदुपाध्यभावाधिकरणं तद्वृत्तित्वेनेत्यर्थः । वायु- प्रत्यक्षः प्रमेयत्वादित्यादौ तु प्रमेयत्वं प्रत्यक्षत्वव्यभिचारि बहिर्द्रव्ये उद्भूतरूपव्यभिचारित्वादित्यादि द्रष्टव्यम् ।

ननु पक्षेतरत्वेऽतिव्याप्तिः, न च तस्य लक्ष्यत्वमेव, एकाश्रये येषामित्यादिमूलेन प्रदर्शितस्य लक्ष्यतावच्छेदकस्य तत्राभावात् तत्र हेतौ पक्षेतरत्वव्यभिचारस्य पक्षमादायैव सत्त्वात् साध्यव्यभिचारस्य च पक्षमादायासम्भवादत आह—बाधानुद्गीतेति ।

बाधानुद्गीतपक्षेतर इति । बाधेन पक्षे साध्याभाववत्तया न उद्गीतः, न साध्यव्यापकत्वेन निश्चितः इत्यर्थः ।

स्वव्याघातकत्वाच्चेति । उपाधिमात्रस्य दूषकताव्याघातकत्वादित्यर्थः । पक्षेतरत्वस्योपाधित्वे पक्षेतरत्वस्य सर्वत्र सत्त्वेनानुमानमात्रोच्छेदापत्त्या व्यभिचारानुमानाधीनस्योपाधेर्दूषकत्वस्यासम्भवादिति भावः ।

ननु यत्र साध्यव्यापकताग्राहकं प्रमाणमस्ति तत्र पक्षेतरत्वे लक्षणातिव्याप्तिर्दुर्वारेत्यत आह—बाधोद्गीतस्त्विति । तथा चेशापत्तिरिति भावः ।

पक्षावृत्तिरिति । पक्षवृत्तित्वे तु पक्षे तदभावेन साध्याभावासाधनादिति भावः ।

शब्दोपमानयोरिति। वैशेषिकाणां मते प्रत्यक्षमनुमानं च प्रमाणम्। शब्दोपमानयोस्त्वनुमानविषयत्वेव प्रामाण्यम्॥

तथाहि-दण्डेन गामानयेत्यादिलौकिकपदानि यज्ञेतेत्यादिवैदिकपदानि वा तात्पर्यविषयसंसर्गप्रमापूर्वकाणि आकाङ्क्षादिमत्पदकदम्बकत्वाद् घटमानयेतिपदकदम्बवत्।

यद्वा एते पदार्था मिथः संसर्गवन्तः योग्यतादिमत्पदोपस्थापितत्वात् तादृशपदार्थवत्। दृष्टान्तेऽपि दृष्टान्तान्तरेण साध्यसिद्धिरिति।

एवं गवयव्यक्तिप्रत्यक्षानन्तरं गवयपदं गवयत्वप्रवृत्तिनिमित्तकम् असति वृत्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वात्। असति च वृत्यन्तरे वृद्धैर्यत्र पदं प्रयुज्यते तत्र तत्तत्प्रवृत्तिनिमित्तकम्, यथा गोपदं गोत्वप्रवृत्तिनिमित्तकम्।

यद्वा गवयपदं स्वप्रवृत्तिनिमित्तकं साधुपदत्वादित्यनुमानेन पक्षधर्मतावलाद्गवयत्वप्रवृत्तिनिमित्तकत्वं सिद्ध्यति।

तन्मतं दूषयति-तत्र सम्यगिति। व्याप्तिज्ञानं विनापि शाब्दबोधस्यानुभवसिद्धत्वात्। न हि सर्वत्र शब्दश्रवणानन्तरं व्याप्तिज्ञाने प्रमाणमस्तीति।

किञ्च सर्वत्र शब्दस्थले यदि व्याप्तिज्ञानं कल्प्यते तदा सर्वत्रानुमितिस्थले पदज्ञानं कल्पयित्वा शाब्दबोध एव किं न स्वीक्रियतामिति ध्येयम्॥ १४०-१४१॥

त्रैविध्यमनुमानस्य केवलान्वयिभेदतः।
द्वैविध्यं तु भवेद् व्याप्तेरन्वयव्यतिरेकतः॥ १४२॥
अन्वयव्याप्तिरुक्तैव व्यतिरेकादिहोच्यते।

त्रैविध्यमिति। अनुमानं हि त्रिविधं—केवलान्वयिकेवलव्यतिरेकिभेदात्।

तत्रासद्विपक्षः केवलान्वयी, यथा घटोऽभिधेयः प्रमेयत्वादित्यादौ, तत्र हि सर्वस्यवाभिधेयत्वादिपक्षासत्त्वम्। (१)

मुक्तावलीमयूखः।

प्रभाकरमते लौकिकः शब्दोऽनुवादकः वैदिक एव प्रमाणं तन्मतदूषणायाह-वैदिकेति।

नन्वनुमितेर्व्याप्यकतावच्छेदकप्रकारकत्वनियमात् प्रमापूर्वकत्वत्वेन प्रमापूर्वकत्वसिद्धावपि रजतत्वप्रकारकज्ञानस्य तस्मादनुपपत्तिरतः शब्दप्रामाण्यस्वीकार आवश्यक इत्यरुचेराह—यद्वेति।

ननु दृष्टान्ते साध्यसिद्ध्यभावात् कथं व्याप्तिग्रह इत्यत आह—दृष्टान्तेऽपीति।

ननु सर्वत्र शब्दश्रवणानन्तरं व्याप्तिज्ञानं कल्प्यतामित्यत आह—किञ्चेति। असद्विपक्षः अत्यन्ताभावाप्रतियोगिसाध्यक इत्यर्थः।

---

(१) ननु सर्वेषां धर्माणां व्यावृत्तत्वात् केवलान्वयसिद्धिरिति चेन्न व्यावृत्तत्वस्य सर्वसाधारण्ये केवलान्वयिसाधनात् किञ्चवृत्तिमदन्यत्वाभावाप्रतियोगित्वं केवलान्वयित्वं तच्च गगनाभावादौ प्रसिद्धम्; इति कचित्पुस्तकेऽधिका पाठः।

असत्सपक्षः केवलव्यतिरेकी, यथा पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादित्यादौ, तत्र हि जलादित्रयोदशभेदस्य पूर्वमनिश्चिततया निश्चितसाध्यवतः उपक्षस्याभाव इति।

सत्सपक्षविपक्षोऽन्वयव्यतिरेकी, यथा-वह्निमान्धूमादित्यादौ, तत्र सपक्षस्य महानसादेर्विपक्षस्य जलह्रदादेश्च सत्त्वमिति।

तत्र व्यतिरेकिणि व्यतिरेकव्याप्तिज्ञानं कारणं तदर्थं व्यतिरेकव्याप्तिं निर्वक्ति—

साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेत् ॥ १४१ ॥

साध्याभावेति। साध्याभावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः।

अत्रेदं बोध्यम्। यत्सम्बन्धेन यदवच्छिन्नं प्रति येन सम्बन्धेन येन रूपेण व्यापकता गृह्यते तत्सम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रतियोगिताकाभाववत्ताज्ञानात्तत्सम्बन्धावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभावस्य सिद्धिरिति(१) इत्थं च यत्र विशेषणतादिसम्बन्धेनेतरत्वव्यापकत्वं गन्धाभावे गृह्यते तत्र गन्धाभावाभावेनेतरत्वात्यन्ताभावः सिध्यति।

यत्र तु तादात्म्यसम्बन्धेनेतरव्यापकता गन्धाभावस्य गृह्यते तत्र तादात्म्यसम्बन्धेनेतरस्याभावः सिध्यति। स एवान्योन्याभावः।

एवं यत्र संयोगसम्बन्धेन धूमं प्रति संयोगसम्बन्धेन वह्नेर्व्यापकता गृह्यते तत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकत्वमभावेन जलह्रदे संयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावः सिध्यति, अत्र च व्यतिरेकव्याप्तिग्रहे व्यतिरेकसहचारज्ञानं कारणम्।

केचित्तु व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते न तु व्यतिरेकव्याप्तिज्ञानमपि कारणम्। यत्र व्यतिरेकसहचाराद्व्याप्तिग्रहस्तत्र व्यतिरेकीत्युच्यते। साध्यप्रसिद्धिस्तु पक्षादावेव जाता पश्चात्पृथिवीत्यवच्छेदेन साध्यत इति वदन्ति ॥ १४२ ॥ १४३ ॥

मुक्तावलीमयूखः।

इतरव्यापकत्वेति। इतरस्य व्यापकता इतरव्यापकता इतरनिष्ठव्याप्यतानिरूपितव्यापकतेत्यर्थः।

आचार्यमतमाह—केचित्त्विति। व्यतिरेकसहचारेण—अन्वयसहचारनिरपेक्षव्यतिरेकसहचारेण। अन्वयव्याप्तिरेवेत्येवकारेण व्यतिरेकव्याप्तेर्व्यवच्छेदः।

ननु पटादौ साध्यनिर्णये कथमितरभेदानुमितिः सिद्धेः प्रतिबन्धकत्वादत आह—पक्षादिति। अवच्छेदकावच्छेदेनानुमितौ सामानाधिकरण्येन सिद्धेरप्रतिबन्धकत्वादिति भावः॥ १४२-१४३ ॥

---

(१) येन रूपेण येन सम्बन्धेन यत्र व्यापकता गृह्यते तेन रूपेण तत्सम्बन्धावच्छिन्नप्रतियोगिताकतद्भावत्वज्ञानात् तत्सम्बन्धेन यं प्रति यस्य व्यापकता गृह्यते तत्सम्बन्धावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभावस्य सिद्धिरिति पाठान्तरं क्वचित्पुस्तके।

अर्थापत्तिस्तु नैवेह प्रमाणान्तरमिष्यते ।
व्यतिरेकव्याप्तिबुद्ध्या चरितार्था हि सा यतः ॥ १४४ ॥

अर्थापत्तिरिति । अर्थापत्तिः प्रमाणान्तरमिति केचन मन्यन्ते । तथा हि—यत्र देवदत्तस्य शतवर्षजीवित्वं ज्योतिःशास्त्रादवगतं जीविनी गृहासत्त्वं च प्रत्यक्षादवगतं तत्र शतवर्षजीविनो गृहासत्त्वं बहिःसत्त्वं विनाऽनुपपन्नमिति बहिःसत्त्वं कल्पयति, इति तदप्यनुमानेन गतार्थत्वान्नेष्यते । तथाहि-यत्र जीवित्वस्य बहिःसत्त्वगृहसत्त्वान्यतरव्याप्यत्वं गृहीतं तत्राऽन्यतरसिद्धौ जायमानायां गृहसत्त्वबाधाद्बहिःसत्त्वमनुमित्सौ भासते ।

एवं 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यादौ पीनत्वस्य भोजनव्याप्यत्वावगमाद्भोजनसिद्धौ दिवाभोजनबाधे रात्रिभोजनं सिध्यतीति ।

अभावप्रत्यक्षस्यानुभविकत्वादनुपलम्भोऽपि न प्रमाणान्तरम् । किञ्चानुपलम्भस्याज्ञातस्य हेतुत्वे ज्ञानाकरणकत्वात्प्रत्यक्षत्वम्, ज्ञातस्य हेतुत्वे तु तत्राप्यनुपलम्भान्तरापेक्षेत्यनवस्था ।

एवं चेष्टापि न प्रमाणान्तरं तस्याः सङ्केतग्राहकशब्दस्मारकत्वेन लिङ्गादिसमशीलत्वाच्छब्द एवान्तर्भावात् । यत्र च व्याप्त्यादिग्रहस्तत्रानुमितिरेवेति ॥ १४३ ॥

सुखं निरूपयति—

सुखं तु जगतामेव काम्यं धर्मेण जायते ।

सुखं त्विति । काम्यमभिलाषविषयः । धर्मेणेति । धर्मत्वेन सुखत्वेन कार्यकारणभाव इत्यर्थः ॥

दुःखं निरूपयति—

अधर्मजन्यं दुःखं स्यात्प्रतिकूलं सचेतसाम् ॥ १४० ॥

मुक्तावलीमयूखः ।

केचनेति । मीमांसका इत्यर्थः । दिवा न भुङ्क्ते इत्यादावित्यादिना मयूरः पर्वतेतरस्मिन् न नृत्यपि नृत्यति चेत्यस्य सङ्ग्रहः । नन्वेतद्वाक्यान्मयूरः पर्वते नृत्यतीति ज्ञानमुत्पद्यते नत्वेतद्व्यतिरेकिणः सम्भवति पर्वतनृत्यस्य साध्यस्यासिद्धौ व्यतिरेकव्याप्त्यभावादिति, अर्थापत्तेः प्रमाणान्तरत्वमावश्यकमिति चेन्न मयूरनृत्यं पर्वताधिकरणकं पर्वतेतरानधिकरणत्वे सति साधिकरण्यात् पर्वतत्ववदित्यन्वयव्यतिरेकिणैव पर्वताधिकरणकमयूरनृत्यज्ञानसम्भवादिति ध्येयम् ।

आनुभविकत्वादिति । येन इन्द्रियेण या व्यक्तिर्गृह्यते तद्गताऽतिरिक्तद्रावच्छेदकेनैवेन्द्रियेण गृह्यते, इति नियमाद्विशेषणतासन्निकर्षेण चक्षुरादिभिरेव घटाभावादेर्ग्रहणसम्भवादिति भावः ।

धर्मत्वेनेति । समवायसम्बन्धावच्छिन्नकार्यतानिरूपितसमवायसम्बन्धावच्छिन्नधर्मत्वावच्छिन्ना कारणता धर्मे स्वीक्रियते इति ।

अधर्मेति। अधर्मत्वेन दुःखत्वेन कार्यकारणभाव इत्यर्थः। प्रतिकूलमिति। दुःखत्वज्ञानादेव सर्वेषां स्वाभाविकद्वेषविषय इत्यर्थः॥ १४५॥

इच्छां निरूपयति—

निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते।
इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि॥ १४६॥

निर्दुःखत्व इति। इच्छा द्विविधा फलविषयिणी उपायविषयिणी च। फलं तु सुखं दुःखाभावश्च। तत्र फलेच्छां प्रति फलज्ञानं कारणम्। अत एव पुरुषार्थः सम्भवति। यज्ज्ञातं सत्स्ववृत्तितयेष्यते स पुरुषार्थ इति तल्लक्षणात्। इतरेच्छानधीनेच्छाविषयत्वं फलितोऽर्थः।

उपायेच्छां प्रतीष्टसाधनताज्ञानं कारणम्॥ १४६॥

चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा च या भवेत्।
तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत्॥ १४७॥

चिकीर्षेति। कृतिसाध्यत्वप्रकारिका कृतिसाध्यविषयिणीच्छा चिकीर्षा-पाकं कृत्वा साधयामीति तदनुभवात्। चिकीर्षां प्रति कृतिसाध्यताज्ञानमिष्टसाधनताज्ञानं च कारणम्। तद्धेतुरिति। अत एव वृष्ट्यादौ कृतिसाध्यताज्ञानाभावान्न चिकीर्षा॥ १४७॥

बलवद्दुष्टहेतुत्वमतिः स्यात्प्रतिबन्धिका।

बलवदिति। बलवदुद्दिष्टसाधनताज्ञानं तत्र प्रतिबन्धकम्, अतो मधुविषसम्पृक्तान्नभोजने न चिकीर्षा।

बलवद्द्वेषः प्रतिबन्धक इत्यन्ये।

तदहेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते॥ १४८॥

तदहेतुत्वेति। बलवदनिष्टाजनकत्वज्ञानं कारणमित्यर्थः। कृतिसाध्यताज्ञानादिमतोबलवदनिष्टसाधनताज्ञानशून्यस्य बलवदनिष्टाजनकत्वज्ञानं विनापि चिकीर्षायां विलम्बाभावात् कस्यचिन्मत इत्यस्वरसो दर्शितः॥ १४८॥

मुक्तावलीमयूखः।

इदं च प्राचां मतेनोक्तम्। नवीनमते तु नित्यं विज्ञानमानन्दं ब्रह्मेति श्रुत्या भगवति नित्यसुखसिद्धौ धर्मस्य कार्यतावच्छेदकजन्यसुखत्वं मोक्ष्यम्।

यज्ज्ञातं सदिति। नन्वस्य स्वविषयज्ञानजन्येच्छा विषयत्वमर्थः। तचोपायेऽतिव्याप्तं फलविषयकं यदिष्टसाधनताज्ञानं तज्जन्या या उपायेच्छा तद्विषयत्वस्य फले सत्त्वादत आह—इतरेच्छानधीनेच्छेति। तथा च उपायेच्छायाः फलेच्छाधीनत्वेन तद्विषय उपाये नातिव्याप्तिः।

ननु अगम्यागमनं बलवद्दुःखस्य नरकस्य साधनमिति ज्ञानवतोऽपि तादृशद्वेष शून्यदशायां चिकीर्षाप्रवृत्योर्दर्शनेन व्यभिचार इत्याशयेनाह—बलवद्द्वेष इति। तत्र चि-

द्वेषं निरूपयति ।

द्विष्टसाधनताधुद्धिर्भवेद्द्वेषस्य कारणम् ।

द्विष्टसाधनतेति । दुःखोपायविषयकं द्वेषं प्रति बलवद्दुद्विष्टसाधनताज्ञानं कारणमित्यर्थः । बलवदिष्टसाधनताज्ञानं च प्रतिबन्धकम्, तेन नान्तरीयकदुःखजनके पाकादौ न द्वेषः ॥

प्रयत्नं निरूपयति—

प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम् ॥ १४९ ॥

एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिकीर्तितम् ।

प्रवृत्तिश्चेति । प्रवृत्ति-निवृत्ति-जीवनयोनियत्नभेदात्प्रयत्नस्त्रिविध इत्यर्थः ॥

चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा ॥ १५० ॥

स्वादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् ।

चिकीर्षेत्यादि । मधुविषसम्पृक्तान्नभोजनादौ बलवदनिष्टानुबन्धित्वज्ञानेन चिकीर्षाभावान्न प्रवृत्तिरिति भावः । कृतिसाध्यताज्ञानादिवद्बलवदनिष्टानुबन्धित्वज्ञानमपि स्वतन्त्रान्वयव्यतिरेकाभ्यां प्रवृत्तौ कारणमित्यपि वदन्ति ।

कार्यताज्ञानं प्रवर्तकमिति गुरवः । तथाहि-ज्ञानस्य प्रवृत्तौ जननीयायां चिकीर्षातिरिक्तं नापेक्षितमस्ति । सा च कृतिसाध्यताज्ञानसाध्या इच्छायाः स्वप्रकारप्रकारकधीसाध्यत्वनियमात् । चिकीर्षा हि कृतिसाध्यत्वप्रकारिकेच्छा । तत्र कृतिसाध्यत्वं प्रकारः, तत्प्रकारकज्ञानं चिकीर्षायां तद्द्वारा च प्रवृत्तौ हेतुर्नित्येष्टसाधनताज्ञानं तत्र हेतुः-नित्ये तदभावात् ।

ननु कृत्यसाध्येऽपि चन्द्रमण्डलानयनादौ प्रवृत्त्यापत्तेः न चिकीर्षाकारणं किन्तु कृत्यसाध्यताज्ञानं प्रतिबन्धकमिति चेद्—

न; तदभावापेक्षया कृतिसाध्यताज्ञानस्य लघुत्वात् ।

न च द्वयोरपि हेतुत्वं गौरवात् ।

ननु त्वन्मतेऽपि मधुविषसम्पृक्तान्नभोजने चैत्यवन्दने च प्रवृत्त्यापत्तिः कार्यताज्ञानस्य सत्त्वादिति चेद्—

न; स्वविशेषणवत्ताप्रतिसन्धानजन्यकार्यताज्ञानस्य प्रवर्तकत्वात् ।

मुक्तावलीमयूखः ।

कीर्षायाम्—तथाच कृतिसाध्यताज्ञानमिष्टसाधनताज्ञानं बलवदनिष्टाजनकत्वज्ञानं च चिकीर्षायां कारणमित्यर्थः ।

प्रभाकरमतमाह—कार्यताज्ञानमिति । अयं भावः प्रवृत्तौ चिकीर्षा कारणम् तत्र च कार्यताज्ञानं कारणमिति परम्परया कार्यताज्ञानस्य प्रवृत्तौ कारणत्वमिति ।

इष्टसाधनताज्ञानं तु न प्रवृत्तौ कारणं नित्ये कर्मणि फलजनकत्वाभावेन तत्रेष्टसाधनताज्ञानाभावात्प्रवृत्त्यनापत्तेः ।

काम्ये हि यागपाकादौ कामना स्वविशेषणम्, ततश्च बलवदनिष्टाननुबन्धि-काम्यसाधनताज्ञानेन कार्यताज्ञानम् ततः प्रवृत्तिः। तृप्तश्च भोजने न प्रवर्तते-इदानीं कामनायाः पुरुषविशेषणत्वाभावात्। नित्ये च शौचादिकं पुरुषविशेषणम्, तेन शौचादिज्ञानाधीनकृतिसाध्यताज्ञानात्तत्र प्रवृत्तिः।

ननु तदपेक्षया लाघवेन बलवदनिष्टानुबन्धीष्टसाधनताज्ञानविशिष्ट-कार्यताज्ञानमेव हेतुरस्तु, बलवदनिष्टानुबन्धित्वं चेष्टोत्पत्तिनान्तरीयक-दुःखाधिकदुःखाजनकत्वं बलवद्द्वेषविषयदुःखाजनकत्वं वेति चेदु—

न-इष्टसाधनत्वकृतिसाध्यत्वयोर्युगपज्ज्ञातुमशक्यत्वात्साध्यत्वसाधनत्व-योर्विरोधात्। असिद्धस्य हि साध्यत्वं सिद्धस्य च साधनत्वम्। न चैकमेके नैकदा सिद्धमसिद्धं चेति ज्ञायते, तस्मात्कालभेदादुभयं ज्ञायत इति।

मैवम्; लाघवेन बलवदनिष्टानुबन्धीष्टसाधनत्वे सति कृतिसाध्यताज्ञा-नस्य हेतुत्वात्। न च साध्यत्वसाधनत्वयोर्विरोधो, यदा कदाचित् साध्य-त्वसाधनत्वयोरविरोधादेकदा साध्यत्वसाधनत्वयोश्चाज्ञानात्।

नव्यास्तु-ममेदं कृतिसाध्यमिति ज्ञानं न प्रवर्तकम्, अनागते तस्य ज्ञातुमशक्यत्वात्। किन्तु यादृशस्य पुंसः कृतिसाध्यं यदु दृष्टं तादृशत्वं स्वस्य प्रतिसन्धाय तत्र प्रवर्तते। तेनौदनकामस्य तत्साधनताज्ञानवत-स्तदुपकरणवतः पाकः कृतिसाध्यस्तादृशश्चाहमिति प्रतिसन्धाय पाके प्रवृत्तिरित्याहुः।

तन्न; स्वकल्पितलिप्यादिप्रवृत्तौ यौवने कामोद्भेदादिना सम्भोगादि-प्रवृत्तौ च तदभावात्।

इदं तु बोध्यम्। इदानीन्तनेष्टसाधनत्वादिज्ञानं प्रवर्तकं, तेन भावियौव-

मुक्तावलीमयूखः।

स्वविशेषणेति। स्वं प्रवर्तमानपुरुषः तद्विशेषणं काम्येकामना, नित्येकाल शौचादि तद्वत्ता-पक्षे तत्सम्बधः तस्य प्रतिसन्धानं ज्ञानं कार्यताज्ञाने हेतुः, तद्धेतुता च पाको मत्कृति साध्यः मत्कृति विनानुत्पद्यमानत्वे सति मदिष्टसाधनत्वादित्यनुमाने नावगम्यते इति।

अनूदितं प्रभाकरमतं दूषयति-मैवमित्यादिना। एककालीनयोः कृतीसाध्यत्वेष्टसाध-नत्वयोर्विरोधात्तयोर्हेतुत्वं नास्माभिरङ्गीक्रियते किन्तु कृतिसाध्यत्वेष्टसाधनत्वज्ञानयोरेवहेतु-त्वादितिभावः।

लाघवेनेति। नियमादिवदितिजन्यत्वापेक्षया विषयत्वस्य लघुत्वेनेति भावः।

प्रभाकरमतानुयायिनां नवीनानांमतमाह—नव्यास्त्विति।

ज्ञातुमशक्यत्वादिति। तैः सामान्यलक्षणप्रत्यासत्त्यनङ्गीकारेण प्रत्यक्षस्य, पक्ष-ज्ञानाभावेनानुमितेश्चासम्भवादित्याशयः।

ननु सिद्धान्ते इष्टसाधनत्वकृतिसाध्यत्वयोर्ज्ञानस्य प्रवृत्तौ हेतुत्वात् भावियौवराज्ये बाले कालान्तरीयकृतिसाध्यताज्ञानस्य, तृप्तस्य कालान्तरीयेष्टसाधनताज्ञानस्य च भोजने सत्त्वादत आह—इदन्त्विति। अयमाशयः, इदानीन्तनकृतिसाध्यताज्ञानस्य इदानीन्त-

राज्ये बालस्य न प्रवृत्तिः-तदानीं कृतिसाध्यत्वाज्ञानात्। एवं कृतश्च भोजने न प्रवर्तते-तदानीमिष्टसाधनत्वाज्ञानात्। प्रवर्तते च रोषदूषितचित्तो विषादिभक्षणे-तदानीं बलवदनिष्टाननुबन्धित्वाज्ञानात्।

न चास्तिकस्यामुष्यागम्यागमने शत्रुवधादिप्रवृत्तौ च कथं बलवदनिष्टानुबन्धित्वबुद्धिर्नरकसाधनत्वज्ञानादिति वाच्यम्, उत्कटरागादिना नरकसाधनताधीप्रतिरोधात्।

वृष्ट्यादौ तु कृतिसाध्यताज्ञानाभावाच्च चिकीर्षाप्रवृत्तौ किन्त्विष्टसाधनताज्ञानादिच्छामात्रम्। कृतिश्च प्रवृत्तिरूपा बोध्या, तेन जीवनयोनियत्नसाध्ये प्राणपञ्चकसञ्चारे न प्रवृत्तिः।

इत्थञ्च प्रवर्तकत्वानुरोधाद्विधेरपीष्टसाधनत्वादिकमेवार्थः।

इत्थञ्च 'विश्वजिता यजेत' इत्यादौ यत्र फलं न श्रूयते तत्रापि स्वर्गः फलं कल्प्यते।

ननु 'अहरहः संध्यामुपासीत,' इत्यादाविष्टानुत्पत्तेः कथं प्रवृत्तिः? न चार्थवादिकं ब्रह्मलोकादि प्रत्यवायाभावो वा फलमिति वाच्यम्, तथा सति काम्यत्वेन नित्यत्वहान्यापत्तेः, कामनाभावे चाकरणतापत्तेः; इत्थञ्च यत्र फलश्रुतिस्तत्रार्थवादमात्रमिति चेद्—

नः ग्रहणश्राद्धादौ नित्यत्वनैमित्तिकत्वयोरिव नित्यत्वकाम्यत्वयोरप्यविरोधात्।

न च कामनाभावेऽकरणतापत्तिः, त्रिकालस्तवपाठादाविव कामनासङ्कल्पस्यैव कल्पनात्।

मुक्तावलीमयूखः।

नेष्टसाधनताज्ञानस्य च हेतुत्वात् तत्र दोषाभावात्। आद्ये तत्कालिककृतिसाध्यताज्ञानस्य द्वितीये तत्कालिकेष्टसाधनताज्ञानस्य चाभावादिति।

इत्थं चेति। प्रवृत्तिं प्रतीष्टसाधनताधियो हेतुत्वे चेत्यर्थः। जलताडनादौ प्रवृत्त्यभावाय इष्टसाधनताज्ञानस्य मधुविषसम्पृक्ताशभोजने प्रवृत्त्यभावाय बलवदनिष्टानुबन्धित्वज्ञानस्य सुमेरुशृङ्गारोहणे प्रवृत्त्यभावाय कृतिसाध्यताज्ञानस्य हेतुत्वमिति।

स्वर्गः फलं कल्प्यत इति। तदुक्तं जैमिनिना पूर्वमीमांसायां 'स स्वर्गः स्यात् सर्वान्प्रत्यविशिष्टत्वात्' अ० ४-पा० ३-सू० १५। इति, अयमाशयः विश्वजितीति प्रवृत्त्यर्थमिष्टसाधनताज्ञानमवश्यमपेक्षणीयं तच्च इष्टं किमिति नियामकं नास्ति विश्वजिता यजेतेति श्रुतौ फलविशेषानिर्देशादिति। किञ्चित्फलं स्वेच्छया कल्पनीयमिति पूर्वपक्षे स विश्वजिद्यागफलं स्वर्गः स्यात् सर्वपुंसामिष्टत्वादिति सिद्धान्तः। अयमत्रसङ्ग्रहः।

नैवास्ति विश्वजिद्यागे फलमस्युत नाश्रुतेः। भाव्यापेक्षाद्विधेः कल्प्यं फलं पुंसः प्रवृत्तये॥
सर्वं फलमुतैकं स्यात् सर्वमस्त्वविशेषतः। एकेन तन्निराकाङ्क्षमतोऽनेकं न कल्प्यते।
एकं यत्किञ्चिदथवा नियतं नियामकम्। तस्मादायः सर्वपुंसामिष्टत्वात् स्वर्ग एव तत्॥ इति।

ननु वेदबोधितकार्यताज्ञानात्प्रवृत्तिः सम्भवत्येवेति चेन्न—इष्टसाधनत्वमविज्ञाय तादृशकार्यताज्ञानसहस्रेणापि प्रवृत्तेरसम्भवात्।

यदपि पण्डापूर्वं फलमिति, तदपि न—कामनाभावेऽकरणापत्तेस्तौल्यात्। कामनाकल्पने त्वार्थवादिकफलमेव रात्रिसत्रन्यायात्कल्प्यते, अन्यथा प्रवृत्त्यनुपपत्तेः। तेनानुत्पत्तिमेव प्रत्यवायस्यान्ये मन्यन्ते।

एवम्—

सन्न्यासमुपासते ये तु सततं संशितव्रताः।
विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम्॥

एवम्—

दद्याद्दहरहः श्राद्धं पितृभ्यः प्रीतिमावहन्—

इत्यादिवचनप्रतिपादितब्रह्मलोकादिकमेव फलमस्तु।

न च पितृप्रीतिः कथं फलं? व्यधिकरणत्वादिति वाच्यम्, गयाश्राद्धादाविवोद्देश्यत्वसम्बन्धेनैव फलजनकत्वस्य क्वचित्कल्पनात्।

अत एवोक्तं—शास्त्रदर्शितं फलमनुष्ठानकर्तरीत्युत्सर्ग-इति।

पितॄणां मुक्तये तु स्वस्य स्वर्गादिफलं, यावच्छित्यनैमित्तिकानुष्ठानस्य सामान्यतः स्वर्गजनकत्वात्। पण्डापूर्वार्थं प्रवृत्तिश्च न सम्भवति। न हि तत्सुखदुःखाभाववत्त्वतः पुरुषार्थो, न वा तत्साधनम्। प्रत्यवायानुत्पत्तौ कथं प्रवृत्तिरिति चेदित्थम्-यथा हि नित्ये कृते प्रत्यवायाभावस्तिष्ठति तदभावे तदभावः, एवं प्रत्यवायाभावस्य सत्त्वे दुःखप्रागभावसत्त्वं तदभावे तदभाव इति योगक्षेमसाधारणकारणतया दुःखप्रागभावं प्रत्यपि सुवचत्वात्। एवमेव प्रायश्चित्तस्यापि दुःखप्रागभावहेतुत्वमिति।

मुक्तावलीमयूखः।

पण्डापूर्वमिति। पण्डो नपुंसकः स इवापूर्वम् पण्डापूर्वम्। नित्यकर्मणा स्वर्गादिफलाजनकमपूर्वं जायते इति कल्प्यते तदेव पण्डापूर्वमित्युच्यते इति प्रभाकरमतं दूषयति यदपीति।

रात्रिसत्रन्यायादिति। रात्रिसत्रशब्दवाच्यानां ज्योतिर्गौरित्यादिवाक्योत्पन्नकर्मणां फलजिज्ञासायामत्यन्ताश्रुतस्वर्गादिकल्पने गौरवाद्विश्वजिन्न्यायेन 'प्रतितिष्ठन्तिह वा य एता रात्रीरुपयन्ति इति श्रुतौ प्रतिष्ठैव फलमिति सिद्धान्तितम्, तथात्रापि आर्षवादिकं ब्रह्मलोक एव फलं लाघवादित्यर्थः। तथा च न्यायमाला—

स्वर्गाय वा प्रतिष्ठायै रात्रिसत्रमिहादिमः। पूर्ववत्स्यात्प्रतिष्ठा च श्रुता तेनाश्रुताद्वरम्॥

तदभावे-नित्यकर्माभावे तदभावः-प्रत्यवायाभावाभावः। तदभावे-प्रत्यवायाभावाभावे प्रत्यवायरूपे। तदभावः दुःखप्रागभावाभावो दुःखरूपः। एवं चान्वयव्यतिरेकाभ्यां दुःखप्रागभावं प्रति प्रत्यवायाभावस्य हेतुत्वं सिध्यति। नन्वेवं दुःखप्रागभावस्य जन्यतया कथं प्रत्यवायाभावस्य तं प्रति हेतुतेत्याह—योगक्षेमेति। दुःखप्रागभावपरिपालनमेव दुःखप्रागभावजनकत्वमिति भावः।

ननु न कलञ्जं भक्षयेदित्यत्र विध्यर्थं कथं नयथान्वयः ? इष्टसाधनत्वाभावस्य कृतिसाध्यत्वाभावस्य च बोधयितुमशक्यत्वादिति चेद्—

न; तत्र यागादिष्टसाधनत्वं कृतिसाध्यत्वं च न विध्यर्थः किन्तु बलवदनिष्टाननुबन्धित्वमात्रं तदभावश्च नञा बोध्यते ।

अथवा बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वे सति कृतिसाध्यत्वं विध्यर्थः । तदभावश्च नञा बोध्यमानो विशिष्टाभावो विशेष्यवति विशेषणाभावे विश्राम्यति ।

ननु-'श्येनेनाभिचरन् यजेत' इत्यादौ कथं बलवदनिष्टाननुबन्धित्वं विध्यर्थः ? श्येनस्य मरणानुकूलव्यापारस्य हिंसात्वेन नरकसाधनत्वात् ।

न च वैधत्वान्न निषेध इति वाच्यम्, अभिचारे प्रायश्चित्तोपदेशात् ।

न च मरणानुकूलव्यापारमात्रं यदि हिंसा, तदा खड्गकारस्य कूपकर्तुश्च हिंसकत्वापत्तिर्गललग्नान्नभक्षणजन्यमरणे स्वात्मघघत्वापत्तिश्चेति वाच्यम्, मरणोद्देश्यकत्वस्यापि विशेषणत्वात्,

अन्योद्देश्यकक्षितनाराचहतब्राह्मणस्य तु वाचनिकं प्रायश्चित्तमिति चेद्-न तत्र बलवदनिष्टाननुबन्धित्वस्य विध्यर्थत्वाभात् ।

वस्तुतः श्येनवारणायादृष्टद्वारकत्वेन विशेषणीयम् अत एव काशीमरणार्थं कृतशिवपूजनादेरपि न हिंसात्वम् ।

मुक्तावलीमयूखः ।

कलञ्जमिति । शूल्यं मांसं कलञ्जमिति केचित् । विषदिग्धबाणाहतमृगमांसं कलञ्जमित्यन्ये । पलाण्डुः कलञ्जमिति परे ।

वस्तुतस्तु कलञ्जं रक्तलशुनम् । 'कलञ्जपलाण्डुपारीरका' इत्यापस्तम्बधर्मसूत्रव्याख्याने हरदत्तेन, वीरमित्रोदये वीरमित्रेण, च कलञ्जं रक्तलशुनमिति व्याख्यातत्वादिति ।

अभिचरन्-मरणं कामयन् । वैधत्वात्-श्येनेनाभिचरन्यजेतेति विधि सिद्धत्वात् । मा हिंस्यादिति निषेधस्तु अवैधहिंसाविषय इति भावः ।

प्रायश्चित्तेति । 'अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहति' इति वचनादिति शेषः । तथाच श्येनस्य बलवदनिष्टाजनकत्वे प्रायश्चित्तोपदेशवैयर्थ्यं स्यादिति मा हिंस्यादिति निषेधस्य श्येनातिरिक्तपरत्वं न सम्भवतीति भावः ।

ननु मरणोद्देश्यकत्वनिवेशे यत्रान्योद्देश्येन क्षितनाराचेन ब्राह्मणमरणं तत्र प्रायश्चित्ताभावः स्यात्तस्माद्धिंसात्वेन मा हिंस्यादिति निषेधाविषयत्वादित्यत आह-अन्योद्देश्यकेति ।

वाचनिकमिति । ब्रह्महा द्वादश समाः कुटीं कृत्वा वने वसेत् । भैक्ष्याश्यात्मविशुद्ध्यर्थं कृत्वाशवशिरोध्वजम् ॥' इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम् । कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते । इति वचनबोधितं प्रायश्चित्तं न तु मा हिंस्यादिति निषेधविषयतयेतिभावः ।

अदृष्टद्वारकत्वेनेति । श्येनस्यादृष्टद्वारैव वैरिमरणसाधनत्वमिति भावः ।

ननु श्येनस्य हिंसात्वे इष्टापत्तिरिति, व्यर्थमिदविशेषणमत आह-अत एवेति ॥

न च साक्षान्मरणजनकस्यैव हिंसात्वं, श्येनस्तु न तथा, किन्तु तज्जन्यापूर्वमिति वाच्यम्, खड्गाघातेन ब्राह्मणे व्रणपाकपरम्परया मृते हिंसात्वानापत्तेः ।

केचित्तु श्येनस्य हिंसा फलं, न तु करणम्, तेन श्येनजन्यखड्गघातादिरूपा हिंसाऽभिचारपदार्थः, तस्य च पापजनकत्वम्, अतः श्येनस्य वैधत्वात्पापाजनकत्वेऽपि अग्रिमपापं प्रतिसन्धाय सन्तो न प्रवर्तन्त इत्याहुः ।

आचार्यास्तु-आप्ताभिप्रायो विध्यर्थः । 'पाकं कुर्यात्' इत्यादावाख्यादिरूपेच्छावाचित्वबलिङ्मात्रस्येच्छावाचित्वं लाघवात् । एवं च 'स्वर्गकामो यजेत' इत्यादौ यागः स्वर्गकामकृतिसाध्यता आप्तेष्ट इत्यर्थः । ततश्चाप्तेष्टत्वेनेष्टसाधनत्वादिकमनुमाय प्रवर्तते । कलञ्जभक्षणे तदभावान्न प्रवर्तते । यस्तु वेदे पौरुषेयत्वं नाम्युपैति तं प्रतिविधिरेव तावद्वर्म इव श्रुतिकुमार्याः पुंयोगे मानम् । न च कर्तृस्मरणं बाधकं, कपिलकणादादिकुमारव्यासपर्यन्तं कर्तृस्मरणस्यैव प्रतीयमानत्वात्, अन्यथा स्मृतीनामप्यकर्तृकत्वापत्तेः । तत्रैव कर्तृस्मरणमस्तीति चेद्वेदेऽपि 'छन्दांसि जज्ञिरे तस्मात्' इत्यादिकर्तृस्मरणमस्त्येव । एवं—

प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते ।

इत्यपि द्रष्टव्यम् ।

स्वयंभूरेष भगवान्वेदो गीतस्त्वया पुरा ।
शिवादिऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः ॥

इति तु वेदस्य स्तुतिमात्रम् ।

न च पौरुषेयत्वे भ्रमादिसम्भवात्प्रामाण्यं स्यादिति वाच्यम्, नित्यसर्वज्ञत्वेन निर्दोषत्वात् ।

अत एव पुरुषान्तरस्य भ्रमादिसम्भवान्न कपिलादेरपि कर्तृत्वं वेदस्य, किञ्च वर्णानामनित्यत्वस्य वक्ष्यमाणत्वात्सुतरां तत्सन्दर्भस्य वेदस्यानित्यत्वमिति सङ्क्षेपः ॥

मुक्तावलीमयूखः ।

काम्यमरणार्थकृतशिवपूजनादेर्हिंसात्ववारणाय अदृष्टद्वारकत्वविशेषणमावश्यकमिति भावः ।

ननु साक्षान्मरणजनकस्यैव हिंसात्वमिति स्वीकारेणैव श्येने तादृशशिवपूजनादेरपि न हिंसात्वमिति अदृष्टद्वारकत्वरूपगुरुविशेषणं व्यर्थमत आह न चेति ।

अदृष्टद्वारकत्वविशेषणं विनैव श्येने बलवदनिष्टानुबन्धित्वमुपपादयतां मतमाह—केचित्त्विति ।

आचार्यास्त्विति । आचार्यो उदयनाचार्यः तथा च तदीये पद्ये—

विधिर्वेत्तुमिप्रायः प्रवृत्त्यादौ लिङादिभिः । अभियेयोऽनुमेया तु कर्तुरिष्टाप्युपायता ।
कृत्स्न एव हि वेदोऽयं परमेश्वरगोचरः । स्वार्थद्वारैव तात्पर्यं तस्य स्वर्गादिवद्विधौ ॥

कुसुमाञ्जलौ पञ्चमस्तबके श्लो० १५।१६॥

उपादानस्येति । उपादानस्य-समवायिकारणस्य, अप्यक्षं-प्रत्यक्षं प्रवृत्तौ कारणमिति ॥

निवृत्तिस्तुभवेद् द्वेषाद् द्विष्टोपायत्वधीर्यदि ॥ १५१ ॥

निवृत्तिरिति । द्विष्टसाधनताज्ञानस्य निवृत्तिं प्रति दुःखसाधनविषयक निवृत्तिं प्रति जनकत्वमन्वयव्यतिरेकाभ्यामवधारितमिति भावः॥१४६-१५१॥

यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत् ।

यत्न इति । जीवनयोनियत्नो यावज्जीवनमनुवर्तते । स चातीन्द्रियः । तत्र प्रमाणमाह—

शरीरे प्राणसञ्चारे कारणं परिकीर्तितः ॥ १५२ ॥

शरीर इति । प्राणसञ्चारो हि अधिकव्यासादियत्नसाध्यः । इत्थं च प्राणसञ्चारस्य सर्वस्य यत्नसाध्यत्वमनुमानात् । प्रत्यक्षयत्नस्य यावज्जीवातीन्द्रिययत्नसिद्धिः । स एव जीवनयोनिर्यत्नः ॥ १५२ ॥

गुरुत्वं निरूपयति—

(१)अतीन्द्रियं गुरुत्वं स्यात्पृथिव्यादिद्वये तु तत् ।
अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ॥ १५३ ॥
तदेवासमवायि स्यात्पतनाख्ये तु कर्मणि ।

अतीन्द्रियमिति । अनित्य इति । अनित्ये द्व्यणुकादौ तद्गुरुत्वमनित्यम् । नित्ये परमाणौ नित्यम् । गुरुत्वमित्यनुवर्तते । तद्गुरुत्वमसमवायिकारणम् । पतनेति । आद्यपतन इत्यर्थः ।

द्रवत्वं निरूपयति —

सांसिद्धिकं द्रवत्वं स्यान्नैमित्तिकमथापरम् ॥ १५४ ॥
सांसिद्धिकं तु सलिलं द्वितीये क्षितितेजसोः ।

मुक्तावलीमयूखः ।

समवायिकारणस्याप्यक्षमिति । तत्साध्यकप्रवृत्तिं प्रति तत्समवायिकारणात्मकतदुपादानगोचरलौकिकप्रत्यक्षस्य हेतुत्वम् ।

ननु शब्दसाध्यकप्रवृत्तिर्गगनादौ न स्यात् शब्दसमवायिकारणस्य गगनस्यातीन्द्रियत्वेनाप्रत्यक्षत्वात् किं च ध्वंससाध्यकप्रवृत्तिरपि न स्यात्तत्समवायिनोऽप्रसिद्धेरिति चेन्न; इष्टापत्तेः । शब्दसाक्षात्कारसाध्यकप्रवृत्तेरेव मृदङ्गादिगोचरायाः उपगमादिति प्राचीनाः ।

नव्यास्तु प्रकृतेऽधिष्ठानमात्रमुपादानं तेन च योगादेर्हविः, शब्दस्य मृदङ्गादि, प्राणसञ्चारादेश्च प्राणवहनाड्यादि, उपादानमिति वदन्ति ॥ १४९-१५१ ॥

द्वितीयादिपतनस्य वेगासमवायिकारणकत्वादाह—आद्येति ।

कारणतावच्छेदकतया गुरुत्वत्वजातिसिद्धिः । यथा-पतना समवायिकारणवा किञ्चिद्धर्मावच्छिन्ना कारणतावच्छेदिकेत्यनुमानाकारः ।

इति व्याकरणशास्त्राचार्यन्यायशास्त्रिश्रीरामगोविन्दशर्मशुक्लकृता टिप्पणी समाप्ता ।

परमाणौ जले नित्यमन्यत्रानित्यमिष्यते ॥ १५५ ॥

सांसिद्धिकमिति। द्रवत्वं द्विविधं-सांसिद्धिकं नैमित्तिकं चेत्यर्थः।

परमाणाविति। जलपरमाणौ द्रवत्वं नित्यमित्यर्थः। अन्यत्र-पृथिवी-परमाण्वादौ जलद्वयणुकादौ च द्रव्यत्वमनित्यम् ॥ १५३-१५५ ॥

कुत्रचित्तेजसि कुत्रचित्पृथिव्यां च नैमित्तिकं द्रव्यत्वं तत्र को वा नैमित्तिकार्थस्तदर्शयति—

नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु।

नैमित्तिकमिति। वह्नीति पदं तेजोऽर्थकम्। तथाच अग्निसंयोगजन्यं नैमित्तिकं द्रवत्वम्। तच्च सुवर्णादिरूपे तेजसि घृतजतुप्रभृतिषु पृथिव्यां च वर्तत इत्यर्थः ॥

द्रवत्वं स्यन्दने हेतुर्निमित्तं सङ्ग्रहे तु तत् ॥ १५६ ॥

द्रवत्वं स्यन्दने हेतुरिति। असमवायिकारणमित्यर्थः। संग्रहे-सक्तुकादिसंयोगविशेषे। तत्-द्रवत्वं, स्नेहसहितमिति बोद्धव्यम्। तेन द्रुतसुवर्णादीनां न संग्रहः ॥ १५६ ॥

स्नेहं निरूपयति—

स्नेहो जले स नित्योऽणावनित्योऽन्ययविन्यसौ।
तैलान्तरे तत्प्रकर्षाद्दहनस्यानुकूलता ॥ १५७ ॥

स्नेहो जल इति। जल एवेत्यर्थः। असौ-स्नेहः।

ननु पृथिव्यामपि तैले स्नेह उपलभ्यते, न चासौ जलीयः, तथा सति दहनप्रतिकूल्यं स्यादत आह—तैलान्तर इति। तत्प्रकर्षात्। तैले उपलभ्यमानः स्नेहोऽपि जलीय एव, तस्य प्रकृष्टत्वादग्नेरानुकूल्यम्। अपकृष्टस्नेहं हि जलं वह्निं नाशयतीति भावः ॥ १५७ ॥

संस्कारं निरूपयति—

संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने।

संस्कारेति। वेगस्थितिस्थापकभावनाभेदात्संस्कारस्त्रिविध इत्यर्थः।

मूर्तमात्रे तु वेगः स्यात्कर्मजो वेगजः क्वचित् ॥ १५८ ॥

मूर्तमात्र इति। कर्मजवेगजभेदाद्वेगो द्विविध इत्यर्थः। शरीरादौ हि नोदनजनितेन कर्मणा वेगो जन्यते, तेन च पूर्वकर्मनाशस्तत उत्तरं कर्म। प्रथमेऽपि। विना च वेगं कर्मणः कर्मप्रतिबन्धकत्वात्पूर्वकर्मनाश उत्तरकर्मोत्पत्तिश्च न स्यात्। यत्र वेगवता कपालेन जनिते घटे वेगो जन्यते स वेगजो वेगः ॥ १५८ ॥

मुक्तावलीमयूखः।

वेगो जन्यते इति। वेगत्वं जातिविशेषः प्रत्यक्षसिद्धः। स्थितिस्थापकत्वं जातिविशेषः-क्रियाविशेषजनकतावच्छेदकतया सिद्धः।

स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि ।
अतीन्द्रियोऽसौ विज्ञेयः क्वचित्स्पन्देऽपि कारणम् ॥ १५९ ॥

स्थितिस्थापकेति । आकृष्टशाखादीनां परित्यागे पुनर्गमनस्य स्थितिस्थापकसाध्यत्वात् । केचिदिति । चतुर्षु क्षित्यादिषु स्थितिस्थापकं केचिन्मन्यन्ते तदप्रमाणमिति भावः । असौ—स्थितिस्थापकः । क्वचिदाकृष्टशाखादौ ॥ १५९ ॥

भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः ।
उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् ॥ १६० ॥

भावनाख्य इति । तस्य—संस्कारस्य । उपेक्षात्मकज्ञानात्संस्कारानुत्पत्तेरुपेक्षानात्मक इत्युक्तम् । तत्संशयात्संस्कारस्यानुत्पत्तेर्निश्चय इत्युक्तम् । तेनोपेक्षान्यनिश्चयत्वेन संस्कारं प्रति हेतुतेति भावः ।

ननु स्मरणं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुत्वं, तेनोपेक्षादिस्थले न स्मरणम् । इत्थं च संस्कारं प्रति ज्ञानत्वेनैव हेतुतास्त्विति चेद्—

न; विनिगमनाविरहेणापि संस्कारं प्रति उपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात् । किञ्चोपेक्षास्थले संस्कारकल्पनाया गुरुत्वात्संस्कारं इति चोपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात् ॥ १६० ॥

स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते ।

असौ—संस्कारः । तत्र प्रमाणं दर्शयति—स्मरण इति । यतः स्मरणं प्रत्यभिज्ञानं च जनयत्यतः संस्कारः कल्प्यते । विना व्यापारं पूर्वानुभवस्य स्मरणादिजननासामर्थ्यात्स्वस्वव्यापारान्यतराभावे कारणत्वासम्भवात् । न च प्रत्यभिज्ञां प्रति तत्तत्संस्कारस्य हेतुत्वे प्रत्यभिज्ञायाः संस्कारजन्यत्वेन स्मृतित्वापत्तिरिति वाच्यम्, अप्रयोजकत्वात् ।

परेत्वनुद्बुद्धसंस्कारात्प्रत्यभिज्ञानुदयादुद्बुद्धसंस्कारस्य हेतुत्वापेक्षया तत्तत्स्मरणस्यैव प्रत्यभिज्ञां प्रति हेतुत्वं कल्प्यत इत्याहुः ॥

मुक्तावलीमयूखः ।

वस्तुतः संस्कारं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुत्वे एव प्रमाणमस्तीत्याह—किञ्चेति ।

संस्कारकल्पनाया इति । अस्य स्मृतिं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुत्वे इत्यादिः ।

संस्कारः कल्प्यते इति । नन्वनुभवध्वंस एव व्यापारोऽस्तु प्रतियोग्यभावयोरेकाश्रयजनकत्वमिति नियमस्याप्रयोजकत्वात् । न च कारणीभूताभावप्रतियोगित्वेन अनुभवस्य स्मृतिप्रतिबन्धकत्वापत्तिरिति वाच्यम्, संसर्गाभावत्वावच्छिन्नकारणताश्रयीभूताभावप्रतियोगित्वस्यैव प्रतिबन्धकतापदार्थत्वादिह च संसर्गाभावत्वेनाजनकत्वादिति चेन्न संस्कारानङ्गीकारे कदाचिदनुभूतस्य सर्वदा स्मरणापत्तेः अनुभवध्वंसात्मकव्यापारस्य सत्त्वादिति शिवम् ।

इत्याहुरिति । परेत्वन्यमते उद्बुद्धसंस्कारस्य स्मरणं प्रति स्मरणस्य च प्रत्यभिज्ञां

अदृष्टं निरूपयति—

धर्माधर्मावदृष्टं स्याद्धर्मः स्वर्गादिसाधनम् ॥ १६१ ॥
गङ्गास्नानादियागादिव्यापारः स तु कीर्तितः ।

धर्माधर्मावितिं । स्वर्गादीति । स्वर्गादिसकलसुखानां स्वर्गसाधनीभूतशरीरादीनां च साधनं धर्म इत्यर्थः । तत्र प्रमाणं दर्शयितुमाह—यागादीति । यागादिव्यापारतया धर्मः कल्प्यते । अन्यथा यागादीनां चिरविनष्टतया निर्व्यापारतया च कालान्तरभाविस्वर्गजनकत्वं न स्यात् । तदुक्तमाचार्यैः—

चिरध्वस्तं फलायालं न कर्मातिशयं विना । इति ।

ननु यागध्वंस एव व्यापारः स्यात् । न च प्रतियोगितद्ध्वंसयोरेकत्राजनकत्वं सर्वत्र तथात्वे मानाभावात्, न च स्वन्मते फलानन्तर्यं, मन्मते चरमफलस्यापूर्वनाशकत्वान्न तथात्वमिति वाच्यम्, कालविशेषस्य सहकारित्वादित्यत आह-गङ्गास्नानेति । गङ्गास्नानस्य हि स्वर्गजनकत्वेऽनन्तानां जलसंयोगध्वंसानां व्यापारत्वमपेक्ष्यैकमपूर्वमेव कल्प्यते लाघवादिति भावः ॥

ननु ध्वंसोऽपि न व्यापारोऽस्तु । न च निर्व्यापारस्य चिरध्वस्तस्य कथं कारणत्वमिति वाच्यम्, अनन्यथासिद्धनियतपूर्ववर्तित्वस्य तत्रापि सत्त्वात्, अव्यवहितपूर्ववर्तित्वं तु चक्षुस्संयोगादेः कारणत्वे, न तु सर्वत्र, कार्यकालवृत्तित्वमिव समवायिकारणस्य कारणत्वे इत्यत आह—

कर्मनाशाजलस्पर्शादिना नाश्यस्त्वसौ मतः ॥ १६२ ॥

कर्मनाशेति । यदि ह्यपूर्वं न स्यात्तदा कर्मनाशाजलस्पर्शादिना नाश्य-

---

मुक्तावलीमयूखः ।

प्रति हेतुताकल्पनं मन्मतेऽन्तरास्मरणव्यक्तिमकल्पयित्वा उद्बुद्धसंस्कारस्यैव प्रत्यभिज्ञां प्रति हेतुत्वकल्पने लाघवमित्यरुचिराहुरित्यनेन सूचिता ॥ १५२-१६१ ॥

यागेति । यागत्वं च देवतोद्देश्यकस्वस्वत्वध्वंसप्रयोजकद्रव्यविशेष्यकेच्छात्वम् । होमत्वं च अग्निसंयोगानुकूलक्रियाजनकघृतादिवृत्तिनोदनादिव्यापारत्वम् । दानत्वं च मूल्यग्रहणं विना स्वस्वत्वध्वंसपरस्वत्वजनकत्यागत्वम् ।

मीमांसकास्तु देवतामुद्दिश्य द्रव्यत्यागो यागः । स्वकस्य द्रव्यस्य वह्नौ प्रक्षेपो होमः । स्वकीयद्रव्यस्य स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनं दानम् । तदुक्तं न्यायमालायाम्-आकाङ्क्षा यागशब्दस्य त्यागेनैव निवर्तते । त्यागस्योपरि होमस्य विधेः क्षेपावसानता ॥ स्वीयं द्रव्यं परित्यज्य परकीयं यथा भवेत् । तथा सम्पादनं दानं त्यागेऽप्येषामियं भिदा ॥ इति ॥

तथात्वे—प्रतियोगिध्वंसयोरेकत्राजनकत्वे ।

चिरविनष्टतयेति । ननु चिरनष्टस्याप्यनुभवस्य स्मृतिजनकत्वं दृष्टमत आह-निर्व्यापारतयेति । तथाच तस्य संस्काररूपव्यापारद्वारा स्मृतिजनकत्वमिति न दोष इति भावः ।

फलानन्तर्यं—ध्वंसस्याविनाशित्वेन फलपरम्पराप्रसङ्गः ।

त्वं धर्मस्य न स्यात्। नहि तेन यागादेर्नाशः प्रतिबन्धो वा कर्तुं शक्यते तस्य पूर्वमेव वृत्तत्वादिति भावः। एतेन देवताप्रीतेरेव फलत्वमित्यपास्तम्—गङ्गास्नानादौ सर्वत्र देवताप्रीतेरसम्भवात्, देवतायाश्चेतनत्वेऽपि तत्प्रीतेरनुद्देश्यत्वात्, प्रीतेः सुखस्वरूपत्वेन विष्णुप्रीत्यादौ तदसम्भवात्, जन्यसुखादेस्तत्राभावात्। तेन विष्णुप्रीतिजन्यत्वे न परामिमतस्वर्गादिरेव विष्णुप्रीतिशब्देन लक्ष्यते ॥ १६१।१६२ ॥

अधर्मो नरकादीनां हेतुर्निन्दितकर्मजः।

अधर्म इति। नरकादिसकलदुःखानां नारकीयशरीरादीनां च साधनमधर्म इत्यर्थः ॥

तत्र प्रमाणमाह—

प्रायश्चित्तादिनाश्योऽसौ जीववृत्ती त्विमौ गुणौ ॥ १६३ ॥

प्रायश्चित्तेति। यदि ह्यधर्मो न स्यात्तदा प्रायश्चित्तादिना नाश्यत्वमधर्मस्य न स्यात्। न हि तेन ब्रह्महननादीनां नाशः प्रतिबन्धो वा विधातुं शक्यते, तस्य पूर्वमेव विनष्टत्वादिति भावः। जीवेति। ईश्वरे धर्माधर्माभावादिति भावः ॥ १६३ ॥

इमौ तु वासनाजन्यौ ज्ञानादपि विनश्यतः।

इमौ—धर्माधर्मौ। वासनेति। अतो ज्ञानिना कृते अपि सुकृतदुष्कृतकर्मणो न फलायालमिति भावः। ज्ञानादपीति। अपिना भोगपरिग्रहः।

ननु तत्त्वज्ञानस्य कथं धर्माधर्मनाशकत्वं? 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' इति वचनविरोधात्, इत्थं च तत्त्वज्ञानिनां झटिति कायव्यूहेन सकलकर्मणां भोगेन क्षय इति चेद्—न तत्र भोगस्य वेदबोधितनाशकोपलक्षकत्वात्। कथमन्यथा प्रायश्चित्तादिना कर्मणां नाशः। तदुक्तम्—'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन' इत्यादिना। श्रूयते च—

'क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे' इति।

ननु तत्त्वज्ञानिनस्तर्हि शरीरावस्थानं सुखदुःखादि च न स्याज्ज्ञानेन सर्वेषां कर्मणां नाशादिति चेद्—

न, प्रारब्धेतरकर्मणामेव नाशात्। तत्तच्छरीरभोगजनकं हि यत्कर्म तत्प्रारब्धं, तदभिप्रायमेव नाभुक्तमिति वचनमिति ॥

मुक्तावलीमयूखः।

ईश्वरे इति। नन्वीश्वरे कुतो न धर्माधर्मयोरुत्पत्तिरत आह—वासनाजन्याविति। ईश्वरे वासनाया अभावादिति भावः।

ननु वासनाया धर्माधर्मजनकत्वे मानाभावो अत आह—अतो ज्ञानिनेति।

सर्वकर्माणि—सर्वकर्मजन्यादृष्टानीत्यर्थः। अन्यथा कर्मणां क्षणिकत्वेन नष्टतया ज्ञाननाश्यत्वकथनासङ्गतिः स्यात्।

शब्दं निरूपयति—

शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः ॥ १६४ ॥
कण्ठसंयोगादिजन्यावर्णास्ते कादयो मताः ।
सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते ॥ १६५ ॥
वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता ।

शब्द इति । नभोवृत्तिराकाशसमवेतः । दूरस्थशब्दस्याग्रहणादाह-श्रोत्रेति ।

ननु मृदङ्गावच्छेदेनोत्पन्ने शब्दे श्रोत्रे कथमुत्पत्तिरत आह—वीचीति । आद्यशब्देन बहिर्देशदिगवच्छिन्नोऽन्यः शब्दस्तेनैव शब्देन सदृशो जन्यते । तेन चापरस्तद्व्यापकः । एवं क्रमेण श्रोत्रोत्पन्नो गृह्यत इति ।

कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते ॥ १६६ ॥

कदम्बेति । आद्यशब्दाहशेषु दिक्षु दश शब्दा उत्पद्यन्ते । तेभ्यश्चान्ये दश शब्दा उत्पद्यन्त इति भावः । अस्मिन्मते कल्पनागौरवादुक्तं—कस्यचिन्मत इति ॥ १६४।१६५।१६६ ॥

ननु शब्दस्य नित्यत्वादुत्पत्तिकथनमसङ्गतमत आह—

उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता ।

उत्पन्न इति । शब्दानामुत्पादविनाशप्रत्ययशालित्वादनित्यत्वमित्यर्थः ॥

ननु स एवायं ककार इत्यादिप्रत्यभिज्ञानाच्छब्दानां नित्यत्वम्, इत्थं चोत्पादविनाशबुद्धिर्भ्रमरूपैवेत्यत आह—

सोऽयं क इति बुद्धिस्तु साजात्यमवलम्बते ॥ १६७ ॥

सोऽयं क इति । साजात्यमिति । तत्र प्रत्यभिज्ञानस्य तत्सजातीयत्वं विषयो न तु तद्व्यक्त्यभेदो विषयः—उक्तप्रतीतिविरोधात् । इत्थञ्च द्वयोरपि प्रतीत्योर्न भ्रमत्वमिति ॥ १६७ ॥

ननु सजातीये सोऽयमिति प्रत्यभिज्ञा कुत्र दृष्टेत्यत आह—

तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात् ।
तस्मादनित्या एवेति वर्णाः सर्वे मतं हि नः ॥ १६८ ॥

इति श्रीविश्वनाथपञ्चाननभट्टाचार्यकृता कारिकावली समाप्ता ॥

मुक्तावलीमयूखः ।

कल्पनागौरवादिति । दशशब्दानां तत्तद्भागभावानां तेषां कार्यकारणभावस्य च कल्पने गौरवादित्यर्थः ॥ १६२-१६६ ॥

द्वयोरपीति । अत्र मीमांसकाः । स एवायं गकार इति प्रत्यभिज्ञाबलाद्गकारस्य तावत्कालं स्थितेरभ्युपेयत्वात् नाशकक्षामप्रयोजकाभावान्नित्यत्वम् । नचैवं प्रत्यभिज्ञा साजा-

तदेवेति । यदौषधं मया कृतं तदेवान्येनापि कृतमित्यादिदर्शनादिति भावः ॥ १६८ ॥

इति न्यायसिद्धान्तमुक्तावल्यां गुणनिरूपणं समाप्तम् ।

इति महामहोपाध्याय विद्यानिवासभट्टाचार्यसुत-श्रीविश्वनाथपञ्चानन-भट्टाचार्यविरचिता न्यायसिद्धान्तमुक्तावली सम्पूर्णा ॥

मुक्तावलीमयूखः ।

त्यविषयिणी न तु व्यक्त्यभेदविषयिणीति वाच्यम् । सैवेयं दीपकलिकेत्यादौ व्यक्तिभेदस्य स्पष्टमवगमात् तादृशप्रतीतेः साजात्यविषयत्वेऽपि सएवायं गकार इति प्रतीतेः व्यक्त्यभेदांशे बाधकाभावेन साजात्यविषयकत्वे मानाभावात् तज्जातीयोऽयमित्यप्रतीतेश्च ।

न च तारत्वमन्दत्वादिविरुद्धधर्माध्यासोऽभेदबाधक इति वाच्यम् । प्रत्यभिज्ञावलेन तस्य नित्यत्वसिद्धौ तारत्वादेरायुधर्मत्वाङ्गीकारेणादोषात् । एकस्मिन्निरूपकभेदेन पितृत्वपुत्रत्वयोरिव तारत्वमन्दत्वयोरपि समावेशेन विरोधाभावाच्चेत्याहुः—

तन्न, तथासति कत्वगत्वादेरपि व्यञ्जकवायुधर्मत्वापत्त्याककारगकारयोरपि भेदाभावप्रसङ्गात् वर्णनित्यतापक्षे कण्ठताल्वाद्यभिघातानां 'क'साक्षात्कारत्वस्यजन्यतावच्छेदकत्वाङ्गीकारे गौरवाच्च मम तु कत्वमेव तथेति लाघवमिति ध्येयम् ॥ १६७-१६८ ॥

नगवसुनवचन्द्रैः सम्मिते वैक्रमेऽब्दे रघुपतिजनितिथ्यां माघि चैत्रे मयूखः ।
उदित इति विपश्चित्सूर्यनारायणाख्याद्रघुपतिपदपूजादीपकार्यं श्रयेत ॥ १ ॥

श्रीगर्गान्वयसिन्धुतः समुदितो रामेश्वरो गर्पितो,
देवीश्रीसुधरा च यस्य जननी, श्रीदत्तशर्मा गुरुः-
श्रीमच्चन्द्रधरश्च यस्य विदितः, साकेत प्रान्तस्थितेः
श्रीमत्सारवपारिणः कृतिरियं लोके समुज्जृम्भताम् ॥ २ ॥

साकेताख्यपुरी मनुप्रभृतिभिः श्रीरामचन्द्रान्तिमैः
सम्राड्भिः प्रथिता त्रिलोकमहिता मुक्तिप्रदा राजते ॥
तस्याः वह्निदिशं श्रिते सुखकरे ग्रामाऽऽढ्यहामिधे
क्रोशैर्विंशतिसङ्ख्यकैः परिमितेवेदा जनिर्मेबुधैः ॥ ३ ॥

इति न्यायव्याकरणाचार्य श्रीसूर्यनारायणशर्मशुक्लविरचिते मुक्तावलीमयूखे गुणनिरूपणं समाप्तं, समाप्तश्चायं मुक्तावलीमयूखः ।

मुद्रकः—विद्याविलास प्रेस, बनारस सिटी ।

रघुवंशमहाकाव्यम् ।

मल्लिनाथी तथा परीक्षोपयोगी 'सुधा' व्याख्यासहितम् ।

इस संस्करण में प्रत्येक श्लोक का क्रमशः अवतरण, मल्लिनाथकृत सञ्जीविनी टीका–अन्वय–"सुधाव्याख्या" कोश–समासादि–वाच्यपरिवर्तन–तात्पर्यार्थ-हिन्दी-भाषार्थ तथा जहां तहां पौराणिक कथायें उपयुक्त टिप्पणियां–सङ्क्षिप्त कथायें आदि उपयुक्त विषय तथा ग्रन्थ समाप्ति में परीक्षोपयोगी प्रश्नपत्र भी दिये गये हैं। आज तक ऐसी उत्तम परीक्षोपयोगी टीकायें तथा मल्लिनाथ कृत सञ्जीविनी टीका सहित का रघुवंश अन्यत्र नहीं छपा है। २–३ सर्ग १।) २ से ५ सर्ग २) तथा ६ से १० सर्ग २॥)

व्युत्पत्ति–प्रदर्शनम्

बनारस मध्यमा परीक्षोपयुक्त सूत्रादि निर्देश पूर्वक
नाना प्रश्नोत्तर संवलित अनुपम ग्रन्थः ।

इसमें सन्धि, कारक, स्त्रीप्रत्यय, समास, तिङन्त, आत्मनेपद, परस्मैपद, लकारार्थ आदि प्रकरणों का विचार अत्यन्त सरल और संक्षिप्तमें किया गया है। आज तक व्युत्पत्तिप्रदर्शन का पथ–प्रदर्शक इसके समान दूसरा ग्रन्थ नहीं छपा है ।)

तर्कसंग्रहः

(परीक्षोपयुक्त अभिनव संस्करण)

न्यायबोधिनी–दीपिका–मयूख टीकात्रयोपेतेन
हिन्दीभाषा भाषित दीपिका–परिशिष्टेन च विभूषि

यह 'मयूख' टीका युत अभिनव संस्करण सर्वतोभावेन परी
मेण्ट संस्कृत कालेज के प्रोफेसर न्याय व्याकरणाचार्य महाम
शुक्ल जी कृत "मयूख" में 'दीपिका' का अनुवाद अल
दिया गया है। साथ २ परिशिष्ट में दीपिका की
संस्करण की श्रेष्ठता अधिकाधिक प्रशंसनीय हो

पञ्चतन्त्रम् (अ

सुबोधिनी–संस्कृत

प्रथमापरीक्षार्थियों के लि
हिन्दी टीका, टिप्पणी,
विस्तृत भूमिका इत्
अलङ्कार

Herbert College Library Kotah.
Keep books dry and unsoiled.
Never hold a book by one of its covers.
Never mark in them.
Do not turn down their pages.
Do not lay them face downwards.
Do not strap them up tightly.
Never let them fall.
Open them gently.
Use books to read, and for nothing else.
The book you are reading will go to others. Pass it on to them neat and clean hoping that they will also do the same.
6000 2-48.